श्रेयोभूता शब्दसिद्धिः, पदसिद्धिश्च श्रेयसे ।
वचःसिद्धिस्ततो नित्यं, निःश्रेयसपदप्रदा ॥

# श्री निःश्रेयसम्

(षाण्मासिक-पत्रम्)

वि.सं. २०७६, वर्षः ७
अङ्क : १५-१६

सम्पादकः
पंन्यासप्रवर श्री सम्यग्दर्शनविजय गणी



# नन्दतात्... नन्दतात्... नन्दतात्...

श्रीनि:श्रेयसवाचकवर्येभ्य: सहर्षं निवेद्यते यत्
श्रीनि:श्रेयसषाण्मासिकपत्रं
प्रतिवर्षं
पोषशुक्लत्रयोदश्यामाषाढ-
कृष्णचतुर्दश्या-ञ्चास्माभिरमदावाद-पालडीस्थ-
श्री हीरसूरीश्वरश्रुतज्ञानभवन
सञ्चालकगणेन प्रकाश्यते।
तत्र भवतां वाचकविदुषां
चिरप्रतीक्षानन्तरमधुना
पोषाषाढामॉसयोरङ्कं सार्धमेव
प्रकाश्यते।
तेन कारणविशेषेण बहुकालक्षेपकारणीभूत:
प्रकाशकगण: पुन: पुन: क्षमां प्रार्थते।
तत् सहतु वाचकगण:।





-प्रकाशक:

श्रेयोभूता शब्दसिद्धिः, पदसिद्धिश्च श्रेयसे।
वचःसिद्धिस्ततो नित्यं, निःश्रेयसपदप्रदा॥

वि.सं. २०७६, वर्षः ७
अङ्कः १५-१६

श्री सुधर्मास्वामि जैन ज्ञानभंडार
C/o. विमुक्ति विश्व विद्यालय
हिराजैन सोसायटी के पास, रामनगर,
साबरमती, अहमदाबाद - 380005
फोन नं.:-(079) 55220409

# श्री निःश्रेयसम्

(षाण्मासिक-पत्रम्)



सम्पादक :
पंन्यासप्रवर श्री **सम्यग्दर्शनविजय** गणी

॥ णमोत्थुणं समणस्स भगवओ महावीरस्स ॥
॥ ॐ ह्रीं श्री शंखेश्वर पार्श्वनाथाय नमः ॥
॥ श्री आत्म-कमल-वीर-दान-प्रेम-रामचन्द्रसूरिसद्गुरुभ्यो नमः ॥
॥ श्री मुक्तिचन्द्र-महोदय-ललितशेखर-जयकुञ्जर-पुण्यपाल-मुक्तिप्रभ-हेमभूषणसूरिभ्यो नमः ॥

श्रीनिःश्रेयसम् (षाण्मासिक-पत्रम्-१५-१६) वर्षः ७ अङ्कः १५-१६

- **निमित्तम्**

जैनशासनज्योतिर्धर पू. आ. श्री विजय रामचन्द्रसूरीश्वराणां दीक्षाशताब्दी वर्षः-वि. सं. २०६९

- **आशीर्वाद :**

सुविशालगच्छनायक पू. आ. श्री विजय पुण्यपालसूरीश्वराः,
प्रवचनप्रभावक पू. आ. श्री विजय मुक्तिप्रभसूरीश्वराः
वात्सल्यवारिधि पू. पं. श्री वज्रसेनविजयगणिवराः

- **प्रेरणा**

प्रसिद्धप्रवचनकार पू. आ. श्री विजय श्रेयांसप्रभसूरीश्वराः,
प्रवचनकुशल पू. आ. श्री विजय हेमप्रभसूरीश्वराः



- **सम्पादकः**

पूज्य पंन्यासप्रवरश्री सम्यग्दर्शन विजय गणिवरः

- **साहित्यसर्जकाः-संसोधकाश्चः**

पूज्य पंन्यासप्रवरश्री श्रुततिलकविजय गणिवरः,
पूज्य पंन्यासप्रवरश्री श्रुतसुन्दरविजय गणिवरः,
पूज्य मुनिप्रवरश्री आत्मदर्शनविजयः
पूज्य मुनिप्रवरश्री प्रशमरक्षित विजयः
पूज्य मुनिप्रवरश्री दिव्यदर्शन विजयः,
पूज्य मुनिप्रवरश्री कमलदर्शन विजयः

**प्रकाशनप्रतिष्ठानम्**

जगद्गुरु पू. आ. श्री विजय हीरसूरीश्वर श्रुतज्ञानभवनम्
ए-१, घनश्यामपार्क फ्लेट, १७, आनंदनगर सोसायटी,
त्रिशला फ्लेट के सामने,
भट्ठा, पालडी, अहमदावाद फोन (ओ.) २६६०५८६४

**प्रकाशनम्**

वैक्रमीय २०७६,
आषाढकृष्णाचतुर्दशी रविवार,
दि. १९-०७-२०२०
प्रतय : ५०० मूल्यम् : २००

आभारः...अनुग्रहः...अनुमोदनम्...
प्रसिद्धप्रवचनकारपूज्यपादाचार्यप्रवरश्रीमद्विजयश्रेयांसप्रभसूरीश्वराणामुपकारस्मृत्यर्थम्
**'वर्षिल अशोक छेडा' आत्मश्रेयार्थंच अशोक भवानजीभाई छेडा परिवारेण**
अस्मिन् ग्रंथे द्रव्यव्ययेन सुकृतसञ्चयः कृतस्तमनुमोदयति....
जगद्गुरु पू. आ. श्री विजय हीरसूरीश्वर श्रुतज्ञानभवनस्य सञ्चालकगणः
पालडी-अमदावादः

# कर्म यत् करोति तदेव भवति...

जीवः स्वयं कर्म करोति। स्वयं कर्म बध्नाति। स्वयं फलं भुनक्ति। स्वयं हि तन्विनिर्मुक्तोपायं सेवते। पुनश्च स्वयं हि तदुपायेन विनिर्मुक्तो भवति।

यादृशं कर्म जीवो बध्नाति। तादृशं फलं भुनक्ति। अत्र कश्चित् पृच्छेत्? जीवः कर्म बध्नातीति सत्यं, किन्तु कस्मात् स कर्म बध्नाति, तन्न ज्ञायते? तदा ज्ञानिनः कथयन्ति। पञ्चेन्द्रियेष्वासक्तिप्रभावेन जीवोऽशुभं कर्म बध्नाति। सुखाभिलाषयैव पापं कुरुते। पापेनाशुभं कर्म बध्नाति। अशुभकर्मेणैव दुःखमाप्नोति। शुभकर्मणा सुखमाप्नोति।

अत्र 'मिडडे' इति वर्तमान पत्रिकायां निर्दिष्टः प्रसङ्गः पूर्वजन्मकृतकर्मप्रभावफलं स्पष्टतया ज्ञापयति।


રોડ-એક્સિડન્ટમાં મમ્મીના ગર્ભમાંથી બહાર આવી દીકરી

ब्राझीलदेशे एका गर्भवती स्त्री ट्रकयानेन गच्छति सत्यकस्मातेन मृत्युं गता। तस्या गर्भस्तु प्रवराधातेन बहि--र्निर्गतः । तुषराशीमध्यपतितश्च । तन्मातृगर्भनालोऽपि काष्टफलकेन तुट्टितः। बालसंरक्षणसंयुतस्थाने विना बाधामत्र चित्रस्थो दृश्यते। माता मृता । बालीका तु भगवता रक्षितेति जनैरुच्यते।

किन्तु तत् रक्षणकर्ता स्वकृतकर्मेवास्ति। अशुभकर्मणा माता मृता। शुभकर्मणा पुत्री चाक्षता जाता। सार्धनवमासाधिकेन जन्मसमयेनैव सा जाता। झटिति तां बालां चिकित्सालये नीता। भगवता रक्षिता ततरेव तस्याः 'गियोवान्ना' (भगवद्रक्षिता) इति नाम्ना प्रसिद्धा।

इत्येवं कर्म जीवो बध्नाति स्वाध्यवसाययोगेन। अध्यवसायो हि विचाररूपोऽस्ति। जीवानां यादृशोऽध्यवसायस्तादृशः कर्मबन्धो भवति।

ततः सदध्यवसायप्राप्त्यर्थं सात्विक-तात्त्विक-मार्मिक-वाञ्चन-मूर्धन्यरूपं श्रीनिःश्रेयससदृशपत्रवाञ्चनं पुनः पुनः कर्तव्यमिति शम्॥

**-प्रसिद्धप्रवचनकार पू. आ. श्री विजय श्रेयांसप्रभसूरि चरणसेवाहेवाकी**
**पंन्यासश्रीसम्यग्दर्शनविजयगणी**



# क्रमनिर्देशः

## विभाग : १ प्राचीनकृतयः


| विषय | लेखकादयः | पृष्ठ |
|---|---|---|
| द्वे चरित्रस्तोत्रे | आचार्यश्रीविजयतीर्थभद्रसूरि | २ |
| श्रीचतुर्विंशतिजिनस्तवनम् | पंन्यासश्रीधर्मतिलकविजयो गणी | ४ |
| विजयानंदद्वात्रिंशिका | चतुरविजयो मुनिः | ६ |
| उपदेशरत्नकोशः | कमलदर्शनविजयो मुनिः | ७ |
| श्रीचतुर्विंशतिजिनस्तुतिः | साध्वीश्रीक्षमानिधिश्रीः | ८ |


## विभाग : २ अर्वाचीनकृतयः


| खण्ड : १ श्रीयशोप्रज्ञादर्शनम्... | | |
|---|---|---|
| परमज्योतिः पञ्चविंशतिका | आचार्यश्रीविजयकल्याणबोधिसूरिः | १० |
| वृत्तं श्रीयशोविजयवाचक पुङ्गवानाम्... | पंन्यासश्रीसम्यग्दर्शनविजयो गणी | ११ |
| यशोगुर्जरीस्तवनानुवादः | श्री आत्मदर्शनविजयो मुनिः | १३ |

| खण्ड : २ सूरिरामचन्द्रदीक्षाशताब्दिभावाञ्जलिः | | |
|---|---|---|
| स्तुतिविंशतिका | आचार्यश्रीविजयतपोरत्नसूरिः | १५ |
| परिनिर्वाणम् | आचार्यश्रीविजयमोक्षरतिसूरिः | १६ |
| प्रेमसूरेः सफलो गुणानुवादः | आगमरक्षितविजयो मुनिः | १७ |
| वाचनानुवादः | साध्वीजीश्रीविरागदर्शनाश्रीः | १९ |

| खण्ड : ३ निःश्रेयसं तं सततं पठामि.... | | |
|---|---|---|
| नामभक्तेः स्वीकारः आकारभक्तेश्चास्वीकारः | आचार्यश्रीविजयरत्नसेनसूरिः | २२ |
| निधिः | श्रीकमलः | २२ |
| श्रीचारित्रविंशतिका-२०-२१ | पंन्यासश्रीसम्यग्दर्शनविजयोगणी | २३ |
| अस्माकं श्रुतकोशः | पंन्यासश्रीश्रुततिलकविजयो गणी | २७ |
| पर्युषणपर्वोत्सवः क्षमाधर्मस्य महोत्सवः | पंन्यासश्रीश्रुतसुंदरविजयो गणी | २९ |
| अद्भुतो भूतकालः | आत्मदर्शनविजयो मुनिः | ३० |
| जिज्ञासातृप्तिः | आत्मदर्शनविजयो मुनिः | ३० |
| श्री अजितनाथस्तुत्यनुवादः | ज्ञानभूषणविजयो मुनिः | ३१ |
| श्रीसंभवनाथस्तुत्यनुवादः | ज्ञानभूषणविजयो मुनिः | ३१ |

| विषय | लेखकादय: | पृष्ठ |
|---|---|---|
| सत्यवृत्तान्त (सत्त्वं विना सिद्धिर्न भवति) | दर्शरक्षितविजयो मुनि: | ३२ |
| तात्पर्यं कथानकस्य | प्रशमरक्षितविजतो मुनि: | ३३ |
| वैदेशिकी वार्ता | दिव्यदर्शनविजयो मुनि: | ३४ |
| स्वल्पं मधुरम्... | दिव्यदर्शनविजयो मुनि: | ३४ |
| श्री फलवर्धि-पार्श्वनाथ: | वन्दनरूचिविजयो मुनि: | ३६ |
| आर्यत्वमिदं रमणीयतरम् | देवार्य: | ३७ |
| अहं लुप्तोऽस्मि | वचनयोगविजयो मुनि: | ४० |
| श्रीशत्रुंञ्जयतीर्थमण्डन श्री युगादिप्रभो: स्तवनाष्टकम् | आर्जवदर्शनविजयो मुनि: | ४० |
| क्षत्रियकुण्डतीर्थनायक श्रीवर्धमानजिनस्तवनाष्टकम् | आर्जवदर्शनविजयो मुनि: | ४१ |
| कर्मसाहित्य: | साध्वीजीश्रीविरागदर्शनाश्री: | ४१ |
| श्रेय: स्तुत्यष्टकम् | साध्वीजीश्रीक्षमानिधिश्री: | ४३ |
| सम्यग्दर्शनाधिकारिणो गुणत्रयोदशी | साध्वीजीश्रीनम्रगिराश्री: | ४३ |
| आर्यसंस्कृति: | साध्वीजीश्रीतत्त्वप्रियाश्री: | ४४ |
| जैनसाहित्यम् | साध्वीजीश्रीआगमप्रियाश्री: | ४६ |
| तत्त्वार्थसूत्रप्रथमसूत्रार्थविचार: | साध्वीजीश्रीधन्यरेखाश्री: | ४८ |
| सद्गुरुं प्रणमाम्यहम् | साध्वीजीश्रीदर्शनपूर्णाश्री: | ४९ |
| श्री भरटकद्वात्रिंशिका | साध्वीजीश्री कुलरत्नाश्री: | ४९ |
| काव्यशास्त्रविनोदेन... | श्रेय:प्रीतम् | ५० |
| श्री द्वयक्षरी श्लोक: | श्रेय:प्रीतम् | ५० |
| चिन्तनम् सूक्तिमाला | साध्वीजीश्री कुलरत्नाश्री: | ५१ |
| श्री सद्गुरुगुणस्तुतिनवकम् | मुक्तिपूर्णताप्रार्थी | ५२ |
| श्री क्षत्रियकुण्डाधिपति वर्द्धमानस्वामिस्तुत्यष्टकम् | श्रेय:पदहेवाकी | ५२ |
| दीक्षाधर्मो विजयतेतराम् | परम: | ५३ |
| **खण्ड : ४ मधुरं मधुरं मधुराधिपते: सर्वं मधुरम्....** | | |
| चैतन्यप्रवाह: (विभावदशाया वैलक्षण्यम्) | श्रेय: सरित् | ५५ |
| सुन्दरं सुन्दरं सुन्दरम्...(भकारस्य भव्यता) | श्रेय:पद्म: | ५७ |
| अर्थोपनिषद् (संयम:) | श्रेय: पुण्य: | ५८ |
| वैविध्यम् (संतोषी नर: सदा सुखी) | श्रेय: सेतु: | ५९ |
| काव्यकौतुकम् | श्रेय: सद्मा | ६० |
| रहस्यास्वाद: (स्त्रीणां चतुर्नवति स्वरूपविशेषता:) | श्रेय: सखा | ६१ |
| नवं नवं सौन्दर्यम्(नीतिशास्त्रज्ञै: प्रदर्शितानि षोडशदु:खानि) | श्रेयोदर्शी | ६२ |
| परमपदपन्था: (दु:खितावस्थायामपि सुखावाप्ति:) | श्रेय: पथिक: | ६३ |
| चिन्तनम् (त्रिभि: साफल्यं लभेम...) | श्रेय: पाथेय: | ६४ |
| जैनं जयति शासनम् (दीक्षा-सत्यशिक्षा) | श्रेय:पथ: | ६५ |
| आत्मैश्वर्योपाय: (धर्मात् सद्बुद्धिर्भवेत्) | श्रेयस्कर: | ६६ |
| शुद्धं सिद्धिप्रदं सुखावहं शुभावहम्...(विद्यानां मुखं कै: कै र्न मुम्बितम्) | श्रेय:श्री: | ६७ |
| साम्प्रतम् (त्रिविधं ज्ञानं प्रशस्यते) | श्रेयोमति: | ६८ |
| वादों न वितण्डावाड: (सन्मेधाप्राकट्यम्) | श्रेय: कान्त: | ६९ |

विभागः-१

प्राचीनकृतयः

# पूर्वमहर्षीणां वचनामृतम्..

गृह्णन्तु....

अनुगृह्णन्तु

ऋषीणां सद्वचनानि

भोः! भोः! भव्यजनाः!

स्वानुभवास्वादपरमपवित्रीकृतचित्तानां, कर्माजीर्णसमुत्थतृष्णाविवर्धक भावरागज्वरनाशकवैराग्यसदौषधी-नांकृतपरमकल्याणसौहार्दसौजन्यताद्यनेक सद्गुणसौभाग्यसारथीनां स्वपरोभयोपकार करणैकलीनतानामपारदुःखधूलि भृद्दीर्घदोषतस्क- रमुक्तानां विषमकरालविषया विषयानां ज्ञानच्छायाविहीनानां भवपान्थतारणैकव्यग्रभावचक्षुषां सद्गुरुवरवचना नामाचमनं भवनिस्तारकं भविष्यतीति तद्वचसां सम्मुखं भूत्वा स्मरण-चिन्तन-मनन-निदिध्यासनैः स्वयं भवार्णवं तीर्त्वा शिवं प्राप्नुयात्।

-परमः-

श्रीजिनवल्लभसूरिकृते

# द्वे चरित्रस्तोत्रे

||श्रीनाभेयचरितस्तोत्रम्||

आचार्यश्रीविजयतीर्थभद्रसूरिः

नमिय जिणमुसभमुभयंसदेसविलसंतकसिणकेसवयं।
मुहससिजोण्हातण्हारसभमिरचकोर जुयलं च॥१॥

असुरिंद नरिंदविंद वंदिय-थुयस्स तस्सेव।
थोयारहियकरं किर सुचरियकित्तणं काहं॥२॥

धणभव-मुणिंदाण-फलेण भविय उत्तरकुरुसु मिहुणनरो।
सोहम्मसुरो तो इह महाबलोऽवरविदेहे तं॥३॥

संबुज्झिय ईसाणे ललियंगसुरो सिरिप्पहविमाणे।
संजाओ सिवओ पुण पुव्वविदेहे वइरजंघो॥४॥

उत्तरकुरु मिहुणनरो सोहम्म सुरोह बारसम विजए।
बिज्जसुओचक्किसिरिं साहु तिगिच्छाए संचिणिय॥५॥

जाओ तमच्चुयसुरो अट्ठमविजये य भविय चक्कहरो।
वीसंठाणे सेविय निबंधियं तित्थयरनामं॥६॥

सव्वट्ठसुरवरसिरिं तित्तीसयरेणुभविय अवयरिओ।
इक्खागुभूमिए तुम आसाढे पढम चउत्थीए॥७॥

मरुदेवि-नाभिनंदण तिनाणलोयणमिहागयं सहसा।
चउदसवरसुमिणत्तंपि तं निवेइंसुसयलिंदा॥८॥

वसहंककणयवण्णो कासवगोत्तकय तिहुयणो जो उ।
कसिणट्ठमाए चित्ते घणुंमि रासिंमि तं जाऊं॥९॥

अह चलियासण छप्पन्न दिसिकुमारि कयसूइकायव्वो।
तुमं मेरुगिरिंमि सुहम्मसामिणा लहु सयं नीओ॥१०॥

तो भत्तिब्भरनिब्भरमब्भुयं भूओ भवंत भावेहिं।
सव्वड्ढिवट्टयायरमेहिं? सित्तोखिलसुरिंदेहिं॥११॥

सक्ककरकलियमिक्खुबालं ते दधु भिलसंतेणं।
इक्खागुवंसबीयं जए पणीयंतए चेव॥१२॥

वीसं कुमारभावे रज्जे तेवट्ठि पुव्वलक्खे तं।
सुरविहियाहारविही अच्छीअदरसिय कलासिप्पो॥१३॥

जीयं ति य लोयंतियविबोहिओ वरिसदिणवरदाणो।
सिबियासुदंसणाए छट्ठेणं देवदूसंधरो॥१४॥

सिद्धत्थवणे तमसोगतरुअहे चउहिं निवसहस्सेहिं।
सह चित्ते बहुलट्ठमि अवरण्हे जिण विणिक्खंतो॥१५॥

सेयंसेण गयउरे इक्खुरसेण वरिसे तुमं पढमं।
पाराविय पावियमिहं महाफलं सुमुणिवरदाणं॥१६॥

पंचधणुसयए माणे चिउनाणो तुममसंगमोणेण।
बहुदेसे सुविहरिओ वाससहस्सं निरुवसग्गं॥१७॥

तुह पुरिमतालपुरिसगडमुहवणे अट्ठमेण वडहिट्ठे।
फग्गुणकसिणिक्कारसि पुव्वण्हे केवलं जायं॥१८॥

अह चुलसीईसहस्से साहुणं साहुणीण लक्खतिगं।
तं सिवमग्गमकासि चुलसीइ गणे गणहरे य॥१९॥

पंच सहस्सब्भहियं लक्ख तिगं भावसावयाण तुमं।
चउप्पण्ण सहस्स जुआ लक्खा पंचेव सड्ढीणं॥२०॥

चउदसपुव्वि सहस्साए उणा पंचनव ओहिनाणीणं।
केवलि जिणाण वीसं ते छसय जुया विउव्वीणं॥२१॥

बारस सहस्सा छ सया सट्ठा? वाई य विउलमइणो य।
बावीस सहस्साणुत्तरोववाई नवसयाय॥२२॥

सामन्नं पालिय पुव्वलक्खमक्खिय महव्वए पंच।
चक्कहरभरहवंदिय चउकल्लाणुत्तरासाढा ॥२३॥

पल्लंकठिओ अट्ठावए समं दसहिं साहुसहस्सेहिं।
तं माहकसिणतेरसि पुव्वण्हे भीईरक्खंमि॥२४॥

चउदसमेण सिवसुहं संपत्तोसि जिणवल्लह मुणीण।
मह कुरु दयं हरभयं देहि मयं नेहि परमपथं॥२५॥

## श्रीशान्तिनाथचरित्रस्तोत्रम्॥

अपडिहयधम्मचक्केण फारफुडफुरियनाणरयणेण।
जेण सयलं पि भरहं पसाहियं साहियं चइयं॥१॥

तं पणमिय सोलसमं तित्थयरं पंचमं च चक्कहरं।
तस्सेव किंचि सुचरियं कण्णगुणणं किल करिस्सामि॥२॥

इह भरहे रयणपुरे राया तुममासि देवसिरिसेणो।
तो इह कुरुसु मणुओ सुयवसणविरागिओ जाओ॥३॥

होउं सोहम्मसुरो वेयड्ढे तं अहेसि खयरिंदो।
अमियगुण अमियते उ रहने उर चक्कवालपुरे॥४॥

छव्वीस दिणे आउं जाणिय पव्वइ य पाणयसुरद्धिं।
वीसयर भुंजिय जंबुदीवरमणिज्ज विजयंमि॥५॥

पुरिये सुभाए अपराजिउ त्ति तं हलहरो जिण अहेसि।
पडिपज्जिय पव्वज्जं तो पत्तो अच्चुयिंदत्तं॥६॥

चवियमिह मंगलावइविजए तं रयणसंचयपुरंमि।
खेमंकरनिवइसुनु अहेसि वज्जाउहो राया॥७॥

इंद धुय चरिय चरणं चिरमुप्पनोसि नवमगेविज्जे।
अह जंबुदीव अट्ठमविजए पुंडरिगिणिपुरिए॥८॥

धणरह तित्थयर सुनु। मेहरहनिवोहो भविन्नुपिय।
पासे पावीय चरणं अंचणिय तित्थयर चक्कहरलच्छिं॥९॥

उप्पण्णो परमाउ सव्वट्ठे तदणु हत्थिणागपुरे।
सिरि वीससेण-पणइणि-अइरादेवीए कुच्छिंसि॥१०॥

चउदससुमिणपिसुणीओ मासे भरणिकयपंचकल्लाणो।
भद्दवयकसिणसत्तम्मिनिसाए तं नाह अवइण्णो॥११॥

अवयरिए तं पियरो समिच्च इंदेण सलहिया महिया।
माया सि गूढगब्भा गिहं व फुड बहुविहनिहाणं॥१२॥

तो जिट्ठकसिणतेरसिरत्तीए कणयवन्नहरिणंको।
कासवगुत्ते जाओ चालीस धणूसियसरीरो॥१३॥

अहज्ज त्ति जगुज्जोए जाह चलियासणा कारं महिमं।
छप्पन्न दिसि कुमरिओ तदणु चउसट्ठि सुरवइणो॥१४॥

गब्भगए चेव तए असिवोवसमो जओ जए जाओ।
सुमरणमित्तेण वि कुणसि संतिमिय नाम ते संती॥१५॥

जक्ख सहस्सा सोलस तद्दुगुणा मउडबद्ध नरवइणो।
तद्दुगुणा रमणिओ आणाणुगया तुह अहेसि॥१८॥

छण्णवई कोडीओ पाइक्काण तह पवरगामाणं।
हय-गय-रहाण लक्खा पत्तेयं तुज्झ चुलसीई॥१९॥

बत्तीस बद्ध नाडय बत्तीस सहस्स अभिणइज्जंतो।
तावई य जणवयपहु अकासि नासियभयं भरहं॥२०॥

कमसो चउदस सोलस वीसा बावत्तरी य नवनवई।
संवाह खेडगागर पुरवर दोणमुहसहरसा ते॥२१॥

आसी तुह पत्तेयं मडंब-कुच्छड सहस्स चउवीसा।
दुगुणाणि पट्टणाणि य चउदस रयणेसर! जिणेस!॥२२॥

छप्पणं मंतरो दगकुरुज्जमेगुणवन्नमन्नं च।
बहबिहुच्छंदुछड्डिय चक्कसिरिं निवसहस्सजुओ॥२३॥

चरमवए जिट्ठासियचउदसि अवरण्हि तं सि निक्खंतो।
सहसंबवणे छट्ठेण लद्ध सव्वसबियाए?॥२४॥

सज्जो संजायचउत्थनाण! तुह मंदीरे पुरे भमओ।
बियदिणे परमन्नं पारणमासी सुमित्तघरे॥२५॥

वरिसगयंमि छट्ठेण तुज्झ पोससियनवमिपुव्वण्हे।
सहसंबवणे केवल समुप्पन्नं नंदिरुक्खतले॥२६॥

तक्खणखुभियाखिलसुरनिकायकयपढमसमवसरणे।
ठिओ बत्तीस गुणधरे गणहरे गणे कासी बत्तीसं॥२७॥

साहु सहस्सा बिसट्ठी चउसय हीणा य साहुणीणं ते।
समणोवासग लक्खा दोच्चियनवइसहस्सजुया॥२८॥

तिनवई सहस्सहिया लक्खा तिन्नेव देवसड्ढीणं।
चउदस पुव्वीण सयाणि अट्ठवाईणि तिगुणाणि ॥२९॥

मणनाणि सहस्सा चउरो ते तिसय जुआ केवलिजिणाणं।
ओहिनाणी सहस्सा। तिन्निविउव्वीण ते दुगुणा॥३०॥

तुह तित्थे विग्घहरा गरुडो जक्खो सुरी य कंदप्पा।
चउजाम धम्मदेसग अमरिंदनरिंदबिंदनया॥३१॥

सव्वाउ वास लक्खं पालिय खालिय समत्त कम्ममलं।
मासियभत्तेण सएहिं नवहिं साहुण परिअरिओ॥३२॥

बहुलाए तेरसीह जिट्ठे साम्मेय पव्वए सामि।
सासय सुक्खं मुक्खं गय जिणवल्लह पंचदेसु॥३३॥

॥इति श्रीशान्तिनाथस्तोत्रचरितम्॥

श्रीजिनप्रभसूरिविरचितं

मुनिश्रीचन्द्रोदयविजयकृद्विवृत्तिसमलङ्कृतं

# ॥श्रीचतुर्विंशतिजिनस्तवनम्॥

प्रेषकः पंन्यासश्रीधर्मतिलकविजयो गणी

**निःसीम! सूरतनय! स्थितिमार्गदर्शिन्!**
**निर्माहि शर्म सुदृशां प्रिय! मुक्तिदार!।**
**निर्मृष्टगारुडरुचे! निगृहीतमोह!**
**मल्लेश! मोदितमहाशय! सुव्रतेन! ॥५॥** (वसन्ततिलका)

**अन्वयः—** स्थितिमार्गदर्शिन्! सुदृशां प्रिय! मुक्तिद! निगृहीतमोह! मोदितमहाशय! इन! सूरतनय! अर! मल्लेश! निमृष्टगारुडरुचे! सुव्रत! निःसीमशर्म निर्माहि॥५॥

**विवृत्तिः— स्थितिमार्गदर्शिन्!** = विधिनिषेधादिमर्यादापथप्रदर्शक! **सुदृशाम्** = सम्यग्दृष्टीनां भव्यानाम्-**प्रिय!** = प्रीतिविषय! यद्वा सुदृशामित्यस्य शर्मेत्यनेनान्वयः। **मुक्तिद!** = मोक्षदायक! प्रवचनादिना मोक्षमार्गप्रदर्शनेन कृत्वेति भावः। **निगृहीतमोह!** = परित्यक्तदारागारादिममत्वबुद्धे! वीतरागत्वादिति भावः। "अनित्यधनदेहादौ नित्यत्वेन ममेति च। अज्ञानेनाऽऽवृता बुद्धिर्मोह इत्यभिधीयते।" इति योगशास्त्रे। **मोदितमहाशय!** = हर्षितोदारचेतः! यद्वा मोदित! इति महाशय! इति च पृथक्पदम्! तथा च **मोदित!** = ज्ञानादिना प्राप्तनित्यानन्द! महाशय! = उदारचेतः!। **इन!** = ईश!। "ईशितेनोनायकश्चे"त्यभि. ३, २३। **सूरतनय!** = सूराख्यनृपपुत्र! गर्भस्थेऽस्मिन् जननी रत्नानां कुन्थुराशिं दृष्टवतीति कुन्थुनाथेत्याख्य इत्यर्थः। **अर!** = तदाख्यतीर्थकर! गर्भस्थेऽस्मिन् जनन्या स्वप्ने सर्वरत्नमयोऽरो दृष्ट इति तदाख्येति भावः। **मुक्तिदा**रेत्येकपदत्वेन व्याख्याने च, मुक्तिः स्ववशत्वाद्दारेव यस्य स तादृशः। प्रियमुक्तिदारेत्येवमेकपदत्वेन व्याख्याने च प्रिया चतुर्थपुरुषार्थत्वेनेष्टा मुक्तिः सकलकर्मक्षयः स्ववशत्वाद्दारेव यस्य स तादृशः प्रियमुक्तिभार्यः! इत्यर्थः। **मल्लेश!** = मल्लिनाथ! गर्भस्थेऽस्मिन् मातुः सुरभिकुसुममाल्यशयनीयदोहदो देवताभिः पूरित इति मल्लिः, तथा परिषहादिमल्लजयान्मल्लिः, स चासौ नाथश्च स मल्लिनाथेत्याख्यतीर्थङ्कर!। **निर्मृष्टगारुडरुचे!** = संस्कृतमरकतकान्ते! श्यामवर्णप्रभ! इत्यर्थः। **"गारुत्मतं मरकतमश्मगर्भो हरिन्मणिरि"**त्यमरः। **सुव्रत!** = तदाख्यतीर्थङ्कर!, शोभनाऽहिंसादिव्रतशालिन्निति चार्थः। सुव्रतेनेत्येकपदत्वेन व्याख्याने तु सुव्रताऽऽख्यस्वामिन्। स्वयं पाल्यमानत्वादुपदेशकत्वाच्च शोभनाऽहिंसादिव्रतस्वामिन्निति चार्थः। **निःसीम** = निरवधि। **शर्म** = कल्याणम्। **निर्माहि** = कुरुष्व॥५॥

**समस्तपदविग्रहः— स्थितिमार्गदर्शिन्!** = स्थितेर्मार्गः, तं दर्शयतीत्येवंशीलः स्थितिमार्गदर्शी तत्सम्बोधने। **सुदृशाम्** = सु समिचीना दृग्येषां ते सुदृशः, तेषाम्। **मुक्तिद!** = मुक्तिं ददातीति स, तत्सम्बोधने। मुक्तिदारेति व्याख्याने च, मुक्तिः दारा इव दारा यस्य स तत्सम्बोधने। प्रियमुक्तिदारेत्येवं सम्बोधने तु- प्रिया मुक्तिरेव दारा यस्य स तादृशस्तत्सम्बोधने। **निगृहीतमोह!** = निगृहीतो मोहो येन स तादृशस्तत्सम्बोधने।**मोदितमहाशय!** = मोदितो महाशयो

येन स तादृशस्तत्सम्बोधने। **सूरतनय!** = सूरस्य तनयः, तत्सम्बोधने। **मल्लेश!** = मल्लश्चासौ ईशश्च, तत्सम्बोधने। **निर्मृष्टगारुडरुचे!** = निर्मृष्टश्चासौ गारुडश्च; निमृष्टगारुडः, तस्य रुचिरिव रुचिर्यस्य स तादृशस्तत्सम्बोधने। **सुव्रत!**= सुशोभनानि व्रतानि यस्य स तादृशस्तत्सम्बोधने। सुव्रतेनेत्येवं सम्बोधने तु सुव्रतश्चासाविनश्च, तत्सम्बोधने। **निःसीम**= सीम्नो निष्क्रान्तं निःसीम, तत्॥५॥

**अघो! नमीनाङ्कनिरासदक्ष! सम्प्रीणिताऽशेष! समुद्र! नेमे!।**
**शान्तार! वामेय! गुणाभिराम श्रीवर्धमानैधि सुखश्रिये नः॥६॥** [उपजातिः]

**अन्वयः—** अघो! अङ्कनिरासदक्ष! सम्प्रीणिताशेष! समुद्र! गुणाभिराम! शान्तार! नमीन! नेमे! वामेय! श्रीवर्धमान! नः सुखश्रिये एधि॥६॥

**विवृत्तिः— अघो!** = अघोस् इति सम्बोधनार्थमव्ययम्। **अङ्कनिरासदक्ष!** = दोषदूरीकरणसमर्थ!। **सम्प्रीणिताशेष!** = सद्धर्मोपदेशादिना हर्षितसमस्तलोक!। **समुद्र!** = वृषभादिलाञ्छनलाञ्छित! अपरिग्रहादिमुनिवेषादियुक्त! कायोत्सर्गलक्षणमुद्रायुक्त! इति वार्थः। **गुणाभिराम!** = दयादिभिः प्रसिद्धैः पञ्चत्रिंशत्सङ्ख्यकैर्वाग्गुणैः, चतुस्त्रिंशदतिशयैश्च मनोज्ञ!। **शान्तार!** = मुक्तत्वादुपरताऽवसर्पिण्युत्सर्पिणीकालचक्र विवर्तनैकान्तसुषमादिद्वादशविधकाल कृतोपाधे!, कालातीत! इत्यर्थः। यद्वा **शान्त!** = शमाश्रय! **अर!** = तदाख्यतीर्थङ्कर इत्यर्थः। **नमीन!** = नमिनाथ! गर्भस्थेऽस्मिन् परचक्रनृपैरपि प्रणतिः कृतेति नमिः, स चासाविनश्चेति भावः, तदाख्यतीर्थङ्कर! इत्यर्थः। अघोनमीनेत्यत्र "अवर्ण" (१।३।२२।सि.है.) इत्यादिना सन्धिः। यद्वा-**अघोन!** मीनाङ्कनिरासदक्ष! इत्येवं पदरचना, तथा च **अघोन!** = पापरहित! निर्मलेत्यर्थः। असत्यादिरूपदुरितहेतुसम्पर्कशून्येति यावत् । **"कलुषं वृजिनैनोऽघमंहोदुरितदुष्कृतमि**त्यमरः। **मीनाङ्कनिरासदक्ष !** = कामदूरीकरणकुशल! ब्रह्मचर्यव्रतधारित्वादिति भावः। **नेमे!** = तदाख्यतीर्थङ्कर! धर्मचक्रस्य नेमिवन्नेमे! धर्मचक्रप्रधितुल्येत्यर्थः। **वामेय!** = वामानामराज्ञीपुत्र! श्रीपार्श्वनाथेत्यर्थः। **श्रीवर्धमान!** = श्रीमन्महावीर! नः = स्तुवतामस्माकं जनानाम्। **सुखश्रिये** = सुखसम्पदे, **"शोभासम्पत्तिपद्मासु लक्ष्मीः श्रीरिवदृश्यते"** इत्यमरः। **एधि** = भव॥६॥

**समस्तपदविग्रहः— नमीन!** = नमिश्चासाविनश्च स तत्सम्बोधने। **अङ्कनिरासदक्ष!** = अङ्कस्य निरासस्तत्र दक्षः, तत्सम्बोधने। पक्षान्तरे, **अघोन!** = अघैरूनः, तत्सम्बोधने। **मीनाङ्कनिरासदक्ष!** = मीनोऽङ्को यस्य स मीनाङ्कः, तस्य निरासस्तत्र दक्षः, तदामन्त्रणे। **सम्प्रीणिताऽशेष!** = सम्प्रीणिता अशेषा येन स तादृशः, तत्सम्बोधने। **समुद्र!** = मुद्रया सह वर्तते इति समुद्रस्तदामन्त्रणे। **गुणाभिराम!** = गुणैरभिरामः तत्सम्बोधने । **शान्तार!** = शान्ता अरा यस्य स तादृशस्तत्सम्बोधने। **वामेय!** वामाया अपत्यं पुमान् वामेयः, तदामन्त्रणे। **श्रीवर्धमान!** = वर्धतामिति वर्धमानः, कर्तर्याशिषि सञ्ज्ञायामानश्। श्रियायुक्तो वर्धमानः, तत्सम्बोधने। **सुखश्रिये** = सुखस्य श्रीस्तस्यै॥६॥

# ॥श्रीविजयानन्दद्वात्रिंशिका॥

रचनाकारः- चतुरविजयो मुनिः

श्रेयःश्रीमयमग्र्यमङ्गमभयं सत्कृत्यपेटीमयं
विश्वानन्दमयं लोसद्रसमयं वैराग्यलीलामयम्।
सर्वं यस्य नु जीवनं स्तुतिमयं नो पङ्कशङ्कामयं
**कल्याणं वितनोतु वः स विजयानन्दाभिधः सुरिराट्॥१॥**

स्वस्तिश्रीनिलये समृद्धिसदने सल्लोकवासस्थले
देशे पञ्चनदेऽमले च लहराग्रामेऽभिरामे श्रिया।
यः प्राच्यां दिशि वासरेश्वर इव प्रादुर्बभूवाऽघहा
**कल्याणं वितनोतु वः स विजयानन्दाभिधःसूरिराट् ॥२॥**

तातो यस्य गणेशचन्द्र इति यो वन्द्यो सदा क्षत्रियान्
माता रत्नखनिर्बभूव सुभगा श्रीरूपदेवी प्रसूः।
सच्चेता गुरुदत्तसिंह इति च ज्यायान् गुणी बान्धवः
**कल्याणं वितनोतु वः स विजयानन्दाभिधः सूरिराट्॥३॥**

श्रीमद्विक्रमवत्सरेऽनलनवाष्टैणाङ्कसङ्ख्ये शुभे
चैत्रे मासि सिते दले सुरगुरोर्वारि तिथौ पक्षतौ।
सश्रीकोऽवततार यो हरिरिवापायाज्जनान् रक्षितुं
**कल्याणं वितनोतु वः स विजयानन्दाभिधः सूरिराट्॥४॥**

लग्ने यस्य च कुम्भराशिरमला भानु-ज्ञ-शुक्रस्थिति-
र्वित्ते राहु-निशाचरौ सहजगौ षष्ठे गुरु-क्षोणिघौ।
धर्मे केतु-शनैश्चरौ तु वणिजि स्फूर्जद्बलौ संस्थितौ
**कल्याणं वितनोतु वः स विजयानन्दाभिधः सूरिराट्॥५॥**

सम्प्राप्ते दशमेऽह्नि जन्मसमयाद् यस्य व्यतीताशुचौ
सानन्दं समहोत्सवं परिजनं सन्तोष्य भोज्यादिभिः।
आत्माराम इति प्रमोदबहुलं स्नातोऽभिधां तेनिवान्
**कल्याणं वितनोतु वः स विजयानन्दाभिधः सूरिराट्॥६॥**

संसर्गं समवाप्य ढुण्ढकमते दीक्षां गृहाणाशयो(?)
यः कक्षीकुरुते स्म खेन्दुनवभूवर्षे शुभे वैक्रमे।
आज्ञां मातुरवाप्य च स्वजनके गत्यन्तरं संश्रिते
**कल्याणं वितनोतु वः स विजयानन्दाभिधः सूरिराट्॥७॥**

योऽधीते स्म शतत्रयं मतिमतामग्र्यः प्रयासं विना
श्लोकानां प्रतिवासरं जप-तपो-ध्यानादिलीनोऽपि वै।
दृष्टं विस्मरते च नो सकृदपि प्रायेण सूत्रादिकं
**कल्याणं वितनोतु वः स विजयानन्दाभिधः सूरिराट्॥८॥**

द्वात्रिंशद्धिषणाधरीकृतकविर्योऽधीत्य सूत्राणि तत्-
शङ्काशीलमनाश्च लुम्पकमतं मत्वा मनःकल्पितम्।
अत्याक्षीद् रद-नन्द-शीतगुमिते संवत्सरेऽमत्सरी
**कल्याणं वितनोतु वः स विजयानन्दाभिधः सूरिराट्॥९॥**

येनोत्सूत्रवचःप्ररूपणरतश्चैकान्तपक्षाग्रही
विख्यातो भुवि शान्तिसागर इति त्यक्तव्रतो लिङ्गभाक्।
चर्चायां निरकोट्टि राजनगरे स्याद्वादविद्याविदः
**कल्याणं वितनोतु वः स विजयानन्दाभिधः सूरिराट्॥१०॥**

तत्रैवोदितपुण्यढौकितमिवानेकान्तमार्गाग्रणी
स्फूर्जत्सद्गुणिनं च बुद्धिविजयं सम्प्राप्य यः सद्गुरुम्।
हित्वा ढूण्ढकपन्थमुत्तममतिः संवित्सुदीक्षामधात्
**कल्याणं वितनोतु वः स विजयानन्दाभिधः सूरिराट्॥११॥**

चन्द्रः षोडशभिः कलाभिरिव यो युक्तोऽनगारैर्महो-
भृद्भिर्लुम्पकपन्थवार्दलदकप्रच्छादनत्यागतः
अत्यन्तं तपगच्छतारकपथेऽदीपिष्ट शिष्टाग्रणीः
**कल्याणं वितनोतु वः स विजयानन्दाभिधः सूरिराट्॥१२॥**

चत्वारोऽमलसंयमर्द्धिललिता वर्या गुरुभ्रातरः
पार्थस्येव चतुर्दिगन्तविजयप्राप्तावदाता बभुः।
युक्ताः शिष्यगणेन मुक्तिविजयाद्या यस्य पात्रं धियां
**कल्याणं वितनोतु वः स विजयानन्दाभिधः सूरिराट्॥१३॥**

योगानन्दसरस्वतीति विदितो वेदान्तविद् योगिराट्
ग्रन्थौ वीक्ष्य दिगब्धिनन्दवसुधावर्षे च यन्निर्मितौ।
श्रद्धाशुद्धिमवाप्य पत्रमलिखद् यं पूज्यभावान् मुदा
**कल्याणं वितनोतु वः स विजयानन्दाभिधः सूरिराट्॥१४॥**

ग्रन्थाद् हुक्ममुनेश्चतुर्दश महाप्रश्नानि निष्कास्य
र्णा?च्योत्सूत्रमयानि तानि सुरतद्रङ्गे प्रबोध्याङ्गिनः।
वर्षे नेत्रयुगाङ्कशीतसुमिते योऽदीदिपच्छासनं
**कल्याणं वितनोतु वः स विजयानन्दाभिधः सूरिराट्॥१५॥**

वर्षे विक्रमतोऽग्निवेदनिधिभूसङ्ख्ये सुयोगान्विते
पञ्चम्या दिवसे वरे मृगशिरोमासे दले श्यामले।
सङ्घोऽयं प्रददौ च सूरिपदवीं श्रीपादलिप्ते पुरे
**कल्याणं वितनोतु वः स विजयानन्दाभिधः सूरिराट्॥१६॥**

पूषेवोदयशैलशृङ्गमनघं श्रीवीरतीर्थेशितु-
र्यो द्वासप्ततिसङ्ख्यकं क्रमगतं पट्टं समालम्ब्य च।
सच्चक्राय मुदं स्म राति भगवान् गोभिः पुनानो जगत्
**कल्याणं वितनोतु वः स विजयानन्दाभिधः सूरिराट्॥१७॥**

# ॥उपदेशरत्नकोशः॥

(बालावबोधसहितः)

कमलदर्शनविजयोमुनिः

उवएस-रयण-कोसं
नासिअ-नीसेस-लोअ-दोगच्चं।
उवएसरयणमालं वुच्छं
नमिऊण वीरजिणं॥१॥
जीवदयाई रमिज्जइ
इंदिअ-वग्गो दमिज्जइ सयावि।
सच्चं चेव चविज्जइ
धम्मस्स रहस्समिणमेव॥२॥
सीलं न हु खंडिज्जइ न
संवसिज्जइ समं कुसीलेहिं।
गुरु-वयणं न खलिज्जइ
जइ नज्जइ धम्म-परमत्थो॥३॥
चवलं न चंकमिज्जइ
विरज्जइ नेव उब्भडो वेसो।
वंकं न पलोइज्जइ रुट्ठावि
भणंति किं पिसुणो॥४॥
निअमिज्जइ निअ-जीह अविआरिअ
नेव किज्जए कज्जं।
न कुलक्कमो अ लुप्पइ कुविओ
किं कुणइ कलिकालो॥५॥
मम्मं न उल्लविज्जइ कस्स वि
आलं न दिज्जइ कयावि।
कोवि न अक्कोसिज्जइ
सज्जण-मग्गो इमो दुग्गो॥६॥
सव्वस्स उवयरिज्जइ न
पम्हसिज्जइ परस्स उवयारो।
विहलं अवलंबिज्जइ
उवएसो एस विओसाणं॥७॥
कोवि न अब्भच्छज्जइ कस्स
वि किज्जइ न पत्थणा-भंगो।
दीणं न य जंपिज्जइ जीवज्जइ
जाव जिअ-लोए॥८॥

अप्पा न पसंसिज्जइ निंदिज्जइ
दुज्जणोवि न कयावि।
बहु बहुसो न हसिज्जइ लब्भइ
गुरुअत्तणं ते तेण॥९॥
रिउणो न वीससिज्जइ
कयावि वंचिज्जए न वीसत्थो।
न कयग्घेहिं हविज्जइ,
एसो उ नयस्स नीसंदो॥१०॥
रज्जिज्जइ सुगुणेसुं बज्जइ
राउ न नेह-बज्झेसु।
किज्जइ पत्त-परिखा(क्खा)
दखा(क्खा)ण इमो उ कस (वट्टो)॥११॥
नाकज्जामाइरज्जइ, अप्पा
पाडिज्जए न वयणिज्जे।
न य साहसं चइज्जइ उब्भिज्जइ
तेण जग हत्थो॥१२॥
वसणे वि नि मुज्झिज्जइ,
मुच्चइ माणं न नाम मरणे वि।
विहवक्खए वि दिज्जइ
वयमसि-धारं खु धीराणं॥१३॥
अइ नेहो न वहिज्जइ, रूसिज्जइ
न य पिये वि पइ-दिअहं।
वरिज्जइ न कली जलंजली
दिज्जइ दुहाणं॥१४॥
न कुसंगेण वसिज्जइ,
बालस्स वि घिप्पए हियं वयणं।
अनयाओ निवट्टिज्जइ न होइ
वयणिज्जया एवं॥१५॥
विहवेवि न मच्चिज्जइ न
विसीइज्जइ असंपयाए वि।
वट्टिज्जइ समभावे न होइ
रणरणय संतावे॥१६॥
वन्निज्जइ मिच्चगुणो न परुखं(क्खं),
न य सुअस्स पच्चखं(क्खं)।
महिलाइ नोभया वि हु न
नस्सए जेण माहप्पं॥१७॥

जंपिज्जइ पिअवयणं किज्जइ
विणउ य दिज्जइ दाणं।
परगुणगहणं किज्जइ
अमूलतमंतं वसीकरणं॥१८॥
पत्थावे जंपिज्जइ सम्माणिज्जइ
खलोवि बहुमज्झे।
नज्जइ स-पर-विससो
सयलत्था तस्स सिज्झंति॥१९॥
मंतंताण न पासे गम्मइ न य
परगिहे अबीओ अ।
पडिवन्नं पालिज्जइ
सुकुलीणत्तं हवइ एवं॥२०॥
भुंजइ भुंजाविज्जइ पुच्छिज्जइ
मणोगयं कहिज्जइ सयं।
दिज्जइ लिज्जइ उचिअं
इच्छिज्जइ जइ थिरं पिम्मं॥२१॥
को वि न अवमंन्निज्जइ न य
गव्विज्जइ गुणेहिं निअएहिं।
न य विम्हओ वहिज्जइ,
बहुरयणा जेणिमा पुहवी॥२२॥
आरंभिज्जइ लहुअं
किज्जइ कज्जं महंतमवि पच्छा।
नत्तक्करिसो किज्जइ
लब्भइ गुरुअत्तरणं तेण॥२३॥
झाइज्जइ परमप्पा,
परो वि अप्प गणिज्जइ समाणो।
किज्जइ न राग-दोसो
च्छिंदिज्जइ तेण संसारो॥२४॥
उवएस-रयण-मालं जो एअं
कुणइ सुट्ठु निअ-कंठे।
सो नर सिव-सुह-लच्छी
वच्छयले रमइ सेच्छाए॥२५॥
इअ पउम जिणेसर-सूरि
जिण-वयण-गुंफ-रमणीयं।
वहउ जणो कंठगयं,
विउलं-उवएस-मालमिणं॥२६॥
॥इत्युपदेशरत्नकोशप्रकरणं समाप्तम्॥

# ॥श्रीचतुर्विंशतिजिनस्तुतिः॥

प्रेषिका **साध्वीजीश्रीक्षमानिधिश्रीः**

**श्रीसुविधिनाथजिननामस्तवनरूपं मूलपद्यमाह—**

**का कामशस्त्रम्? गृहिणः क्व लुब्धाः? कस्मिन् सति स्यात् कुलवृद्धिरुच्चैः?**
**रूपं तदः किं वद टाविभक्तौ? चक्रे जगद्धर्षमयं च केन? ॥१०॥**

अन्वयः—

का कामशस्त्रम्? गृहिणः क्व लुब्धाः? कस्मिन् सति कुलवृद्धिरुच्चैः स्यात्? तदो रूपं टाविभक्तौ किम्? केन जगद्धर्षमयं चक्रे? इत्यन्वयः।

व्याख्याः—

(१) **का कामशस्त्रम्?** का कामदेवस्य शस्त्रम् अस्त्रम्? **'रामा'** रमणी वर्तते।
(२) **गृहिणो** गृहस्थजनाः क्व कुत्र लुब्धाः? कुत्र लुब्धकाः? मासु लक्ष्म्या विषये धनं प्रतीति भावः।
(३) **कस्मिन् सति** गृहे कस्मिन् सति कुलवृद्धिरुच्चैः स्याद् भवेत्? पुत्रस्य प्राप्तिः कुलवृद्धेर्हेतुः।
(४) **तदः** तच्छब्दस्य टाविभक्तौ किं रूपं भवति? तेनेति रूपं भवति।
(५) **केन** जगद्धर्षमयं चक्रे? प्रहर्षितं संसारं चक्रे? रामासुतेन।
(रामाया आदिवर्णः 'रा', 'मासु' इत्यपि आदिवर्णः मा 'सुतेः' आदिवर्ण सु तथा 'तेन' सम्मिल्य **रामासुतेन** भवति।)

अर्थात्—

**रामायाः पुत्रः श्रीसुविधिनाथः** सर्वोत्कृष्टेन वर्तते॥

**श्रीशीतलनाथजिननामस्तवनरूपं मूलपद्यमाह—**

**धर्मो बुधैः किंवदुपार्जनीयः?,**
**किं रूपमाबन्ततदश्च सौ स्यात्?**
**बिन्दुव्रजं कः कुरुते गणेयम्?**
**कः कर्मतापं हरति श्रितानाम्?॥११॥**

अन्वयः—

बुधैर्धर्मः किंवदुपार्जनीयः? किं रूपमाबन्ततदश्च सौ स्यात्? बिन्दुव्रजं गणेयं कः कुरुते? श्रितानां कर्मतापं को हरति? इत्यन्वयः।

व्याख्याः—

(१) बुधैर्विद्वद्भिर्धर्मो दुर्गतिप्रपतप्राणिधारणाद् धर्म उच्यते इति किंवद् = किमिव उपार्जनीयोऽर्जनीयः? श्रीवत्, लक्ष्मीवत्।
(२) किं रूपमाबन्ततदश्च सौ स्यात्? तच्छब्दस्य स्त्रीलिङ्गे किं रूपं भवति? 'सा'।
(३) बिन्दुव्रजमङ्कव्रजं बिन्दुसमूहं कः गणेयं गणनायोग्यं कुरुते करोति? 'अङ्कः' इति।
(४) श्रितानामाश्रितानां कर्मतापं कर्मविपाकं को हरति? हरणं करोति? श्रीवत्-सा अङ्कः = श्रीवत्साङ्कः। श्रीवत्सलाञ्छनयुक्तः प्रभुः 'श्रीशीतलनाथः' सर्वोत्कृष्टेन वर्तते।

विभागः-२
खण्डः- १

# यशोप्रज्ञादर्शनम्

॥अर्वाचीनकृतयः॥

## ॥श्रीयशोविजयवाचकस्तवनम्॥

( तर्जः- सेवो भविआ विमल जिनेश्वर!...)

वन्दे वाचकश्रीयशोविजयं शास्त्रार्थरसझरणं रे...
समाधिसन्तोषवन्मुनिप्रष्ठं समुद्रगंभीरवचनं रे...
वन्दे...

मोक्षमार्गानुकुलवरबुद्धिं ब्रह्मव्रतवरधरणं रे...
शुद्ध-सूक्ष्ममार्गमतिपूतं श्रीयुक्तं यच्चरणं रे...
वन्दे...

शुद्धप्ररूपकसद्गुणनिधिं न्यायसिद्धान्तसमृद्धिं रे...
षड्दर्शनसम्प्राप्तप्रवृत्तिमागमपारगबुद्धिं रे...
वन्दे...

कृतविषयादिकभावविचूर्णसमतारसगुणपूर्णं रे...
सम्यग्दर्शन-भावविस्तीर्णं श्रेयो दद्यात्तूर्णम् रे...
वन्दे...

# ॥परमज्योतिः पञ्चविंशतिका॥

(बालावबोधसहितः)

मूलकाराः – महोपाध्यायश्रीयशोविजयपादाः।
वार्तिककाराः – आचार्यश्रीविजयकल्याणबोधिसूरयः।

इतोऽपि परमज्योतिषः सर्वोत्तमकलारूपत्वसिद्धिरित्याहः —

**यां विना निष्फलाः सर्वाः कला गुणबलाधिकाः।**
**आत्मधामकलामेकां तां वयं समुपास्महे॥१०॥**

धाम = तेजः, आत्मतेजोरूपां परमज्योतिःकलामन्तरेण सङ्गीतादिसर्वकला विफलाः आत्मप्रयोजनं प्रत्यनुपयोगित्वात्। **एतेन** कथं नाम लोके गुणबलाधिकतयाभिमता अपि तास्ताः कला विफलाः स्युः? तत्तद्यशोविभवादितत्फलानामध्यक्षमीक्ष्यमाणत्वादिति **प्रतिविहितम्**, ऐहिकाभिमानिकमात्रफलत्वेन तासां कलानामात्मकल्याणापादनमाश्रित्यात्यन्तमफलत्वात्। अतो नैतत्कलापेक्षयेतरकलासमुपासनं न्याय्यं न्यायविदामित्याशयः।

सर्वातिशयकलाभावमेव परमज्योतिषः स्वानुभवेन समर्थयन्ति—

**निधिभिर्नवभी रत्नैश्चतुर्दशभिरप्यहो!।**
**न तेजश्चक्रिणां यत्स्यात् तदात्माधीनमेव नः॥११॥**

भवति ह्यात्मसन्तृप्ततया निःस्पृहत्वैश्वर्यसम्पन्नानां महात्मनां परमानन्दपरिकरितं तत्तेजः, यत्सुदुर्लभं चक्रिणामपि, अनूदितं च **ज्ञानसारे**—

**भूशय्या भैक्षमशनं जीर्णवासो वनं गृहम्।**
**तथापि निःस्पृहस्याहो चक्रिणोऽप्यधिकं सुखम्॥** इति।

इतरं खलु तदिन्द्रियविषयावाप्त्यवाप्यं सौख्यम्, इतरं तु परमज्योतिःप्रभवम्, पराधीनं ह्यनयोराद्यम्, स्वाधीनं तु द्वितीयम्, शाश्वतं निर्भयं श्रेष्ठं च तत्, अतोऽत्रैव यत्नः श्रेयानिति भावः।

**[क्रमशः]**

# वृत्तं श्रीयशोविजयवाचक पुङ्गवानाम्.......

-पंन्यासश्रीसम्यग्दर्शनविजयो गणी

(परमश्रद्धेयवाचकवर्यानामनुपमं चरितं संस्कृतभाषायामद्यापि कुत्रचिदपि न मिलति, तेषां ग्रन्थाऽभ्याससमुद्भूतवचनानुरक्त्या **'अयस्कान्तेनाऽयोवत्'** तत्सद्गुणगणसमाकृष्टेन मया प्रारब्धोऽयं प्रयासः)

सौभाग्यदेव्या स्वभाविचिन्तां परित्यज्य जैनशासनोद्योतकरणतपनतुल्यं स्वपुत्रं सद्गुरुनयविजयचरणसरोरुहपराग तुल्यकृतः। पुनश्च तस्या हृदयसरोवर आनन्दनीरपूरितोऽभवत्। अथ जशवन्तो जातो यशोविजयो मुनिः। संयमपालने स एकनिष्ठो जातः। गुर्वाज्ञा तेन मन्त्रतुल्या मता। जलधिजलतरङ्गवत् तज्जीवने वैराग्यं समुच्छलति स्म। स पुनः संवेगसरितानिमग्नो जातः। तदा वयसा नव वर्षाण्येवासन्। किन्तु बुद्धि-प्रतिभाभ्यां प्रौढवयतुल्यमुनिवरो भाषते स्म।

अणहिल्लपुरपट्टणे पूर्वनामके पाटणनगरे वैक्रमीय १६८९ तमे वर्षे बालमुनिश्रीयशोविजयेन दीक्षा गृहीता। किञ्चिद्दिनानन्तरं यशोविजयमुनिवराणां पितृभ्राता पद्मसिंहोऽपि दीक्षां ग्रहीतुं समागतो गुरुसमीपे पट्टणनगरे, गुरुणाऽपि पारदर्शिमेधावता योग्यतां निरीक्ष्य प्रव्राजितः सः। अद्यावधिः स संसारीलघुभ्राताऽऽसीत् अथ संयमे च गुरुभ्राताऽभूत्। पुनश्च सोऽपि मुनियशोविजयेन सार्धं संयमैकल्लीनो जातः।

वैक्रमीय-षोडशशततमवर्षादारभ्याऽऽसप्तदशशततमवर्षपर्यन्तेषु पूर्वार्धपञ्चाशतवर्षे जैनशासनसूर्यो मध्याह्नवत् तेजस्वितां प्रसारयति स्म। तत्र तु जगद्गुरुपरमाराध्यपादेषु प्रभावकता हि निमित्तभूताभूता। शुभ्रसदनोपरिजाज्वल्यमानकलशवच्च स्वप्रभावेन सर्वान्नाकर्षयति स्म। किन्त्वपरार्धे जैनेन्द्रशासनस्थ-तेजस्विता-प्रभाव-प्रभावनादिषु घनघोरमेघाच्छादितसूर्यवद् विस्तारिततेजवान् सञ्जातः।

तत्र तु पूर्वार्धे अकबरप्रतिबोधक जगद्गुर्वादिविशेषणवैशिष्ट्यसभरसदाचार-विचार-वचनसामस्त्यशुद्धभावनाभावित योगवृत्तैर्हीरसूरीश्वरश्चिरपरिचितसंयमयोगैर्या जैनशासनप्रभावना कृता सा त्वनिर्वचनीया जाता। तस्मिन् शतवर्षे पूर्वार्धे जगद्गुरुपुण्यप्रभावेन जैनशासनप्रभा-प्रभावसम्पन्ना जाता। पुनश्च तत्र शासने समग्रभारतवर्षे षण्मासावध्यमारीपटहप्रघोषं परिपालनञ्च। ततश्च जैनशासनाराधना-रक्षा-प्रभावनाभिः शासनोन्नतिं कृत्वा दुर्मत्युन्मार्गी घुक-नैकदिवाकरसमा आसन्। भारतवर्षसार्वदिल्लीभौमपत्यकवरराजानं स्वतपोबलैर्यैर्मोहितम्। वाढहिंसक-मूढ-राजानमहिंसकपदारुढकराः सूरिचक्रवर्तीयुगप्रधान-कल्पद्विसहस्राधिकशिष्य-प्रशिष्य-गणनायकहीरसूरीश्वराः शासनोद्योतकाराः समभूताः। तेषु पूज्यपादेषु निर्वाणगतेषु तेषामेव विशालश्रमणसमुदाये सङ्घर्षो जातः। ततश्च विशालश्रमणसमुदायो द्विधा विभाजितः।

यतो जगद्गुरुहीरसूरीश्वराणां पट्टप्रद्योतका गच्छधुराधौरेयाः सवाईहिरलेति बिरुदप्राप्तश्रीसेनसूरीश्वराः सञ्जाताः। ते तु परं प्रभावका गुरुगणधारकाः समभवन्। तत एव जगद्गुरुभिर्जीवनचरमसमये ऊनानगरे दिल्लीनगरादाकारीतास्ते पूज्याः सुरिसार्वभौमविजयसेनसूरीश्वराः। तदा तु सेनसूरीश्वरा दिल्लीनगराद् विहृतवन्तः। किन्तु दैवयोगान्न प्राप्तास्तैर्गुरुवराः। यावत् पट्टणनगरं प्राप्तास्तावतैव ते पूज्या दिवं गताः प्रान्तमिलनं नाभवत्। योग्यशिष्येषु च शासनधुरां प्रत्यपर्णविषये गुरुपार्श्वस्थाम्नायो न प्राप्तः। तत एव लगत्येव पूज्यपादाचार्यप्रवरश्रीसेनसूरीश्वराणां सत्ताकाले एव श्रमणसमुदाये किञ्चित् किञ्चिन्मतभेदः प्रारब्ध आसीत्। यदा तु विजयसेनसूरीश्वराः दिवंगताः तदनन्तरं विवादो वृद्धिंगतः।

तदनन्तरं यदा तु विजयसेनसूरीश्वरपट्टे पूज्यपादाचार्यप्रवरश्रीविजयदेवसूरीश्वराणां स्थापना जाता। तदैवान्यपक्षे विजयानन्दसूरीश्वराणां स्थापना सञ्जाता। इदृशेऽवसरे शुद्धचरण-करणसंयुक्त-भवभीरु-गुरुपरम्परारूपविशालसरिता

द्विपटेन विभक्ता। इत्येवं विशालश्रमणसमुदायस्य विघटनेन जैनशासनसूर्यस्य तेजस्विता घनघोरमेघावच्छेदकावच्छिन्नरूपा जाता। तदा विजयसेनसूरीश्वराणां स्वर्गगमनानन्तरं विशालश्रमणसमूहो विजयदेवसूरीश्वराणां साम्राज्यं स्वीकृत्य स्वधर्माराधनायां तत्परो जातः। तदा तु लक्षसङ्ख्यकश्रावका आसन्।

पूज्यपादाचार्यप्रवरश्रीविजयदेवसूरीश्वरोपरि पूज्यसेनसूरीश्वराणां परमानुग्रहकृपाऽभवत्। तैः षट् लक्षाण्यधिकषट्-त्रिंशत्सहस्राणि शास्त्रश्लोकानि पठितान्यासन्। तत एव ते पुण्यपुरुषा गीतार्थमूर्धन्या सञ्जाताः। पुनस्ते पञ्चविकृतित्यागपूर्वकैकादशद्रव्यैः सदैवैकाशनव्रतधारका आसन्। तेनैव तेषां तपोधर्मप्रभावितेन जहाङ्गीरबादशाहेन 'महातपा' इति समुपाधिर्दापिता।

शासनप्रभावकैस्तन्महापुरुषैर्बहुभूपालाः प्रभाविताः समाकर्षिताः। उदयपुर-मेवाडराजा-जगत्सिंह-जामनगरस्य राजा लाखाजामौ तेषामुपर्यनन्यभक्तिभाजौ सञ्जातौ।

तेषां सौभाग्यपरिपूतनिश्रायां प्रभूतजिनमन्दिरबहुसहस्रजिनप्रतिमा-प्रतिष्ठाञ्जनविधानादि-शासनप्रभावककृत्यानि बहुशो जातानि। तेनैव च तत्कीर्तिः पृथ्वीपटले चतुर्दिक्षु विस्फुरितवान्। तेषां विशालगच्छधोरीधौरेयैर्द्विशतसङ्ख्यामानाः स्वशिष्याः प्रतिबोधयित्वा संयमीकृताः। एकोनषष्ठीसहस्राधिकलक्षाणां श्रावकवर्गाणां साधर्मिकवात्सल्यो येन कृतः स श्रावकोधनकुबेरोऽपि तेषामनन्यभक्तः समभवत्। इत्येवं प्रभावकसूरिधुरन्धरधौर्यविजयदेवसूरयो विजयहीरसूरीश्वररूपेणैव जैनशासनरङ्गमण्डपे शुशोभ।

जगद्गुरुहीरसूरीश्वराणामत्यार्धश्रमणवृन्दाधिनायक-पूज्यपादानन्दसूरीश्वराः सञ्जाताः। इत्येवं वीरशासने एकगच्छे द्वौ नायकौ जातौ। सा तु सर्वप्रथघटना जाता। श्रीवीरशासने नैकगच्छा नैकपन्थास्तदा चलन्ति स्म। विद्वत्तापारगमुनिश्रीनयविजया अपि जैनशासनज्योतिर्धर-महातपाबिरुधारकश्रीविजयदेवसूरीश्वर-निश्रायामेव स्वपरिवाराणां योगक्षेमादयः कृतवन्तः।

[क्रमशः]

विषयकषायाणामाधीनता स आत्मनोऽनादिकालीन रोगस्तन्नाम संसारः।

संसारो नाम पञ्चेन्द्रियविषयाणां पराधीनता,
क्रोधमानमाया-लोभानां च कषायाणामाधीनता॥

# ॥यशोगुर्जरीस्तवनानुवादः॥

-आत्मदर्शनविजयो मुनिः

(श्रुतज्ञानप्रचारकसभाप्रकाशनैर्वैक्रमीय २०७१ तमे वर्षे प्रकाशितगूर्जरसाहित्यसङ्ग्रहपुस्तकस्थमहामहोपाध्यायश्रीयशोविजयगणिभी रचितगूर्जरस्तवनानां संस्कृतगद्यानुवादः क्रमशः प्रकाश्यतेऽत्र)

- १०३) सिद्धान्तस्य श्रवणं तु मम सुरवृक्ष-सुरमणि-सुरघटप्रमुखेभ्योऽप्यतिवेष्टतरं वर्तते। तेनैव मम सर्वमीहितं पूर्यते, न मम सुरवृक्षादिना किमपि कार्यमस्ति॥४॥ (अग्यार-अङ्गसज्झाय, ढाल-१, पत्रम्- ४०८)
- १०४) यथालिः पद्मवनं प्राप्य पिकश्च सहकारं प्राप्य माद्यते तथा श्रोतापि शुद्धबुद्धवक्तारं प्राप्य सकलश्रुतस्य सारं प्राप्नोति॥५॥ शर्करा मधुरा मत्स्यण्डी मधुरामृतं च मधुरं कथ्यन्ते। मम चित्ते तु श्रुतं मुक्त्वा न किमपि मधुरं प्रतिभासते॥६॥ (अग्यार-अङ्गसज्झाय, ढाल-३, पत्रम्- ४११)
- १०५) पारमार्थिकदृष्ट्या जिनवचने न कोऽपि विरोधोऽस्ति। यः कोऽपि विरोधाभासो दृश्यते तत् केवलं मतिमान्द्याद्भवति। यदि वा सद्गुरोर्विरह एव कारणम्। गीतार्थस्तु सर्ववचनेषु गुणग्राहकदृष्ट्याविरोधमेव पश्यति॥४॥ (अग्यार-अङ्गसज्झाय, ढाल-४, पत्रम्- ४१२)
- १०६) यस्य चित्तं यथा यथा श्रुतश्रवणादुल्लसति तथा तथा तस्य श्रोतुर्बहवो गुणा आत्मसाद्भवन्ति। नव्यश्रुतश्रवणे तस्य शरीरं रोमाञ्चितं भवति, तथावद्यान्यपि प्रलीयन्ते॥४॥
- यस्य मनसे जिनवचनान्येव रोचते स एव सत्यव्रती शुचीभूतः। तेन सहैव धर्ममैत्री कार्या यतः सर्वे गुणाः प्राप्यन्ते॥५॥ (अग्यार-अङ्गसज्झाय, ढाल-७, पत्रम्- ४१५)
- १०७) यः श्रुतश्रवणकार्येषु साहाय्यं कुरुते स सर्वाणि मनोवाञ्छितसुखानि प्राप्नोति। यश्चान्तरायं कुरुते स मनुष्यरूपेण पशुरेव वर्तते। (अग्यार-अङ्गसज्झाय, ढाल-७, पत्रम्- ४१५)
- १०८) धर्मस्तु सुवर्णघटसमः कथ्यते। यथा सुवर्णघटभङ्गे सति यद्यपि तस्याकृतिर्न तिष्ठति तथापि तस्य मूल्यं तु लभ्यते एव, एवं धर्मप्रवृत्तिभङ्गेऽपि धर्मिजनस्य धर्मपरिणामः तिष्ठत्येव॥३॥
यस्मिन् धर्मकर्मणि सततं मुक्तिरेव याच्यते तथा पुण्यानुबन्धिपुण्यस्यैव बन्धः प्राप्यते स एव पारमार्थिकदृष्ट्या धर्मः कथ्यते॥४॥ (अग्यार-अङ्गसज्झाय, ढाल-७ पत्रम्- ४१५)

विभाग : २

खण्ड : २

# सूरिरामचन्द्रदीक्षाशताब्दि-भावाञ्जलिः

॥अर्वाचीनकृतयः॥

## ॥श्रीसूरिरामचन्द्रस्तवनम्॥

(तर्ज- समय समय सो वार...)

सूरिरामचन्द्रं भक्त्या वन्दे, समतासरोवरसारं रे...
भव्यचकोराणां विधुवद्यद्, वक्त्रं सद्गुणपारं रे...
सूरि...॥१॥

मैत्री-प्रमोद-कारुण्योपेक्षा-सत्प्रियागणयुक्तं रे...
शम-सन्तोषवरश्रद्धापूर्णं मायाममतामुक्तं रे...
सूरि...॥२॥

सर्वजीवहितमतिसंयुक्तं धृतप्रवचनदक्षत्वं रे...
श्रेयःपरमसम्पल्लाभाय, दर्शनगुणशुक्लत्वं रे...
सूरि...॥३॥

# ॥स्तुतिविंशतिका॥

-आचार्यश्रीविजयतपोरत्नसूरिः

मतिस्फीततादर्शिताज्ञाप्रमाणा
जिनेन्द्रागमाऽबाधितार्थप्रसारा।
अधृष्यास्ति यद्देशना धैर्यसारा
ममैकः शरण्यो गुरू रामचन्द्रः॥१॥

विचारे सतामध्वनां स्मार्तधैर्यात्
प्रचारे सतामध्वनां स्फूर्तिमत्त्वात्।
सुरक्षे सतामध्वनां लब्धलक्ष्यो
ममैकः शरण्यो गुरू रामचन्द्रः॥२॥

पतङ्गोदये या तिथिः सैव मान्या
विमुक्त्यर्थमेवास्ति सद्धर्मसेवा।
प्रघुष्टं वचो यस्य दुर्वाद्यभेद्यं
ममैकः शरण्यो गुरू रामचन्द्रः॥३॥

स्मृतिं नीतिमात्रः सुषड्व्यञ्जनश्च
चतुःस्वारिकश्चिन्तितार्थस्य सिद्धिम्।
ददात्येव यन्नाममन्त्रोऽचिरात्स
ममैकः शरण्यो गुरू रामचन्द्रः॥४॥

सुमार्गाच्च्युताः केवलं पादमात्रं
समृद्धा महाशक्तिवन्तोऽपि नैव।
यदीये हृदि स्थानमाप्तुं समर्था
ममैकः शरण्यो गुरू रामचन्द्रः॥५॥

मनः शून्यताऽश्रीत्वदौर्भाग्यरोगैर
धैर्याज्ञतामुग्धताकौतुकैश्च।
यदर्चाप्रियो वीक्ष्यते नो कदापि
ममैकः शरण्यो गुरू रामचन्द्रः॥६॥

असत्स्वात्मदोषेष्ववर्णं वदन्तोऽधिका
नुग्रहाऽमत्रतां यत्कृपालोः।
भजन्ते स्तवैरद्भुतैर्नावलिप्तो
ममैकः शरण्यो गुरू रामचन्द्रः॥७॥

विदग्धासु भक्तिप्रणीताञ्जलीषु
सुलावण्यपुण्यासु सौभाग्यदासु।
विकारं य आपन्न शीलप्रभावान्
ममैकः शरण्यो गुरू रामचन्द्रः॥८॥

समस्ताधिसन्तापदुःखापहारि
प्रसन्नीकरं निर्विकारीकरं च।
स्मितं यस्य रुष्टानपि प्रीणयत्स
ममैकः शरण्यो गुरू रामचन्द्रः॥९॥

अनिष्टेष्टसंयोगनाशैर्दयार्हं
जगद्भोगरोगैर्भृशं पीड्यमानम्।
गिरा योऽस्ति जैन्योद्दिधीर्षन् कृपालु
र्ममैकः शरण्यो गुरू रामचन्द्रः॥१०॥

(क्रमशः)

# ॥परिनिर्वाणम्॥

-आचार्यश्रीविजयमोक्षरतिसूरिः

जाने पुर्याः समवसरणस्थं बहिः शालिभद्रं
श्रुत्वा नन्तुं त्वरितमनसा मातृवध्वादिना सः।
गेहायातः स्वयमपि[17] यथा केनचिन्नावबुद्ध-
स्तद्वत्सूरीन्दुरपि भविना तत्प्रतीक्षाकुलेन॥२१॥
निर्गत्याऽतः पदशतदलैः शोभयामास रम्यं
धर्म्यं हर्म्यं[18] समतृणमणिस्तत्र तत्कारयित्रा।
सार्द्धं श्राद्धैरथ कतिपयैः श्रीगुरुः स्तूयते स्म
निन्दावाक्यं स्तवनवचसा सम्मतिं मन्यमानः॥२२॥
श्रीरायाता यतिधव! तव स्वागतेनैव सार्द्धं
त्वत्स्पर्शेन स्पृशति पदवीं तीर्थतायाः पुरी स्म।
दृष्टं लोकैः करतलगतं दर्शनेनामृतं ते
चैतन्यं सङ्क्रमितमिह ते सङ्क्रमेणाऽद्य देव!॥२३॥
चित्ताकाशं विगलिततमः स्वान्तकोका अशोकाः
फुल्लोत्फुल्लं कुवलयकुलं[20] गोसु[21] धार्त्रा धरित्री[22]।
आनन्दाब्धिर्गगनतलसंस्पृष्टकल्लोलमालो
भावस्तापस्त्वयि[23] समुदिते रामचन्द्रे गतोऽस्तम्॥२४॥
त्वत्प्राप्तिर्नः फलयति चिरप्रार्थितस्वर्द्रुरीश!
त्वत्प्राप्तिर्नः स्थगयति पदौ पापमार्गे पतन्तौ।
त्वत्प्राप्तिर्नस्त्वरयति महानन्दमाप्तुं[24] महात्म्यँस्!
त्वत्प्राप्तिर्नः कथयति भवाम्भोधितीरं न दूरम्॥२५॥
त्वं नः स्वामी श्रितजिनपतिं त्वां श्रयामस्त्वयास्मच्-
चित्तं नीतं शिवमभि नमस्कुर्महे नैकशस्ते।
लप्स्यामस्त्वत्सुपदपदवीं मङ्क्षु दासास्तव स्मः
प्राणाधार! त्वयि सति विभो! जीवनं जीवनीयम्॥२६॥
त्वं बन्धुस्त्वं प्रियतमजनस्त्वं पिता त्वं च माता
त्वं चक्षुस्त्वं हृदयहृदयं त्वं मतिस्त्वं च तत्त्वम्।
त्वं प्राणास्त्वं करणशरणं त्वं गतिस्त्वं च सत्त्वं
त्वं स्वर्लोकस्त्वममृतपदं त्वं हि देवाधिदेवः॥२७॥

निर्मथ्याऽर्हत्समयमुदधिं यत्सुधीधुर्य! लब्धं
सत्यां सत्यामृतममरतां सत्त्वरं सन्ददानम्।
लिप्सन्तस्तल्लवमतितरां विश्वविश्वोपकार-
सज्ज! स्वामिन्ननुनयममी हार्दवेदिन्! विदध्मः॥२८॥
एवं देवः पुलकितवपुः स्तोतृभिः प्रार्थितः सँल्-
लघ्वीं शब्दैरदिशदलघु देशनां हृद्यभावैः।
धन्यंमन्यः स जननिवहस्तां निपीय स्म याति
देवं बाष्पापिहितनयनैरस्फुटं लोकमानः॥२९॥ कुलकम्॥
सद्धर्मं दुर्गतिपरिपतज्जन्तुजाताय यच्छन्
संरक्षन् स्वं यमिसमुदयं रागरोषादिदोषाद्।
श्रीजैनेन्द्रप्रवचनहितं चिन्तयन्नेकचित्तं
काँश्चिद्घस्त्रानतिगमयति[25] श्रीव्रतीन्द्रः स्म तत्र॥३०॥
कादम्बिन्या दिनमणिरिव त्रासदोषान्मणीव
दम्भारम्भाद् वृषविधिरिव[26] श्रीर्मनोमूर्च्छयेव।
आशालेशादृषिरिव सुधादीधिती राहुणेव
हा! विच्छाया गुरुतनुरभूद् व्याधिनोग्रेण जातु॥३१॥
अस्वास्थ्येन प्रशमितमतेः श्रीगुरोर्विग्रहस्य
चित्तस्वास्थ्यं प्रतिदिवसमायाति वृद्धिं नितान्तम्।
भक्तग्राह्या यमिसमुदयस्वान्तचिन्तापि तावत्
किञ्चित्स्वस्थं विभुवपुरभूत्केष्वपीतेष्वहःसु॥३२॥
वैद्यादेशाद् गुरु पुरवरं रुग्विशेषोपचर्या-
हेतोर्गच्छाधिपतिरमदावाद[28] मानीयते[29] स्म।
तस्मिन्नेकं गृहपतिगृहं[30] चारुचैत्यं पुपाव
सूरिः शश्वत्समुपहृतसद्दर्शनो[31] दर्शनाढ्यम्॥३३॥
यावद्वैद्या रुगुपचरणं कुर्वते तावदेव
द्वैतीयीकेऽहनि समजनि व्याधिरुग्रस्वरूपः।
वैद्यैः पृष्टः कथमपि महाशैलसन्दष्टपद्म-
सङ्काशाङ्गः कथयति विभुर्बाधते मां न किञ्चित्॥३४॥
आरोग्यं द्राक् पुनरपि गुरुः प्राप्नुयादेवमेक-
मन्त्रे लीनः सततमचरन्मन्त्रजापेषु सङ्घः।
प्रत्येकं हृत्प्रतिपलमलं कम्पते चिन्तयैव
किं न्वस्माकं हृदिव सुगुरुर्दृक्पथाद् यास्यतीति॥३५॥
विज्ञायाऽयुर्विलयमचिराद्भाविनं विद्वरेण्यः
सज्जं स्वान्तःकरणमकरोत् पश्चिमाराधनायै।
शुश्रूषायै सविनयिवरः श्राद्धवर्यः समोऽपि
वैद्यश्रेणी जगदनुपमा रुक्चिकित्साकृते च॥३६॥ [क्रमशः]

---

[17] स्वयं गेहायातोऽपीत्यन्वयः। [18] पुखराज-रायचन्द-आराधना-भवन इति नामानम्। [19]श्रीराजचन्द्रात्मजेन श्रीपुष्करराजनाम्ना श्रेष्ठिवर्येण।
[20] पृथ्वीवलयवर्ति धार्मिककुलमित्यप्यर्थः। [21]गौः = द्युतिर्वाणी च। [22]लक्षणया धरित्रीस्पृशो जना अपि। [23]भवकृतो भावः। [24]मोक्षम्।
[25]दिवसान्। [26]धर्मविधिः। [27]आषाढशुक्लनवम्यां तिथौ। [28]अहम्मदाबादनाम पुरमधुनामदावाद इत्युच्चार्यते। [29]शिबिकाद्वारा, डोलीद्वारेति गुर्जर्याम्।
[30]श्रीबकुभाईमणिलाल इति प्रसिद्धनाम्नः श्रेष्ठिवर्यस्य गृहम्, पालडीनामविस्तारवर्त्ति। [31]सदैव सम्यग्दर्शनदेशक इत्यर्थः। [32]इतिर्गम्यः।



# ॥प्रेमसूरेः सफलो गुणानुवादः॥

-आगमरक्षितविजयो मुनिः

व्यतिकरं तु किञ्चिदेवं जातं। साधवो विहारशीलाः। तन्नियमेन ग्रामानुग्रामं विहरन्नेकोऽष्टश्रमणभृद्वृन्दः सहसैकं ग्रामं प्राप्तः। मनोहरे तस्मिन् वृन्देऽष्टमुनिपुङ्गवा अराजन्त। तेषु मनोहराकृतिः पूर्णयौवनः प्रौढवयःक्रामितपादो गुरुः। स पुनः शास्त्रपरिकर्मितमतिराचारनिष्ठश्च। शेषाः सप्त तस्यैव पितरि पुत्रा इव भक्तिभाजः शिष्याः। नवयौवनास्तेऽपि स्वगुरुदत्तग्रहणासेवन शिक्षाभ्यासपराः।

अथ यस्मिन्नुपाश्रयेऽयं वृन्दः स्थितवान्, तस्यैवोपाश्रयस्य निकटस्थित एकः श्रावकविशेषोऽस्य साधुपरिवारस्य परिचितोऽभूत्। स तु तस्यैव परिवारस्य सभ्यीभवितुकामस्य एकस्य मुमुक्षोर्मातुलः। भवितव्यतायोगात्तद्दिन एव स मुमुक्षुः स्वमातुलगृहे प्रीतिभोजनार्थमागतः। दिवसं यावत् सोऽखिलग्रामे गृहानुगृहमाशिषाणि प्राप्य स्वमातुलगृहे सायं भोजनार्थमुपस्थितवान्। तत्कार्यक्रमं समाप्य गुरुवन्दनार्थमावश्यकार्थं च स तेजस्वी युवा मुमुक्षुः प्रतिश्रयं प्राप्तवान्। तत्र प्रविश्य स्वदीक्षादातृगुरुं दृष्ट्वा वर्धमानभावः पुलकितदेहश्च स गुरुमवन्दत। गुरोराशिर्वादान् प्राप्य कृतकृत्यः सन् तस्यैव विश्रामणापरः स तत्रोपविष्टः। ईदृशमवसरं लब्ध्वा गुरुरचिन्तयत्, यदयं तावदेकमासानन्तरमेव दीक्षितो भविष्यति परन्त्वस्य कस्य चरणे जीवनसमर्पणेच्छा? तत्तु न पृष्टं मया। तदधुना पृच्छाम्येनमिति।

गुरुः- वत्स! त्वत्प्रव्रज्याया एक एव मासः शेषः। तद्वद कं मुनिं त्वं स्वगुरुरूपेण स्वीकरिष्यसि? "एवंविधमाकस्मिकं प्रश्नं श्रुत्वा किञ्चित् क्षुब्धः सन्

पुनः स्वस्थीभूय स प्रतिवदति कदापि न विमृष्टं मयास्मिन् विषये। एकमेव जानामि। भवान् मम सर्वस्वम्। भवदाधीनं मज्जीवनं। युष्मदाज्ञा एव प्रमाणमत्र।"

दीक्षार्थिन एवं प्रत्युत्तरं श्रुत्वा गुरुर्गद्गदो जातः। मुमुक्षुस्तु शीघ्रमुत्थाय क्रियान्तरार्थं प्रस्थितः। तत्र स्थितेन गुरोः प्रथमशिष्येनेयं वार्ता श्रुता। तेन मनसि चिन्तितम्। यद्यसौ मुमुक्षुर्गुरोः शिष्यं न भवेत्तथा च मम शिष्यो भवेत् तर्हि सुष्ठु स्यात्। गुरोः समीपे बहवः शिष्याः सन्ति।

रजनी निस्सरति। महीमण्डले स्वप्रकाशं प्रकटयन् भानुरुद्गतः। अथ सर्वे साधव आवश्यकं कृत्वा स्वाध्यायं कर्तुं लग्नाः। गुरुरपि स्वकार्यं कर्तुं सज्जीभूतः। अतिविनीतः प्रथमशिष्यस्तावद्गुरोः समीपं गत्वा वन्दनं कृत्वाशिषं च प्राप्य किञ्चिद् विज्ञापयति। यदि भवदनुज्ञा स्यात्तर्ह्येकं व्यतिकरं कथयामि।

प्रशमरसनिमग्नो गुरुर्वदति, यथासुखं कथय। "शिष्यो वदति। पूर्वं मम सर्वापि चिन्ता भवता दूरीकृता। अधुना मामनागतसक्ता एका चिन्ता बाधते तामपि भवानेव निराकरोतु।" आश्रितहितकाङ्क्षी गुरुर्वदति। "अग्रे वद।" "भगवतिसूत्रयोगस्यानुज्ञायै शिष्योऽत्यावश्यकः। मम एकोऽपि शिष्यो नास्ति ततो भगवन्तः! विमृशन्तु।" प्राज्ञगुरुः शिष्यस्य हृदयगतं सर्वं व्यतिकरं ज्ञात्वा कथयति "त्वत्कथितां वार्तां विचारयिष्यामि।" शिष्यः पुनः स्वाध्यायार्थं स्वस्थाने उपविष्टः। परमविनीतः सदा गुरुभक्तिपरोऽपि शिष्य एवं विचिन्तयतीति गुरुर्मनस्याश्चर्यं सञ्जातम्।

अथ नातिदूरे स्थितेनावश्यकक्रियां कुर्वाणेनैकेन साधुनेयं वार्ता श्रुता। स साधुरतिविनितोऽपि न गम्भीरः। तेनाचिरात् सर्वापि वार्ता वृन्दे प्रसारिता। क्रमेण प्रथमशिष्यवत् सर्वे साधवो गुरोः समीपं गत्वा वन्दनादिविनयं कृत्वा स्वस्वकारणं दर्शयित्वा तं दीक्षार्थिनं स्वशिष्यं कारयितुं कथयन्ति। सर्वेच्छानिवृत्तश्चारित्ररतिः स गुरुर्वृन्दस्येमामवस्थां दृष्ट्वा मनसि खिन्नोऽभूत्।

अथ प्रसन्नचित्तासनासीनं गुरुं दृष्ट्वा रोमाञ्चकञ्चुकितदेहो मुमुक्षुभ्रातृमुनिर्वन्दनादिकं कृत्वा गुरुपादमूले उपविष्टः। अवसरं लब्ध्वा स कथयति भगवन्! मम लघुभ्रातुः प्रव्रज्यादिनं समीपमस्ति। ततोऽहं विज्ञपयामि भवगर्तापतितः पापाचरणसक्तोऽहं यथा त्वयोद्धृतः। अथ मम लघुभ्रातरमपि स्वहस्ताभ्यां धृत्वा भवसागरात्तारय। असौ मम भ्राताऽस्तीति कदापि न विचारणीयं भवत एव शिष्योऽस्तीति विचारणीयम्। विनीतशिष्यस्येमां वार्तां श्रुत्वा गुरुर्हृदयेऽतिहर्षितो जातः। तत्पश्चात् सम्प्राप्ताः श्रमणोपासका व्याख्यानविज्ञप्त्यर्थमागताः। गुरुः समर्पणैकनिधेः प्रेमसूरेर्गुणानुवादाय गतो गुणानुवादसभायाम्। गुरुस्तावत् प्रेमसूरेर्निस्पृहतागुणस्य समर्पणगुणस्य चानुमोदनां कुर्वाण इत्थं कथितवान्।





साधवः सदैव नानाविधाभिग्रहयुक्ता एव भवन्तीति शास्त्रवचनस्य सदानुकरणं कुर्वन् प्रेमसूरिरेकदा सकलागमरहस्यवेदिदानसूरिगुरुमुखा देकमभिग्रहं गृह्णाति। यन्मम गुरोर्यावद् दश शिष्या न भविष्यन्ति तावदहमेकमपि स्वशिष्यं न करिष्यामि। एतदभिग्रहं श्रुत्वा तत्र सभासीनाः सर्वेऽपि पापभीरवः शिष्या व्याख्यानकाले हि स्वापराधविषये मनसि पश्चात्तापमकुर्वन्। व्याख्यानानन्तरं गुरोः समीपं गत्वा बाष्पजलभारभृन्नयनाः शिष्याः कृपासागरगुरुचरणे मस्तकं मुक्त्वा स्वपापं प्रक्षालयन्ति स्म। प्रसन्नाकृतिगुरुः सर्वान् शिष्यान् आशीर्वचनानि दत्वा कर्मभारात् कुम्भकाररासभवल्लघु करोति स्म। सिद्धान्तमहोदधेः प्रेमसूरेर्जीवनव्यतिकरमपि कीदृक् प्रतिबोधकरमासीत् तद्विचारयतु भवाननेन काल्पनिकेन व्यतिकरेण। व्यतिकरस्तु काल्पनिकः किन्तु गुरोर्निस्पृहतागुणस्तु सर्वदा सद्भूत एव।

# ॥वाचनानुवादः॥

वाचनादाता- पूज्यपाद- आ.श्रीविजयरामचन्द्रसूरीश्वराः
अनुवादकर्त्री—साध्वीजीश्रीविरागदर्शनाश्रीः

(संयमजीवनस्य सफलतायै किं कर्तव्यम्?

१. यस्य निश्रायां वसेत् तमपृष्ट्वा किमपि न कर्तव्यम्।
२. अकारणं सकृदधिकं न भोक्तव्यम्। सकृद्भोजनेऽपि रसत्यागं वृत्तिसङ्क्षेपं च तप आत्मसाद्भवेत्तर्ह्युणोदरीतया भवेदप्रमत्तं च स्थीयेत्।
३. द्वितीयो नियमो जीवने जीव्येत्तर्हि संयमसाधनायाः प्रतिक्रमणादयः सर्वाः क्रिया अप्रमत्ततया यथाविधि कायोत्सर्गमुद्रयाराध्या।
४. आज्ञावदाराधनाभिरीदृशः शोभनः क्षयोपशमः सृजेत्, यद्यस्य प्रभावात् स्वाध्यायेऽतीवानन्द आगच्छेत्, स्वाध्याये आनन्दागमनेनैव प्रतिदिनं ध्येयमपि सुरक्षितं भवेत्, साधना चाप्याधिकाधिकं निर्मला भवेत्।
५. यथोक्तया साधनया संयमजीवनमीदृक् सफलं कुर्यात्, यतः शिवपदं शीघ्रातिशीघ्रं लभेदेतादृक् शोभनं सामर्थ्यं प्राप्येत्।)

## वाचना-१

बाहुभ्यां दुस्तरो यद्वत् क्रूरनक्रो महोदधिः।
यतित्वं दुष्करं तद्वदित्याहुस्तत्त्ववेदिनः॥१॥

यथा भयङ्करजलचरजीवैः पूर्णः समुद्रो बाहुभ्यां दुस्तरो भवति तथा साधुजीवनमपि दुष्करमस्तीति तत्त्वज्ञानिन आहुः। साधुजीवनं सामान्यमनुष्येण पालयितुं न शक्यते। इदं साधुजीवनं लब्धमतः तत एव कृतकृत्यता नास्ति। श्रमणो भूत्वा तत्पश्चात्साधुधर्माभ्यासो यथा भवेत् तथेदं साधुजीवनं पालयितुं शक्यं भवेत्। साधुधर्मस्य पालनं यावदंशेन भवति तावदंशेन तस्यादरं कुर्यात्। यावदंशेन च पालनं न भवति तावदंशेन तस्य दुःखं रक्षेत्तर्ह्येव कार्यं भवेत्। साधु भूत्वा यावदुत्तमोत्तमं साधुजीवनं पाल्यते, तावदानन्दपूर्वकं पाल्येत्। यावत् शोभनं साधुत्वं पालितं ततोऽधिकं शोभनं साधुत्वं पालयितुं लक्ष्यं रक्षितव्यम्। यावत् पाल्यते तावत् सन्तोषं मत्वा स्थीयते, तर्हि यत्पालितं तदपि गमिष्यति, नूतनं च पालयितुं न भवेदेवं दुर्गतिगमनस्य दुष्कृतं यूयं मा कृथाः।

यतिधर्मं प्राप्य बहवः संसारात्तीर्णाः, बहवश्च संसारसागरे निमज्जिताः। ये तीर्णाः तेऽग्रे वर्धितुं लक्ष्यं रक्षित्वा तीर्णाः। ये निमज्जिताः तेऽग्रे वर्धितुं लक्ष्यं विस्मृताः। ततो निमज्जिताः। साधुना प्राणनाशेऽपि स्वस्य यतिधर्मः पालनीयः। तं विनोद्धारो न भवति। सम्यक्त्वं प्राप्याप्यात्मनो यदि सावधाना न भवेयुः ततो निमज्जेयुः। सम्यक्त्वं विना भावचारित्रं न प्राप्यते। सम्यक्त्वप्राप्तिं विना यः साधुर्भवेत्तस्य कोऽपि लाभो न भवति। सम्यक्त्वं भावचारित्रं च लब्ध्वापि यदि सावधानता न भवेत्तर्हि दुर्गतिर्भवेत्। युष्माभिः श्रमणत्वं सुकरं ज्ञायते वा दुष्करम्? यदि युष्माभिः साधुत्वं सुकरं ज्ञायेत, तर्हि युष्माकमुद्धारो न भविष्यति। याकिनीमहत्तरासूनुः पूज्याचार्यभगवान् श्रीमद्धरिभद्र सूरीश्वरमहाराजा आहुः- "जलयादोभिर्भृतः सागरो बाहुभ्यां तरितुमशक्योऽस्ति। सागरे यदि पतनं स्यात्तदा महाजलजन्तवो भक्षयेयुरपि। कदाचित् श्रान्त्वा विरम्य च निमज्जेदपि। शौर्यवानेव तरति।" यतिधर्मं प्राप्य यथाशक्ति भावना रक्षितव्या। शक्तिः प्रभूता सत्यपि भावना मन्दीभूता भवेत्तर्हि कार्यं न भवति। यूयं तपोजपस्वाध्यायादीन् कुरुथ, तान् किं यथाशक्ति कुरुथ, यथाभावना वा कुरुथ? यतिधर्मपालनं भावनानुसारेण

शक्त्युपयोगकरणेन न भवेत्। यदि यतिधर्मपालनं चिकीर्षथ तर्हि युष्माभिर्यथाशक्ति भावनापि विभानीया।

भवान् बुध्यताम्। यदि ज्ञानमागच्छेत्, भवान् सर्वं कर्तुं समर्थोऽस्ति। यतिधर्मक्रियाज्ञानपूर्विका यथाशक्ति करणीया। भगवदाज्ञया क्रियां कुर्यात् ततः सर्वकार्यसिद्धिमाप्नुयात्। किं भवान जानाति? चलतः, उपविशतः, ध्यायतः, तीर्थङ्करान् दृष्ट्वा तिर्यञ्चोऽपि धर्मं लभन्ते। अद्य क्रियां कुर्वतोऽस्मान् दृष्ट्वा कोऽपि धर्मं प्राप्नुयात्?

जिनाज्ञापूर्वकक्रियां यः करोति, स साधुर्निर्जरां कर्तुं शक्नोति। सायं माण्डलाक्रियां कुर्मः, सा रजोहरणं धूनयितुं नास्ति, किन्तु रात्रिसमये बहिर्गन्तुमावश्यकं भवेत्तर्हि यत्स्थानं दृष्टं भवेत्तस्यैवोपयोगं कर्तव्यमतो माण्डलाक्रिया कर्तव्या। शीघ्रं संसारान्मोक्तुं साधुत्वमस्ति। यदि यथाशास्त्रं विधिर्न पाल्यते तत्संसारोऽपि नाल्पीभवति। युष्माकं क्रिया यथाशास्त्रं यथाविधि चास्ति न वा? तद्विचारं करिष्यथ, तर्हि साधुत्वं युष्मभ्यं शोभनं फलं दास्यति। तीर्थङ्करभगवद्भिर्गणधरभगवद्भिर्यो यतिधर्मो समुपदिष्टः स यतिधर्मो युष्माभिरद्य लब्धः। सोऽयं महापुरुषाणामुपकारोऽस्ति। युष्माभिः श्रमणत्वं सुकरं ज्ञायते दुष्करं न ज्ञायते, यतो युष्माकं महापुरुषेषु श्रद्धा नास्ति। अतः साधुवेषोऽस्ति किन्तु श्रमणत्वं नास्ति। यदि श्रद्धां जीवन्तीं रक्षिष्यथ तर्ह्युक्तं सर्वं वृतान्तं भोत्स्यथान्यथा पञ्चमारके बहुमुण्डा मिथ्यात्विनो भविष्यन्तीत्येवं शास्त्रेषु लिखितमेवास्तीति शम्।

संसारस्य नाम विषयकषायत्वम्
तस्मिनासक्तस्य संसारीत्वम्
ये जना दुःखेभ्योः बिभ्यन्ति
ते संसाररसिकाः ॥

गृहस्थाश्रमं नाम आरम्भास्पदम् ।
किं गृहस्थाश्रमः षड्जीवनिकायारम्भेन विना चलेत् ?

## ॥निःश्रेयसं तं सततं पठामि.........॥

सज्ज्ञानवार्धिं गुणसारसद्म
चित्तैकशुद्धौ धनसारसारम्।
दोषाब्धिपारैकविशिष्टबोत्थं
निःश्रेयसं तं सततं पठामि॥१॥

कर्माष्टकानां सुविभेदकं यत्
दुर्भावपुञ्जैकविशुद्धकं यत्।
चित्तप्रसन्नेऽस्तु विवर्धकं यन्
निःश्रेयसं तं सततं पठामि॥२॥

कुसङ्गाव्यालस्तु विनाशमेति
सत्सङ्गस्पर्शोऽपि विलासमेति।
यत्रास्ति बोधः सुगुणाभिरामः
निःश्रेयसं तं सततं पठामि॥३॥

॥श्रीः॥



# नामभक्तेः स्वीकारः आकारभक्तेश्चास्वीकारः

-आचार्यश्रीरत्नसेनसूरिः

स्वीकृतायामपि नामभक्तावाकारभक्तेरनङ्गीकरणमेको महान् प्रज्ञापराध एव। यतो ह्युपास्यस्य नाम न केवलं गुणानेवावलम्बतेऽपि तु तद्देहाकारमपि लक्षयति। यद्युपास्यस्याभिधा केवलं तद्गुणानेवाभिलक्ष्याभविष्यत्तर्हि विभिन्नो पास्यानां पृथक् पृथगभिधानानामावश्यक तापि नावशिष्यते। तुल्यगुणवत्स्वपि विभिन्नेषूपास्येषु तद्देहाकारादिषु पृथग् वैशिष्ट्यं जायत एव, अतः प्रत्युपास्यं नाम भिन्नं भवति। "देहाकारभक्तिः फलवतीति स्वीकुर्वतापि साक्षाद्देहाकारभक्तिः निष्फलेति" स्वीकरणं केवलं मतिमान्द्यतैवास्ति नान्यत् किञ्चित्।

यथा नाम नामस्थापनं वेतीदं शब्दात्मकैर्जडपुद्गलैः सम्भूतमस्ति। तद्वद् देहकृतिस्तत्स्थापना वापि जडपुद्गलैः सम्भूतास्ति। शब्दात्मिका स्वल्पजडपुद्गलानां भक्तिः फलवतीति स्वीकुर्वतापि जननेऽसाधारणाया निमित्तस्वरूपाया आकारात्मिक्याश्च विशालकायजडपुद्गलभक्तेरस्वीकरणं तु केवलं क्षुद्रबुद्धेः परिचायकमेवेति वक्तुं शक्यते।

चेन्नाम श्रेयस्करमस्ति, तदा यस्य स्वरूपस्य नामास्ति, तत्त्वधिकं श्रेयस्करमित्यत्र नास्ति कस्यापि विवेकिनो विमतिः।

# ॥निधिः॥

-श्रीकमलः

**निधिः** – भाण्डारः। निःशेषेण धीयते इति निधिः। अथवा निधीयतेऽत्र निधिः। निधिर्द्विविधा भवति। अध्यात्मनिधि भौतिकनिधिश्च। तत्र स्वात्मगुणोन्नतिकारकरूपाध्यात्मनिधिस्तु पञ्चधा भवति। समता, सन्तोषः, सौजन्यः, समर्पणम्, समाधिरिति।

तत्र **समता**- समभावो यत्र सर्वोच्चप्रकारेण स्वीक्रियते सा। अनुकूल-प्रतिकूलभावयोर्मानापमानयोर्यः समदृष्टिभावेन तिष्ठति तस्मिन् समता विद्यते।

**सन्तोषः**- धनादिकं यत् प्राप्तं तत्तु सन्तोष-भावेनाद्रीयते। विना सन्तोषं जीवो दुःखी भवति। यतः सन्तोष एव सर्वसुखस्योपायः। ततः सन्तोषो निधिरिति गीयते।

**सौजन्यः**- कस्यापि प्रियहितकरवाक्यं सारल्यभावेन स्वीकरोति तदा सौजन्यभावो जनयति। विना प्रियहितकरवाक्स्वीकारं न सौजन्यभावः प्रकटितो भवति। ततः सौजन्यभावेन निधिः प्रसज्यते।

**समर्पणम्** – समर्पणं विना न कदापि कार्यार्थसिद्धिर्भवति। देव-गुरु-धर्माणां चरणं स्वीकृत्य यः सन्मार्गं स्वीकरोति तत्समर्पणम्।

**समाधिः**– आत्मना सार्धं मोक्षमार्गस्य या सन्निधिः सा समाधिः। विना मोक्षमार्गं समाधिः कथम्? ततः समाधिर्हि सर्वगुणानां निधिरिति गीयते। यथोक्तम्- समाधिः समाधानं मोक्षमार्गे चेतसोऽवस्थानमित्यर्थः। भौतिकनिधिस्तु त्रिविधः। स्वोपकारकः, परोपकारकः, स्व-परोभयविनाशकारकः।

**स्वोपकारकः**– भौतिकसमृद्धीनां भोगेन दानेन च स्वोपकारको निधिर्भवति।

**परोपकारकः** – स्ववैभवस्य यद् दानेन केवलं परेषामुपकार एव क्रियते चेच्च स परोपकारकनिधिर्भवति।

**स्वपरोभयविनाशकारकः** – यत्र भौतिकसमृद्धिर्न स्वस्य परेषां वा कृते लाभदायी भवेत् किन्तु विनाशकर्त्री भवेत् सा निधिः स्वपरोभयविनाशकारी भवति। इत्येवं निधिशब्दस्य विवेचनं स्वमत्यानुसारेण कृतम्। इदं पठित्वा भव्यात्मभिः स्वात्मप्रकाशोऽपि प्राप्तव्यः।

॥इति शम्॥

श्रीचारित्रसप्तविंशतिसप्तविंशिकाग्रन्थे

अथ चारित्रलिङ्गवर्णनगर्भा

# विंशतितमा श्रीचारित्रसप्तविंशिका – २०

-पंन्यासश्रीसम्यग्दर्शनविजयोगणी

## माङ्गल्यम्

(शार्दुलविक्रिडीतम्)

ऐन्द्रैर्भक्तिनतं विशुद्धहृदयैः
श्रीपार्श्वशङ्खेश्वरं
विघ्नौघप्रविघातनाय परमं
[1]पार्श्वं स्तुवे प्रीतितः।
भव्या यस्य च भक्तिकाव्यरसिकाः
नन्दन्ति भक्त्या सदा
स श्रीपार्श्वजिनो जने हितकरः
सिद्धिप्रदः स्तात् श्रियै॥१॥

## चारित्रलिङ्गानि

(अनुष्टुप्)

लिङ्गेन लक्ष्यते वस्तु
लिङ्गेन निश्चिता क्रिया।
कार्याकार्यविचारेऽपि
लिङ्गं निर्णायकं भवेत्॥२॥
लिङ्गेन कार्यसिद्धिः स्यात्
प्रसिद्धिर्लिङ्गतः पुनः।
ततश्चारित्रधर्मस्य
लिङ्गमत्र विविच्यते॥३॥
द्वादशमुच्यते बुद्ध्या
गुणप्राप्तिक्रमेण तद्।
[1]भवनिर्वेद [2]संवेगो
[3]ममत्व-त्याजनं तथा॥४॥
[4]विरागश्च गुरौ चित्त-
वित्तादीनां [5]समर्पणम्।
[6]गुरुभक्तिः [7]श्रुताम्भोधि-
लाभश्च [8]व्रतशोधनम्॥५॥
[9]दोषत्यागो [10]गुणाऽऽप्तिश्च
[11]प्रशमो [12]मुक्तिप्रापणम्।
स्यादाऽऽत्मा भवनिर्विण्णो
विभाव्य भवभावनाम्॥६॥
निर्वेदाद्[1] भौतिके सौख्ये
दुःखबुद्धिस्तु जायते।
ततो दुःखमयं दुःख-
फलं तल्लक्ष्यते तथा॥७॥
दुःखानुबन्धितां ज्ञात्वा
स्यात् तत्त्यागस्य भावना।
भवनिर्वेदवतस्तस्य
कथं स्यात् शाश्वतं सुखम्?॥८॥
इति चिन्तयतो मुक्ति-
लालसा मानसे भवेत्।
संवेगः[2] कथ्यते सैष
निर्यामको भवाम्बुधौ॥९॥
ममत्वबन्धनं[3] त्रुट्येत्
ततः सांसारिकं महत्।
मुक्तिरागेण संसारे
तिष्ठति ममता कथम्॥१०॥
ततस्तस्य विरागः[4] स्याद्
वस्तु व्यक्तिषु सर्वथा।
ममत्वं भवहेतुः स्याद्
विरागो मुक्तिकारणम्॥११॥
विरागवासितात्मानो
यान्ति सद्गुर्वन्तिकम्।
सद्गुरोश्चरणे सर्वं
स्वं कुर्वन्ति समर्पणम्[5]॥१२॥
मनो-वचः-शरीरेषु
भक्तिं[6] कुर्वन्त्यहोनिशम्।
चेतसोऽभीप्सितं तस्मिन्
विलिनीकुरुतेऽखिलम्॥१३॥
गुरुभक्तिप्रभावेण
स्याद् गुरोश्चित्तरञ्जनम्।
प्रसन्नीभूयते दत्ते
शिष्याय श्रुतसागरम्[7]॥१४॥



श्रुतलाभो महालाभो
यल्लाभाल्लभ्यतेऽखिलम्।
श्रुतलाभान्न किं किं स्यात्?
सर्वगुणावहं श्रुतम्॥१५॥
मोहजाड्यविनाशाय
स्यात् समर्थं श्रुतामृतम्।
भावरोगप्रणाशाय
सञ्जीवनं ध्रुवं श्रुतम्॥१६॥
हेयोपादेयवस्तूनां
विवेकः स्यात् श्रुताद् द्रुतम्।
कार्याकार्यविमर्शोऽपि-
स्यात् श्रुतादेव मानसे॥१७॥
श्रुतज्ञान-समुत्कर्षाद्
व्रतोत्कर्षो[८] भवेत् खलु।
भवेत् कथं विना ज्ञानं
रे! महाव्रतपालनम्॥१८॥
तेन स्यात् श्रुतलाभेन
व्रतशुद्धिर्महामुनेः।
वरावृत्तिः प्रवृत्तिश्च
व्रते शुद्धिः समुच्यते॥१९॥
अहिंसा-सत्यमस्तेयं
ब्रह्मचर्याऽपरिग्रहौ।
पञ्चमहाव्रता एते
भाषिता श्रीजिनागमे॥२०॥
पञ्चाश्रवमहादोष[९]-त्यागः
स्यात् व्रतपालने।
परिहारस्ततस्तेषां
व्रतशुद्धौ भवेदहो!॥२१॥
दोषौघपरिहारेण
प्राप्नुयात् सद्गुणावलिः[१०]।
दशधा स्याद् यतेर्धर्मः
क्षमासारल्य-नम्रते॥२२॥



मुक्तिस्तपश्च चारित्रं
शौचसत्याऽपरिग्रहाः।
ब्रह्मचर्यं मुनेधर्मा
दशैते स्थैर्य-माप्नुयुः॥२३॥
एवं सद्गुणसम्प्राप्त्या
सम्भवेत् प्रशमो[११] वरः।
प्रशमः कथ्यते शास्त्रे
रागद्वेषविनिर्जयः॥२४॥
सम्भवेत् प्रशमात् साम्यं
शत्रौ मित्रे तृणे मणौ।
प्रशमाप्तौ भवेन्मुक्ति[१२]-
रेष पन्थाः सनातनः॥२५॥
इत्थं चारित्रलिङ्गानि
वर्णितानि यथामति।
ततश्चरित्रसंशुद्धि-
र्मम मुक्तिप्रदास्तु सा॥२६॥

शिखरिणी –

मया लिङ्गं दृब्धं
चरणविषयं स्वात्मसुखदं
गताः सर्वे दोषा
भवभयकरा पापजनिताः।
मया दृष्टं विश्वं
विगतचरणं सौख्यरहितं
ततः 'श्रेयो' भूयात्
परमचरणं 'दर्शन'गुणात्॥२७॥

इति श्रीचारित्रसप्तविंशतिसप्तविंशिकाग्रन्थे
साधुधर्मवर्णनगर्भा
विंशतितमाश्रीचारित्रसप्तविंशिका-२० समाप्ता



श्रीचारित्रसप्तविंशतिसप्तविंशिकाग्रन्थे

अथ चारित्रेऽनाचीर्णवर्णनगर्भा

## एकविंशतितमा श्रीचारित्रसप्तविंशिका – २१

### माङ्गल्यम्

(शार्दूलविक्रिडीतम्)

ऐन्द्रैः प्रौढप्रभाप्रतापतपनः
श्रीपार्श्वनाथः स्तुत
स्तृष्णाकामविकार-दोषनिकरः
स्वैरं विनष्टो यतः।
क्षान्त्याद्या वरशुद्धभावविभवा
यस्मात् समुल्लासयेत्
स श्रीपार्श्वजिनो जने हितकरः
सिद्धिप्रदानेऽग्रगः॥१॥

### उपक्रमः –

आचाराद् यद् विरुद्धं स्या-
दनाचारयुतं च यत्।
अनाचीर्णं तदेवोक्तं
शास्त्रसिद्धान्तसम्मतम्॥२॥
बहुस्थानानि साधूना-
मनाचीर्णं प्ररूप्यते।
तत्-तत् स्थानं निरूप्याथ
मयाऽत्रैव विवक्ष्यते॥३॥

### अनाचीर्णवर्णनम्

[१]औद्देशिकं नहि ग्राह्यं
दोषविप्लवकारणात्।
[२]क्रीतभोज्यं [३]नियागञ्चा-
[४]भ्याहृतं [५]रात्रिभोजनम्॥४॥
[६]स्नानं शरीरशोभाकृद्
[७]गन्धमाल्यं च [८]वीजनम्।
[९]सन्निधि [१०]गृहि पात्रय
[११]राजपिण्डं [१२]किमिच्छकः॥५॥

अनाचीर्णवर्णनम्
[१]औद्देशिकं नहि ग्राह्यं
दोषविप्लवकारणात्।
[२]क्रीतभोज्यं [३]नियागञ्चा-
[४]भ्याहृतं [५]रात्रिभोजनम्॥४॥
[६]स्नानं शरीरशोभाकृद्
[७]गन्धमाल्यं च [८]वीजनम्।
[९]सन्निधि [१०]गृहि पात्रय
[११]राजपिण्डं [१२]किमिच्छकः॥५॥

[१३]संवाहनं न [१४]दन्तस्य
धावनं सम्मतं न हि।
[१५]साधुप्रश्नं गृहस्थेभ्यो
नादर्शे [१६]तनुदर्शनम्॥६॥
[१७]अष्टापदं च [१८]नालिका
खेलनं पापकारणम्।
[१९]छत्रस्य धारणं नैव
शरीररागवर्धकम्॥७॥
[२०]औषधाद्युपचारञ्चा-
नाचीर्णं सम्मतं श्रुते।
[२१]पादत्राणे तथा नैव
नैव [२२]वह्निप्रदीपनम्॥८॥
[२३]शय्यातरस्य यत्पिण्डं
न भोज्यं तत् कदाप्यहो।
[२४]पुनरासन्नपर्यङ्कौ
न सेव्यौ साधुभिः कदा॥९॥
[२६]गृहान्तरनिषद्या च
[२७]गात्रस्योद्वर्तनं नहि।
[२८]वैयावृत्यं गृहस्थानां
[२९]नाजीववृत्तिकाऽपि नो॥१०॥
[३०]तप्तानिवृत्तभोज्यत्वं
[३१]नातुरस्य च सेवनम्।
[३२]मूलकः [३३]शृङ्गबेरं च
[३४]नेक्षुखण्डमनिवृतम्॥११॥
[३५]कन्दं मूलं [३६]सचित्तं च
[३७]फलं [३८]बीजमपक्वकम्।
[३९]सोवर्च्चलं नहि ग्राह्यं
[४०]सैन्धवं [४१]लवणं तथा॥१२॥

न [४२]रोमालवणं ग्राह्यं
पक्वं तु दोषकारणम्।
[४३]सामुद्रं [४४]पांशुखारं च
न [४५]कृष्णलवणं तथा॥१३॥
[४६]वस्त्रस्य धूपनं नैव
[४७]वमनं [४८]बस्तीकर्मकम्।
[४९]अञ्जनं नैव कर्तव्यं
[५०]दन्तस्य वर्णकं पुनः॥१४॥
[५१]विरेचनं पुनस्त्याज्यं
साधूनां स्यान्निरन्तरम्।
[४२]अभ्यङ्गनं न गात्रस्य
न [४३]राढाकरणं तथा॥१५॥
सर्वमिदमनाचीर्णं
न सेव्यन्ते सुसाधवः।
गुणान् बहुविधान् तस्य
त्यागेन प्राप्नुयुस्सदा॥१६॥

प्रकीर्णकसाध्वाचारवर्णनम्-

पञ्चाश्रवैर्विनिर्मुक्ताः
सुज्ञातारो भवन्ति ते।
यतः प्रमादनिर्मुक्ता
विज्ञा भवन्ति सर्वथा॥१७॥
गुप्ताश्च ज्ञानिनः स्युः
षड्जीवरक्षकास्तथा।
जितेन्द्रियः सदा धीरा
निर्ग्रन्थास्ते भवन्ति हि॥१८॥
ते ऋजुदर्शिनो नूनं
महाशया भवन्ति ते।
ग्रीष्मकालेषु तेनैव
कुर्वन्त्यातापनां पुनः॥१९॥
पुनः हेमन्तकालेषु
निष्प्रावृत्ता भवन्ति ते।
वर्षाकाले पुनस्ते स्युः
संलीनाः सुसमाहिताः॥२०॥
सत्यास्ते संयता मान्या
नैवान्ये स्युश्च तादृशाः।
उत्तमार्थं लभन्ते ये
समाहिता यतीश्वराः॥२१॥
जित्वा परिषहान् शत्रून्
मोहोदयविदारकाः।
सर्वदुःखविनिर्मुक्ता-
स्ते भवन्ति विरागिणः॥२२॥
दुष्करं यत्तु चारित्रं
सेवन्ते ते पुनः पुनः।
दुस्सहाश्चोपसर्गा ये
ते सहन्ति निरन्तरम्॥२३॥
गत्वा देवभुवं ते हि
देवा भवन्ति वा तथा।
सिद्धिसौख्यं च सम्प्राप्य
शाश्वतं सौख्यभाजनाः॥२४॥

चारित्रमहिमागानम्-

चारित्रं च हितं कुर्या-
दहितं न कदाचन।
साधुः समाचरेत् साधु-
चारित्रं स्वहितेच्छया॥२५॥
चारित्रं दोषनाशाय
चारित्रं गुणलाभदम्।
चारित्रं सर्वभावेषु
सौख्यमेव करोत्यलम्॥२६॥

उपसंहार-

(शिखरिणी)

अनाचीर्णं प्रोक्तं चरणविषयं स्वात्महितदं
न रागो द्वेषः स्यात् परमपथगे संयमधरे।
ततो नो सेव्यं तच्चरणहननं दोषबहुलं
मम "**श्रेयो**"भूयाच्चरणसुखदं "**दर्शन**"गुणात्॥२७॥

इति श्रीचारित्रसप्तविंशतिसप्तविंशिकाग्रन्थे
चारित्रेऽनाचीर्णवर्णनगर्भा एकविंशतितमा
श्रीचारित्रसप्तविंशिका २३ समाप्ता

# अस्माकं श्रुतकोशः

-पंन्यासश्रुततिलकविजयो गणी

अस्माकं श्रुतसम्पदतुल्या मनोरमा परिपूर्णा च। तादृशो न कोऽपि विषयो भवेद् योऽस्माकं पूर्वपुरुषैः स्वलेखन्या न स्पृष्टः स्यात्। दर्शन-विज्ञान-सङ्गीत-काव्य-कथालङ्कार-छन्दो-व्याकरणेत्यादिषु बहुविधेषु विषयेषु पाश्चात्यानामपि श्लाघ्या विविधा ग्रन्था अधुनापि प्राप्यन्ते अस्माभिः।

केषाञ्चिन्मेगेझीन्-नोवेलसाहित्यपठने आसक्तिर्दृश्यते। बहवो गृहस्थास्तु वोट्सँप-जालपुटादिष्वेव निरता भवन्ति। केचन कथयन्ति यत् शास्त्रपठने न तादृश मानन्दं लभ्यते यथा इतरपुस्तकेषु लभ्यते इति। तादृशान् सर्वान् शास्त्रप्रेमिणश्चोद्दिश्य शास्त्रस्य माधुर्यं वैविध्यं गाम्भीर्यं च प्रकटीकर्तुमेव प्रयासः क्रियते अस्माभिः। अस्यां लेखमालायां प्रतिलेखं जैनसाहित्यवैशिष्ट्यं विविधदृष्ट्या वर्णयिष्यते।

**॥आगमास्तट्टीकाश्च॥**

स्वयंबुद्धाः तीर्थङ्करा जगतः सनातनसत्यान्युपदिशन्ति। तानि च तीर्थङ्कराणां प्रधानशिष्या गणधराः सूत्रे ग्रथ्नन्ति। तान्येव सूत्राण्यागमतया प्रथितानि। अधुना पञ्चचत्वारिंशद्(४५) आगमा उपलभ्यन्ते येषां श्लोकप्रमाणं प्रायेणाशीतिसहस्रमितं विद्यते। किन्तु इतः पञ्चशताधिकद्विसहस्रवर्षादर्वाग्(२५००) आगमसङ्ख्याः श्लोकमानं चोभयमपि प्रभूततरमासीत्।

गणधरैः स्थविरैश्च रचिता आगमास्त्वतीवं गभीराः सन्ति। अतस्तेषां रहस्यानां तदन्तःस्थितानां सूक्ष्मार्थानां चावगमनाय पूर्वर्षिभिर्विविधं साहित्यं रचितम्। तत्साहित्यं चास्माभिः पञ्चाङ्गीति नाम्नाभिज्ञायते। पञ्चाङ्गी नाम १)आगममूलसूत्रम् २)निर्युक्तिः ३)भाष्यम् ४)चूर्णिः ५)आगमटीका च। एतेषां पञ्चानामङ्गानां समाहारः पञ्चाङ्गी। आगमान् आश्रित्य भद्रबाहुस्वामिभिः सर्वप्रथमतया निर्युक्तयः रचिताः। कालानुक्रमेण भाष्यानि चूर्णयश्च विविधैः पूज्यपादै रचिताः। तदनु च टीकाग्रन्थानां ग्रथनमभवत्। आगममूलसूत्रमर्धमागधीप्राकृतभाषानुबद्धम्। निर्युक्तिः, भाष्यम्, चूर्णिरित्यादिकं साहित्यमपि प्राकृतभाषायामेव विद्यते। टीकानां रचना तु संस्कृतभाषायां जाता।

आगमस्थितानि सुभाषितानि प्रेरकानि भवन्ति। प्रभुवीरेणोत्तराध्ययनसूत्रे गौतमस्वामिने कथितमेतद्वाक्यमतीवं बोधकं खलु!

**"समयं गोयम! मा पमायए"।**

**'गौतम! समयमात्रमपि प्रमादं मा कृथाः'।**

यद्यपि आगमपञ्चाङ्गी सम्पूर्णरूपेण नोपलभ्यते। तथाप्यागमे यस्याः ससन्दर्भ उल्लेखो न भवेत्तादृशी कापि वर्तमानदशायां दार्शनिकी विद्याशाखा नास्ति। इति तज्ज्ञाः कथयन्ति।

आगमे प्रत्येकस्मिन् शब्दे गभीरं ज्ञानं निहितं भवति। आगमगतं तद्गभीरज्ञानं टीकायां सरलतया विवेचितं भवति। विविधागमानाधारीकृत्य रचिता बह्व्यः टीका उपलभ्यन्ते। आगमेतरान् प्राचीनान् ग्रन्थानाधारीकृत्यापि रचिता अनेकाः टीकाः सन्ति। अधुना प्राप्यमानानामागमटीकानां रचयितॄणामाहत्य नवतितोऽधिकानि नामानि सन्ति। यस्मिन्

श्रीजिनभद्रगणि-क्षमाश्रमणाः, श्रीहरिभद्रसूरीश्वराः, श्रीशीलाङ्काचार्याः, श्रीअभयदेवसूरयः, श्रीद्रोणाचार्याः, श्रीमलयगिरिपादाः, श्रीक्षेमकीर्त्युपाध्यायाः, वादिवेतालश्रीशान्तिसूरय इत्यादयः प्रमुखाः सन्ति। यद्यपि श्रीजिनभद्रगणिक्षमाश्रमणत आरभ्याधुना यावद्विविधैः पूज्याचार्यैर्नैकाः टीका रचिताः। तासां सर्वासां परिचयोऽत्र कारयितुं न शक्यते। अतः टीकाकारैः कृताः केचन विशिष्टार्था अत्र बोध्यन्ते। सुखमिति शब्दस्य सामान्यार्थस्त्वेवं भवति— सु=अनुकूलानि ख=पञ्चेन्द्रियाणि मनश्च। तानि यस्मिन्निति तत्सुखम्।

विशेषावश्यकभाष्ये गुरोर्विशेषणरूपेण सुखशब्दः प्रयुक्तोऽस्ति। तस्यार्थ एवं विवृतो श्रीजिनभद्रगणिक्षमाश्रमणैः— सु=सुशोभनानि, प्रशस्तानि, वश्यानीति वा, ख=इन्द्रियाणि मनश्च तानि यस्य स गुरुः, अर्थाज्जितेन्द्रिय एव गुरुर्भवितुमर्हति।

कलिकालसर्वज्ञाः श्रीहेमचन्द्रसूरयो व्याकरणे कथयन्ति "उपजिनभद्रगणिक्षमाश्रमणं व्याख्यातारः।" टीकाकारेषु जिनभद्रगणिक्षमाश्रमणा उत्कृष्टाः।

इतः प्रायः १४०० वर्षेभ्यः पूर्वं श्रीहरिभद्रसूरयोऽभवन्। तैः श्रीआवश्यकसूत्रम्, श्रीदशवैकालिकसूत्रम्, श्रीप्रज्ञापनासूत्रम्, श्रीनन्दीसूत्रमित्येतेष्वागमग्रन्थेषु टीका रचिताः। जैनशास्त्रे श्रीहरिभद्रसूरिकृट्टीकानां स्थानं महत्त्वपूर्णं विद्यते। श्रीहरिभद्रसूरयो यदि नाभविष्यन् तर्हि वयं सत्स्वप्यागमेष्वन्धा इवाभविष्यामः। तैः श्रीदशवैकालिकसूत्रस्य टीकायां व्याख्यातमेकं मनोहरं सुभाषितं पश्यामः—

**पापं समाचरति वीतघृणो जघन्यः, प्राप्यापदं सघृण एव विमध्यबुद्धिः।**
**प्राणात्ययेऽपि न तु साधुजनः स्ववृत्तं, वेलां समुद्रमिव लङ्घयितुं समर्थः॥1॥**

अस्य व्याख्या— "अधमो जनो निष्ठुरीभूय पापं समाचरति। मध्यम आपत्तावागतायां सखेदं पापं समाचरति। उत्तमस्तु प्राणात्ययेऽपि समुद्रमर्यादामिव स्वाचरणं नातिक्रामति।"

विद्यमानपञ्चचत्वारिंशदागमेषु मूलभूतद्वादशागमसूत्रोपरि प्रथमटीकाकाराः श्रीगन्धहस्तिसूरयोऽभवन्। कालदोषेण तट्टीकानाशे श्रीशीलङ्काचार्यैः पुनरपि टीका रचिताः। तत्पश्चादतिमहत्त्वभूतं द्वादशमङ्गं यो दृष्टिवादः कथ्यते स अनुवीरं क्रमेण ससूत्रार्थेन हीयमानं सम्पूर्णं व्यनशि। प्रथमद्वितीय-श्री-आचाराङ्ग-सूत्रकृताङ्गरूपागमद्वयं मुक्त्वा शेषनवाङ्गसूत्राणां श्रीशीलाङ्काचार्यकृट्टीका अपि लुप्ताः।

जैनदर्शनानुसारं पृथ्वी स्थिरा सूर्यश्च परिभ्रमणशील एव। पृथ्वी परिभ्रमणशीलेति यन्मिथ्यामतं तत्तु १२०० वर्षेभ्यः पूर्वमेव प्रचलितमासीदित्याचाराङ्गसूत्रस्योक्तटीकातो ज्ञायते।

तट्टीकांशस्त्वेवम्, मृषावादवर्णनप्रकारे यदुक्तं— **"भूगोलः केषाञ्चिन्मतेन चलन्नेवास्ते, आदित्यस्तु व्यवस्थित एव" (श्रुतस्कन्ध-१, अध्ययन-८, उद्देश-१, सूत्रक्रमाङ्कः-१९१ टीका)**

एतेन वचनेनैतदपि सुनिश्चितं भवति यत् पृथ्वी परिभ्रमणशीलेति मिथ्यामतमैदम्प्राथम्येन कोपरनिक्सेन प्रकाशितं तदपि सर्वथाऽसत्यमेव।

शासनदेवीवचनेन श्रीअभयदेवसूरिभिः शेषनवाङ्गसूत्रोपरि टीका रचिताः। ताभिः ते पूज्याः वीरशासने नवाङ्गीटीकाकारा इति विश्रुताः। व्याख्याप्रज्ञप्तिरिति पञ्चमागमनाम्नस्तैर्दश गम्भीरा अर्थाः कृताः। एतावतैव तेषां विद्वत्तायाः परिज्ञानमस्माभिः किञ्चिदनुमीयते एव।

ततः श्रीमलयगिरिभिरप्यनेकागमेषु विस्तरेण टीकाः रचिता आसन्। तासु या अधुना लभ्यन्ते ता मातुस्स्तन्यमिवातीवा सुगमा इति प्रख्यातिं प्राप्ताः। एवमागमानां तट्टीकानां च सङ्क्षिप्तपरिचयो मया समाप्यते। इतः परमग्रिमेष्वङ्केष्वस्माभिरागमेतराणां ग्रन्थानां परिचयः कारयिष्यते।

# ॥पर्युषणपर्वोत्सवः क्षमाधर्मस्य महोत्सवः॥

-पंन्यासश्रीश्रुतसुन्दरविजयो गणी

येऽस्मासूपकारकाः सन्ति तेषु क्षमाभावः सद्भावश्च सुकरः। केऽपि जना अस्मान् दुःखयन्ति पीडयन्ति ताडयन्ति च तेष्वपि क्षमा (शक्यता तु नास्ति तथापि कल्पना) सुसाध्या। किन्त्वस्माकं न कोऽपि दोषस्तथापि जनाः "अयं दुष्टः, अयं पापी, अयं क्षुद्रः, अयं वञ्चकः, अयं दुराशयः" इति बहुशः निन्द्य सम्पूर्णे विश्वे घोषयित्वा नानाप्रकारेण सुचिरं दण्डयन्ति। तेषामुपरि या क्षमा सा दुस्साध्या दुराराध्या च।

"क्षमा वीरस्य भूषणम्"

अयं पर्युषणपर्वोत्सवस्तु क्षमाधर्मस्य महोत्सवोऽस्ति। अतिनिकटे घटितैका घटना किञ्चिन्नामपरिवर्तनं कृत्वात्र प्रस्तूयते।

एकस्मिन् प्रदेशे क्षमागुणधारकः प्रशान्तकुमारः श्रावकोऽस्ति। स सज्जनः, क्षमागुणधारकः, सर्वजीवमैत्रीभावोपेतः, देव-गुरु-धर्मोपासकः, दयालुः, दानवीरः, ज्ञानाद्यनेकविधगुणधारकोऽस्ति। सर्वत्र तस्य प्रशंसा भवति।

अद्यापि लोके गुणानुरागिणो जनाः सन्त्येव। केऽप्यीर्ष्याग्रस्तदुष्टजनाः सम्मील्य तस्योपरि मिथ्यादोषमारोपयित्वा, तदेव वितथसत्यं सत्यं दर्शयित्वाखिले विश्वे निन्दित्वा, राज्येन दीर्घकालिकीं बहुविधदण्डयुक्तकारागृहस्य शिक्षां कारयन्ति।

कारागृहे विविधवेदनायामपि स धर्मध्यानतत्परोऽस्ति। नास्ति तस्य शोकः। नास्ति तस्य तापः। तेन प्रशान्तकुमारेण विंशतिवर्षं तीव्रवेदनायुक्तस्य कारागृहस्य शिक्षातीवं प्रसन्नतयानुभूता।

तत्पश्चात् निजकल्याणकृद्गुरुदेवस्य वन्दनार्थं स गतवान्। गुरुदेवेन स पृष्टः— कारागृहे एतावत्सुदीर्घसमयं यावत् त्वया भयजनकं किमनुभूतम्? स प्रशान्तकुमारश्रावकोऽवदत्— यद्यपि त्वत्प्रसादात् सदाहं निर्भयः प्रसन्नश्चासम्। तथापि सदा मम मनस्येकं भयमासीत्। "ये जना मम कारागृहशिक्षाया कृते निमित्तभूता आसन् तेषामुपरि मम करुणाभावो मनागपि न न्यूनीभवेत्"। इति भयं मम सदाभूत्।

तस्योत्तरेण गुरुदेवोऽपि सन्तुष्टोऽभवत्।

प्रशान्तकुमारेण प्रशान्तगुणेन स्वनाम स्वजन्म च सफलीकृतम्।

जयतु क्षमाधर्मः।

विजयतु जैनधर्मः।

## ॥अद्भुतो भूतकालः॥

-आत्मदर्शनविजयो मुनिः

पूर्वे भारतवर्षे प्रजाप्रियराजा राजाप्रिय प्रजासीत् । वर्तमानभारतदेशस्य राज्यतन्त्रस्थिरी करणार्थमादर्शभूतो भूतकालोऽभवत्। अस्मिन् विषये दृष्टान्तभूतराजा भावनगरस्य तख्तसिंहः। प्रतिवर्षं तस्य राज्ञो द्वे शोभायात्रे भवतः। एका दशेरायात्रायां द्वितीया तु बलेवसत्का। तदा सम्पूर्णा नगर्यवलोकनार्थ मवतरति।

एकदा दशेरायात्रायां भावनगर सत्करूपापरी-सञ्ज्ञद्वारसमीपे यदा तख्तसिंहराज्ञो हस्तिरायातः तदा राजमस्तके एकः प्रस्तरः कुतोऽपि निपतितः। रुष्टमन्त्रिणा राजापराधिनं गवेषाणार्थं स्वसेवकाश्चतुर्दिक्षु प्रेषिताः। क्षणार्धात् कोठाफलपातनार्थं प्रस्तरक्षेपी कोलिजातिकः कोऽपि बाल आनितः।

केवलं मातृस्वोदरपूरणार्थं फलपातने प्रवृत्तबालस्य दुर्भाग्येन राजदण्ड आपतितः। तस्य पिता नासीत्। अथ भयकम्पितः स राजसमक्षं रोरुदति स्म। न जानाति राजा किः दण्डो दापयिष्यतीति।

समस्तनगरलोका अपि राज्ञः कोपं प्रसादं वा प्रेक्षणार्थं मिलिताः। स्वामिभक्तमन्त्री तु येन केन प्रकारेणापराधिनं दण्डयितुमिच्छति। अपि तु राजा बालकस्य संयोगं परिस्थितिं च विचारयति स्म।

यदा तख्तसिंहराजा बालं किमपि वक्तुमवसरं ददाति तदा बालो निर्भयं भूत्वा वदति। न किञ्चिदपि भवतोऽपराधं कर्तुं ममेच्छासीत्। तथापि मया युष्माकमपराधं कृतम्। तेन मम वृद्धमातुर्निर्वाहं मुक्त्वा मद्योग्यं दण्डमादिशन्तु भवन्तः।

करुणाव्याप्तहृदयः प्रजाप्रियराजा तख्तसिंहस्तु मधुरभाषयाऽभाषिष्ट यदि जडवृक्षोऽपि प्रस्तरघातिपुरुषं मधुरफलं ददाति, अहं तु राजा। तर्हि' कथं मया वृक्षादपि हीनतरं भाव्यम्।

अस्मिन्नवसरे मम तु तथा कर्तुं युज्यते यथास्य बालस्याद्यप्रभृति न कदापि फलार्थं प्रस्तरप्रक्षेपप्रयत्नं कर्तुमवशिष्येत्।

अथ ममादेशोऽस्ति यदुतायं बालो मम राजभण्डारात् स्वजीवितार्थमीप्सितं धनं गृह्णातु। पारमार्थिकन्यायप्रियराज्ञो व्यवहारं दृष्ट्वा प्रजापि राजानं प्रति सश्रद्ध आसीत्। वयमपि नागवल्लिपत्र-पूगीफलयोः संयोगमिव राजप्रजयोः सम्बन्धमाशास्महे इति शम्।

## ॥जिज्ञासातृप्तिः॥

**जिज्ञासा १**

सर्वकर्मणां स्थितिः शास्त्रेऽशुभा कथिता, कषायनिमित्तत्वात्। शुभप्रकृतीनां बन्धे विशुद्धिवशादल्पैव स्थितिः प्राप्यते। तर्हि कथं केषाञ्चित् शुभप्रकृतीनामुदये तेषामुत्कृष्टा स्थितिरनुभूयते?

**तृप्तिः** केषाञ्चित् शुभप्रकृतीनामुदयकाले पूर्वबद्ध-तत्प्रतिपक्षाशुभप्रकृतिसत्तागतोत्कृष्टस्थितिः सङ्क्रम्य शुभप्रकृतिस्थितिरूपेणानुभूयते। ताश्च शास्त्रे उदयसङ्क्रमोत्कृष्टाः प्रकृतय उच्यन्ते।

उक्तं च श्रीचन्द्रमहत्तराचार्यकृत्श्रीपञ्चसङ्ग्रहस्य तृतीयबन्धव्यद्वारे टीकाकारैः श्रीमलयगिरिसूरिभिः—

"......मनुष्यगतिः, सातवेदनीयम्, सम्यक्त्वम्, स्थिरादिषट्कम्, हास्यादिषट्कम्, वेदत्रिकम्, शुभविहायोगतिः, वज्रऋषभनाराचादीनि पञ्च संहननानि, समचतुरस्रादीनि पञ्च संस्थानानि, उच्चैर्गोत्रमित्येतास्त्रिंशत्-प्रकृतय उदयसंक्रमोत्कृष्टा इति।

आसां हि प्रकृतीनामुदयप्राप्तानां या विपक्षभूता नरकगत्यसातवेदनीयमिथ्यात्वादयः प्रकृतयस्तासामुत्कृष्टां स्थितिं बद्ध्वा भूय आसामेवोदयप्राप्तानां बन्धमारभते, बध्यमानासु चैतास्वनन्तरबद्धनरकगत्यादि विपक्षप्रकृतिदलिकं सङ्क्रमयति, शुभप्रकृतीनां च स्थितिः स्वबन्धेन स्तोकैव भवति। अशुभानां तूत्कृष्टा, ततः सङ्क्रमत आसामुत्कृष्टा स्थितिरवाप्यते, इत्येता उदयसङ्क्रमोत्कृष्टाभिधानाः।" इति ॥६३॥ (टीका) (तृतीयबन्धव्यद्वारे)



## ॥श्रीअजितनाथस्तुत्यनुवादः॥

गुर्जररचयिता-पू.आ.भ.श्रीविजयमुक्तिप्रभसूरि म.सा.
अनुवादकः-ज्ञानभूषणविजयो मुनिः

अर्हंस्त्वं भगवांस्त्वं हि जगज्जन्तुदयापरः।
कृतानैकोपकारा यैः श्रद्धा तत्रास्ति मे सदा॥१॥
कुर्वे कमुपकारं त्वं दह मे सर्ववासनाम्।
प्रभोऽजित! जगन्नाथ! गृहाण मम वन्दनाम्॥२॥
कर्म प्रतिरणं कृत्वा त्वया कर्मारयो जिताः।
कर्मारिणा हतोऽहं तु भवे भ्रान्तोऽस्म्यनन्तशः॥३॥
भवभीतोऽस्मि रक्ष त्वं गृहित्वा मे करं प्रभो!।
प्रभोऽजित! जगन्नाथ! गृहाण मम वन्दनाम्॥४॥
अस्मिन्नेवावसर्पिण्यां द्वितीयस्तीर्थरोऽसि।
गते कालेऽप्यसङ्ख्येऽपि स्मृतिमायासि नः सदा॥५॥
आगत्य देवदेव्यस्त्वां वन्दन्तेऽमूर्तरूपतः।
प्रभोऽजित! जगन्नाथ! गृहाण मम वन्दनाम्॥६॥
स्वर्गात् च्युतविमानाभं चैत्यं तवातिसुन्दरम्।
तं दृष्ट्वाऽपारशान्तिं मे मनः प्राप्नोति सर्वदा॥७॥
अत्युच्चं प्रतिबिम्बं ते भावमुन्नयते मम।
प्रभोऽजित! जगन्नाथ! गृहाण मम वन्दनाम्॥८॥
सम्भूय सर्वकर्माणि सर्वशक्तिं हरन्ति मे।
तव सङ्गो मिलेत्तर्हि सर्वत्र विजयो मम॥९॥
अजयोऽसि शरण्यस्त्वं रक्ष मां भवभयात्सदा।
प्रभोऽजित! जगन्नाथ! गृहाण मम वन्दनाम्॥१०॥
संवेदनानि मच्चित्ते भवन्ति तव दर्शनात्।
वक्तुकामास्ति मे जिह्वा तथापि स्खलति प्रभो!॥११॥
स्वीकुरु किङ्करत्वेन प्रार्थयेऽहमिति प्रभो!।
प्रभोऽजित! जगन्नाथ! गृहाण मम वन्दनाम्॥१२॥
संसारे सर्वथा दुःखं सुखं मन्ये तथाप्यहो।
सुखं तु मृगतृष्णावत् सुखमिच्छामि तर्ह्यपि॥१३॥
इति मिथ्यात्वग्रन्थिं मे विलीनं कुरु हे प्रभो!।
प्रभोऽजित! जगन्नाथ! गृहाण मम वन्दनाम्॥१४॥
मज्जीवनेऽन्धकारो हि त्वत्पार्श्वे ज्ञानदीपकः।
मच्छ्वासोश्वासमध्ये त्वं वासं कुरु सदा प्रभो!॥१५॥
मुक्त्यंशु ज्ञानसज्ज्योतिर्जीवने मे प्रदीपय।
प्रभोऽजित! जगन्नाथ! गृहाण मम वन्दनाम्॥१६॥

## ॥श्रीसम्भवनाथस्तुत्यनुवादः॥

रागद्वेषादियुग्मानि जितानि येन सत्त्वरम्।
नामितातिसुरासुरवैमानिकगणानि च॥१॥
आलुप्यन्ते सुरेन्द्राणां शिरांसि यस्य पादयोः।
जय प्रभो! जगत्स्वामिन्! सम्भवेश! नमाम्यहम्॥२॥
सावत्थीनगराधीशो विख्यातो यो जगत्त्रये।
त्रिलोके भाग्यवन्तौ हि पितरौ तव जन्मतः॥३॥
इक्ष्वाकुवंशजः सेना-जितारि-नृप नन्दनः।
जय प्रभो! जगत्स्वामिन्! सम्भवेश! नमाम्यहम्॥४॥
जन्मकाले त्वदीयेऽभूद्-घण्टानादः सुरालये।
ज्ञात्वा त्वज्जन्म सर्वेन्द्रा हृष्टास्तुष्टाः प्रमोदतः॥५॥
त्वां प्रक्षालय सुरा मेरौ शुचिर्भूताः स्वयं हि ते।
जय प्रभो! जगत्स्वामिन्! सम्भवेश! नमाम्यहम्॥६॥
स्वर्णस्येव वपोः कान्ति-रश्वलाञ्छनलाञ्छितः।
चतुःशतधनुस्तुङ्गो यद्देहो दीप्यतेऽद्रिवत्॥७॥
यः षष्ठिलक्षपूर्वायुः परिपाल्य शिवं गतः।
जय प्रभो! जगत्स्वामिन्! सम्भवेश! नमाम्यहम्॥८॥
अष्टम्यां श्वेतफाल्गुन्यां मृगशीर्षे चतुर्दशे।
मार्गशीर्ष्यां च कृष्णोर्जे पञ्चम्यां चैत्रशुक्लके॥९॥
पञ्च कल्याणका यस्य जाता एतद्दिनेष्वहो।
जय प्रभो! जगत्स्वामिन्! सम्भवेश! नमाम्यहम्॥१०॥
स्वधर्मिभक्तिना येन जिनकर्म निकाचितम्।
कैवल्यं प्राप्य तीर्थस्य तूर्णं संस्थापनं कृतम्॥११॥
हिताय सर्व जीवानां प्रदत्ताऽद्भूतदेशना।
जय प्रभो! जगत्स्वामिन्! सम्भवेश! नमाम्यहम्॥१२॥
त्वय्यनन्तगुणाः सन्ति गातुं न केऽपि शक्नुयुः।
त्वत्शक्तिरस्ति निःसीमा मातुं न केऽपि शक्नुयुः॥१३॥
त्वद्भक्तिशक्तिना भक्तास्त्वत्सादृश्यमवाप्नुयुः।
जय प्रभो! जगत्स्वामिन्! सम्भवेश! नमाम्यहम्॥१४॥
भवाम्भोधिनिमग्नोऽस्मि ततो मां तारय प्रभो!।
मादृशाः सर्वजीवा हि तानपि तारय प्रभो!॥१५॥
मुक्त्युंशुज्ञानदीपेन जीवनं मे प्रकाशय।
जय प्रभो! जगत्स्वामिन्! सम्भवेश! नमाम्यहम्॥१६॥

# सत्यवृत्तान्तः

## सत्त्वं विना सिद्धिर्न भवति

-दर्शरक्षितविजयो मुनिः

अस्मिन् जगति द्वे तत्त्वे विना मनुष्यो भौतिकक्षेत्रे आध्यात्मिकक्षेत्रे च गतिं प्रगतिं च न करिष्यति। ते द्वे तत्त्वे इमे भवतः—

प्रथमं सङ्कल्पः।

द्वितीयं सत्त्वम्।

कार्यस्यारम्भकाले शुभसङ्कल्पः कार्यं प्रति प्रेरयति मनुष्यम्। तदैव सत्त्वं कार्यपूर्णतां प्रति नयति मनुष्यम्। यस्य जीवने इमे द्वे तत्त्वे स्तः तस्य जीवनं प्रतिदिनं प्रगतिशीलं भवति।

यदा हिन्दुस्थान-पाकिस्तानयोर्विभागो जातस्तदा नेमिनाथप्रभूणां कल्याणकैः पवित्रं रैवताचलतीर्थं पाकिस्तानविभागे गतम्। तदा जूनागढप्रदेशस्य समीपवर्ती वम्पलीनामैकः पुरातनो ग्रामोऽस्ति। तस्मिन् ग्रामे एका वृद्धा स्थविरा वसति स्म। एतद्वृत्तान्तं श्रुत्वा तस्याः स्थविराया अक्षिभ्यां मुक्ताफलसन्निभान्यश्रूणि क्षरन्ति। नेमिनाथप्रभूणां विरहेन सा विलपति मम जीवनं कथं चलिष्यति? प्रभुं





विनाहमनाथास्मि। तस्मिन् समये तया मनसि शुभसङ्कल्पः कृतो यावद् गिरनारतीर्थं हिन्दुस्थाने नागमिष्यति तावदहं निर्जलोपवासं करिष्यामीति। सङ्कल्पबलं सत्त्वं विना न सिद्धिं याति।

स्थविराया एकं द्वे त्रीण्येवं कृत्वा पञ्चदशदिनान्यतीतानि। नगरेऽयं वृत्तान्तः प्रसृतः। सर्वेऽपि नगरजना वृद्धां बोधितुमागताः। तथापि स्थविरा स्वप्रतिज्ञातो न विचलिता। सैवं कथयति— अहं मरिष्यामि किन्तु रैवताचलं पाकिस्तानप्रदेशे संयुज्यमानं न द्रक्ष्यामि। शुभसङ्कल्पेन कृतां प्रतिज्ञां सा स्थविरा प्रचण्डसत्त्वेनावहति। षष्ठितमोपोषिते कृते सति शुभवृत्तान्त आगतः। गिरनारतीर्थं हिन्दुस्थाने आगतमिति। इदं शुभवृत्तान्तं श्रुत्वा स्थविराया मनः आनन्देनोल्लसितम्। अत्यानन्देन तस्या आत्मापि देहं त्यक्त्वा देवगतिं प्राप्तवान्। उक्तं च—

**क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे।**

# ॥तात्पर्यं कथानकस्य॥

-प्रशमरक्षितविजयो मुनिः

कौ बलवान्? अन्यदा प्रादुर्भूतः सन्ध्यासमयः, उपविष्टवान् तरुतले भगवान् बुद्धः। आगत आनन्दस्तस्य प्रियतमः शिष्यः।

आनन्दः— भगवन्!... अस्मिन् जगत्यतीव कठिनत्वेन पाषाणमेवास्ति किं वान्यत्?..

बुद्धः— वत्स! ओम्....। किन्तु जलं तु पाषाणादपि कठिनतरम्।

आनन्दः— भगवन्! न प्रतिभासते सम्यगिदम्। यज्जलं पाषाणादपि कठिनतरमिति।

बुद्धः— उत्सुको मा भूद्। यतः सततं वहति जलम्, खण्ड्यते वहत्या जलधारया कठिनतरोऽपि पाषणः।

आनन्दः— सम्यग्....., गुरुदेव! सम्यग्... सत्यमुक्तं भवता।

अथ गुरुदेव! जलादपि कठिनतरं किञ्चिदस्ति न वा?

बुद्धः— ओम्...! आनन्दर्षे! ओम्...! वह्निस्तु जलादपि कठिनतरोऽस्ति। यद्वह्निर्जलं तापयति ज्वालयति नाशयति च।

आनन्दः— भगवन्! किं वा वह्नेरपि कठिनतरमस्ति?

बुद्धः— किञ्चिद् विहस्य कथयति, वत्स! मेघधारा तु वह्नेरपि कठिनतरास्ति। किञ्च स्थितजलमेघजलयोर्महदन्तरं विद्यते। वह्निस्तु स्थितजलं ज्वालयेत् किन्तु स मेघजलं ज्वालयितुं न प्रभवेत्... मेघजलधारा त्वविरतपतनाद् वह्निमपि शामयेत्। अतो वह्नेरपि कठिनतरा मेघधारा एव।

अथ बुद्धं प्रति प्रत्येकपृष्टप्रश्नप्रत्युत्तरैः प्रभूतानन्दितो ज्ञानवृद्धिं गतश्चानन्दो मेघादपि बलवत्तरं किमिति पृच्छति।

बुद्धः— वायुः खलु मेघादपि बलवत्तरः। यन्न निष्णातपवनं विना कोऽपि मेघधारां निरसितुमलम्।

आनन्दः— अहो श्रुतं भगवन्! प्रत्युच्यतां वायोरपि को बलवत्तरः?...

बुद्धः— सङ्कल्पस्तु वातादपि बलवत्तरः। यतः सङ्कल्पः खलु पाषाण-जल-वह्नि-मेघधारा-वातानां विषयोऽस्ति। न कोऽपि तं प्रत्याघातुं समर्थोऽतः सर्वेषां बलवत्तमः सङ्कल्प एव।

बुद्धस्य प्रत्युतरादनन्दो निःसंशयीभूतः।

**तात्पर्यम्**

यः कार्यसिद्धिं यावत् न विचलति, पराभवस्य विचारं न करोति स एव सङ्कल्पः। विना सङ्कल्पं न कार्यसिद्धिः। किन्तु स दृढोऽपेक्षते। यथा सङ्कल्पः तथा सिद्धिः...

यत्र यत्र कार्यसिद्धिर्दृश्यते, तत्र तत्र सङ्कल्प एव कारणम्। प्रतिदिनं सत्सङ्कल्पेन दिनारम्भः कर्त्तव्यः। अस्माकं जीवनेऽस्ति सङ्कल्पोऽनिवार्यः। जीवनविकासस्य मूलं सङ्कल्प एव। सर्वेषां समीपे बलमस्ति, परन्तु तद्बलं सङ्कल्पाभावेन कार्यप्रवणं न भवति। अतः प्रतिज्ञायते सङ्कल्प एव मम जीवनमन्त्र इति।

## वैदेशिकी वार्ता

-दिव्यदर्शनविजयो मुनिः

तन्मयो भव !

कश्चिद्ग्रामे कापि माता बालस्योत्थानार्थं स बाल महान् व्यक्तिर्भवेदिति भावनयात्यन्तं शीतायनेऽप्यन्वहं प्रातः तं बालमुत्थाप्य सङ्गीतशास्त्रस्याध्ययनार्थं प्रेरयति। सा-रे-ग-मेत्यादि स्वरान् पौनःपुन्येनावर्तयितुकामास्ति सा माता।

तदा तस्या गृहे दारिद्र्यताण्डवं चलन्नस्ति। साशक्तापि प्रतिगृहं कार्याणि कृत्वा रूप्यकानि सञ्चयति स्म। धैर्यमवलम्ब्य सा पुत्रं सदैव प्रेरयति स्म। वत्स! मम जीवनं यद्यपि निष्फलं जातं तथापि त्वदाशासञ्जीवन्यौषधं हृदि धृत्वा सन्तिष्ठामि। यतो मत्पुत्रः सङ्गीतज्ञो भूत्वा मम कुलस्य नामोन्नतिं कुर्यात्। मत्कृते आशास्पदं स्थानं त्वमेवासि। अतः श्रममवगण्य सफलीकुरु मम जीवनम्। स मातृभक्तः पुत्रः तस्या आज्ञां शिरोवधार्य इतोऽपि लक्ष्ये दत्तचित्तो अभूत्। किन्तु शीतायने यदा स अभ्यासार्थं ब्राह्मे मुहूर्ते उपविश्यति तदा तस्य हस्तयोः कम्पनमभवत्। दन्ताः ध्वनिमकुर्वन्। सर्वाणि गात्राणि कम्पितानि। तदा स मातरं वदति मातः! शैत्यप्रभावेनानिश्चलोऽहम्। कुण्ठितं मे शरीरम्। नाहं सा-रे-ग-म-पेत्यादि स्वरानावर्तयितुं समर्थः। मां क्षमस्वेति।

तदा माताकथयत्। हो सौम्य! त्वं पाठकरणे यद्यप्यसमर्थोऽसि तथापि यदि अभ्यासे तल्लीनो भविष्यसि तर्हि त्वत्कृतेऽशक्यं नास्ति। तन्मयो भव। नासि तल्लीनस्त्वं तस्मात् शैत्यं बाधते। अभीष्टसिद्धिं यावन्मा तिष्ठ। कठोरं परिश्रमं कुरु। अयमेव ते समयः। सफलं कुरु जीवनं आवयोः।

मातुः प्रेरणादायकं वचनं श्रुत्वा स बालकः तन्मयतामङ्गीकृत्य स्वरपाठं करोति। तदा तु शैत्यबाधापि दूरे एव तिष्ठति। भावानानुसारेण शास्त्रं फलं यच्छति। अयमेव बालकोऽग्रे गत्वा लियाखतखान इति नाम्ना सङ्गीतक्षेत्रे प्रसिद्धिमगात्। सङ्गीतक्षेत्रे तस्यापूर्वमसाधारणं च योगदानं वर्तते।

सुन्दरो दृष्टान्तो दार्ष्टान्तिकयोजनाप्यतिसुन्दरेति तु स्वयमूह्यम्।

## स्वल्पं मधुरम्

### ॥षड्विधं कारणम्॥

करोतीति कर्तरि व्युत्पत्तेः स्वेन व्यापारेण कार्ये यदुपयुज्यते तत्कारणम्। तच्च षड्विधम्। तद्यथा—

१) **कर्ता च कारणम्। तस्य कार्ये स्वातन्त्र्येणोपयोगात्। तमन्तरेण विवक्षितकार्यानुत्पत्तेरभीष्टकारणवत्। ततश्च घटोत्पत्तौ कुलालः(कर्ता) कारणं भवति।**

२) करणं च मृत्पिण्डादि कारणम्। तेषां साधकतमत्वात्।

३) **कर्म च कारणम्। क्रियते निवर्त्यते यत्तत्कर्म। कार्यं कार्यनिवर्तनक्रियाविषयत्वात्तस्योपचारात्कारणता कर्मणः।**

४) सम्प्रदानम् च कारणम्। सम्प्रदानं च घटस्य कारणं तस्य कर्मणाभिप्रेतत्वात्। तमन्तरेण तस्याभावात्। सम्यक् सत्कृत्य वा प्रयत्नेन दानं सम्प्रदानम्। अत एव रजकस्य वस्त्रं ददातीति न सम्प्रदाने चतुर्थी, किन्तु ब्राह्मणाय घटं ददातीति।

५) **अपादानं च कारणम्। विवक्षितपदार्थापायेऽपि तस्य ध्रुवत्वेन कार्योपकारकत्वाद् दो अवखण्डने दानं खण्डनमपसृत्य मर्यादया दानमपादानम्। पिण्डापायोऽपि मृदो ध्रुवत्वादपादानतेति। सा च घटस्य कारणं तामन्तरेण तस्यानुत्पत्तेः।**

६) सन्निधानं च कारणम्। तस्याधारतया कार्योपकारत्वात्। सन्निधीयते यत्र कार्यं तत्सन्निधानमधिकरणम्।

**॥इति सङ्क्षेपतो षड्विधकारणविचारः॥**

### ॥ननु चेदुच्यते॥

१) **सङ्घस्य प्रवचनं तीर्थमिति चेतौ शब्दौ किमेकार्थावुत भिन्नार्थौ?**

उच्यते- यद्यपि **प्रकृष्टं प्रशस्तं वा वचनं** प्रवचनमिति द्वादशाङ्गी **तथापि तरन्ति येन भवोदधिमिति** तीर्थं इत्यपि **द्वादशाङ्ग्येव।**

अत्राधाराधेययोरभेदविवक्षणात् प्रवचनं तीर्थं च सङ्घ इत्युच्यते।

१) तीर्थङ्कराः केन कारणेन सङ्घं प्रणमन्ति?

उच्यते- १) तीर्थकरत्वं प्रवचनवात्सल्यादि कारणाल्लभ्यत्वात् तीर्थकरत्वे सङ्घनिमित्तता भवति। २) पूज्यैर्या सङ्घस्य पूजा कृता अतः सा पूजितपूजा सा च प्रवर्ततां पूजितपूजकत्वाल्लोकस्य। . ३) वैनयिककृत्यं च कृतज्ञताधर्मगर्भं कृतं भवतु, विनयमूलो धर्म इत्याविष्करणार्थमित्येवं कारणत्रितयमिति वक्तुं शक्नुमः।

२) स्तुति-स्तोत्रयोः को विशेषोऽस्ति?

उच्यते- एकश्लोकात्मिका स्तुतिः, अनेकश्लोकात्मकं स्तोत्रमिति वदामः।

३) गम्भीर इति कः पदार्थः?

उच्यते- अलक्ष्यमानहर्षदैन्यादिभावः। तल्लक्षणं चेदम्-

यस्य प्रभावादाकाराः क्रोधहर्षभयादिषु।
भावेषु नोपलभ्यन्ते तद्गाम्भीर्यमुदाहृतम्॥

## ॥सप्त व्यसनफलानि॥

१) द्यूतरमणव्यसनात्-निःसत्त्वं स्यात्।
२) मांसभक्षणात्-निर्दयत्वं स्यात्।
३) मद्यपानात्-विनटना विटम्बना वा स्यात्।
४) वेश्यागमनात्-पवित्रताया नाशः स्यात्।
५) आखेटकात्-आत्महानिः स्यात्।
६) चौर्यात्-अस्वास्थ्यं विश्वासन्यूनत्वं च स्यात्।
७) परदारागमनात्-पापसञ्चयो वैरवृद्धिश्च स्यात्।

इहलोके एतादृशानि व्यसनफलानि भवन्ति अमुत्र परलोके वा दुर्गत्यवाप्तिश्च।

## ॥हास्यं किञ्चित्॥

अद्य शर्करासेवनत्यागस्य एको मासोऽतीतः। प्रतिदिनं अल्पोपहारात्पूर्वं पञ्च किलोमीटरमितं द्रुतलचनम्, न्यूनातिन्यूनं विंशति निमेषानि यावद् व्यायाममिति नियमिता दिनचर्या जातास्ति। चायं काफी च पूर्णतया वर्जिते, केवलं फलानां व्युत्पादितानां (organic) हरितशाकानां च खादनम्, माध्याह्ने द्विवादने रोटिकाशाकानां भक्षणम्, सायङ्काले शुष्कफलानाम्, कालिकानां नूतनफलानां च संसेवनमेवं स्वस्मिन्नियन्त्रणं विहितमस्ति मया। मद्यसेवनम्, मांसाहारं च पूर्णतया स्थगितवानहम्। सर्वान् दुराभ्यासान् च त्यक्तवान्

अधुना मात्रं.....

अनृतकथनस्य स्वभावो नियन्त्रणीयोऽस्ति।

# ॥श्रीफलवर्धि-पार्श्वनाथः॥

-वन्दनरुचिविजयो मुनिः

पूज्याचार्यवादिदेवसूरीश्वराणां '**मेडता**'नगरे चातुर्मासोऽभवत्। ततो ते विहारं कृत्वा **फलोधि**ग्राममगच्छत्। '**फलोधि**'ग्रामे पारसाख्यः श्रावकः पर्यवसत्। एकदा पारसो ग्रामाद्बहिरेकस्मिन् स्थले पुष्पसमूहमपश्यत्। तत्र विद्यमानानि तानि सर्वाणि पुष्पाणि विकसितान्यासन्। नैकमपि पुष्पं म्लानम्। पारसो विचिन्तयति कथमिदं शक्यम्? असौ महान् चमत्कारोऽस्ति। मत्सद्भाग्याच्चास्मिन्नैव नगरे पूज्यपादाः वादिदेवसूरय आगताः सन्ति। अतः तानेव पृच्छामीदं रहस्यविषये। तत्र गत्वा स पृष्टवान् आचार्यभगवतः। आचार्यभगवन्तश्च तच्छ्रुत्वा विचिन्त्यावदन्, तत्रैव गत्वा विशेषवार्तावगन्तव्या भवेदिति।

आचार्याः तत्र गत्वा मनोहरं पुष्पसमूहं दृष्ट्वाकथयन्। अस्मिन् स्थले चमत्कारविशिष्टा जिनप्रतिमा भवेत्। ततो यतनावान् पारसः स्वयमचीखनत्।

तदा च पुण्यप्राबल्येण श्रीपार्श्वनाथपरमात्मनः प्रतिमा प्रादुर्भूता। पारसः स्वगृहस्य समीपे एकस्मिन् कुटिरे देवाधिदेवस्य श्रीपार्श्वनाथपरमात्मनः प्रतिमां स्थापितवान्। कश्चित् कालोऽतिक्रान्तः।

एकदाधिष्ठाको व्यन्तरदेवः पारसं स्वप्नेऽचीकथत्— 'जिनालयं निर्मापयस्व'।

पारसः— 'किन्तु! मत्पार्श्वे धनं नास्ति'

देवः— चिन्ता मास्तु। अक्षतपूजायां मुक्ताः तन्दुलाः स्वर्णदीनारा भविष्यन्ति। किन्त्वेमां वार्तां कदापि कस्मायपि न कथनीया।

पारसो निद्रातो जागृतो भवति। सायंकाले तान् तण्डुलान् काष्ठपेटिकायां स्थापयति।

प्रातः ते सर्वेऽपि तण्डुलाः स्वर्णदीनाराः भवन्ति। पारसो बृहद्द्रव्यजिनालयस्य निर्माणकार्यमारब्धवान्। मेघनादमण्डपसहितत्रिमण्डपोपेतस्य मनोहरजिनालयस्य पूर्णतायाः पूर्वमेव पारसो जिनालयस्योभयत एकमेकं जिनालयं निर्मातुमैच्छत्।

किन्त्वेकदा तस्य लघुपुत्रो जिनालयस्य निर्माणार्थं कुतो धनमानीतमिति पौनःपुन्येन साग्रहं पृच्छति।

तदा पारसो बालकस्य पार्श्वे सर्वं व्यतिकरं कथयति। द्वितीयदिने तु काष्ठपेटिकातः सर्वे तण्डुला एव आगच्छन्ति। न स्वर्णदीनाराः। त्रिजिनालयनिर्मापनेच्छा न पूर्णतां गता॥

कालान्तरेण मुख्यजिनालये श्रीमतः पार्श्वनाथप्रभोः प्रतिष्ठा श्रीवादिदेवसूरेः पट्टालङ्कारेण श्रीमदाचार्यमुनिचन्द्रसूरिणा वि. सं. १२०४ तमे वर्षे कृता। अद्यापि फलोधिग्रामस्य फलवर्धिपार्श्वनाथप्रभोः दर्शनेन नैके आत्मानः सम्यग्दर्शनं निर्मलं कुर्वन्ति।

तत्स्थानस्थितोर्जा पुनः पुनः जनान् स्वं प्रत्याकर्षयति।

॥श्रीफलवर्धिपार्श्वनाथो जयमाप्नुयात्॥

उपदेशसप्तति
शां/सौ ४/१४
प्रसङ्गधारा-१५

## ॥आर्यत्वमिदं रमणीयतरम्॥

गुर्जरमूलः— डॉ. शरदठाकरः।
अनुवादकः— देवार्यः।

१९६३ तमवर्षस्य वैशाखमासो गगनादग्निज्वालां वर्षयन्नासीत्। सेनाचिकित्सालये रुग्णपर्यवेक्षणाय स्वीये चक्रे निर्गतः डॉ. (केप्टन) वीरेन्द्रमोदी संस्तरे सपट्टं सुप्तं मेजर् एम्. के. मोईडुवर्यमपृच्छत् "गुड् मोर्निंग् मेजर! हाउ आर् यू?" (सुप्रभातं सेनापतिन्! कथमस्ति भवान्?)

"गुड् मोर्निंग्, डोक्टर!" मेजरवर्य औपचारिकतायाः प्रतिघोषमपातयत्। ततो निस्तेजः स्मितं दर्शयित्वा " आई एम् ओ के.! नोट् टू बेड्...." (समीचीनोऽहम्, नापटुतरः) इत्युच्चारयत्।

वैद्यः चिन्तनेऽपतत्। चीनदेशेन सहापतिते युद्धे युध्यमानः मेजरमोईडु अतीवं गम्भीरं प्रहत आसीत्। शत्रोः गोलिका तस्योदरं प्रविश्य पृष्ठभागाद्बहिर्निर्गता आसीत्। दैवकृपया तस्य करोरुका रक्षिता। अन्यथा तु 'नेफानी'सीमायामेव स चिरनिद्रो जातः स्यात्। दीर्णान्त्रस्य शस्त्रचिकित्सां कृत्वा मेजरवर्यस्य प्राणस्तु रक्षितः, किन्तु स्वस्थो मेजरवर्यः पुनः कदापि सस्मितो नाभवत्।

अद्यापि तेन दत्तमुत्तरं निराशापूर्णमासीत्। वैद्योऽपृच्छत् 'अद्य भवान् कथमनुभवति?' इति। तदा मेजरवर्यः उत्तरे 'न तावन्मात्रमशोभनम्' इत्यवदत्। तन्नाम किञ्चिदशोभनं तु वर्तते एवेति।

'मेजरवर्य! किमर्थमीदृशं शिथिलं वदति भवान्? महती देवकृपा! यतो भवान् रक्षितः। स्वस्थोऽखण्डिताङ्गश्च। इतरथेतस्ततो दृष्टिं तु प्रसारयतु। युद्धभूमितो नैकतरोऽप्यखण्डिताङ्गः प्रत्यागतोऽस्ति। 'ओल्वेज्झ् लूक एट् दि ब्राईटर साईड् ओफ् दि थिंग्, मेजर!' (सर्वदापि वस्तून उज्ज्वलांश एव द्रष्टव्यः सेनापतिन्!) सप्ताहाभ्यन्तरे एव भवान् विसृष्टो भविष्यति। "चीयर् अप्, यू ब्रेव् मेन्!" (नन्द त्वम्, धीरपुरुष!) इत्युक्त्वा डॉ. मोदी अन्यतोऽपासरत्।

स्वीये संस्तरे उपविष्टः मेजरवर्यः परितो द्रष्टुं लग्नः। खण्डे यत्र कुत्रापि पश्यतु नाम, सर्वत्र "ब्राईट् साईड्" (उज्ज्वलांशता) दृश्यमाना आसीत्। किदृशी? एकतः कोणस्थे पर्यङ्के "पेराप्लेजिया"रोगेण ग्रस्तः कर्नलदिलबागसिंहः सुप्त आसीत्। आ चतुर्भ्यो मासेभ्यः तस्योभावपि पादौ चेतनाविहिनावास्ताम्। काष्ठवदास्ताम्। तस्य स्फुरद्रूपा भार्या अमृतकौरवर्याहर्निशं तं सेवमानासीत्।

अष्टमाङ्केनाङ्किते संस्तरे "ब्रिगेडियर्"वर्यो अमरप्रकाशो लम्बित आसीत्। शत्रोः यन्त्रशतघ्न्या निर्गता नवा गोलिकाः स्तस्योरःछित्त्वा निर्गता आसीत्। हृदयमेकमेवाखण्डितमासीत्। शस्त्रचिकित्सया दक्षिणफुप्फुसं निष्कासनीयमभवत्। तथा चेतरफुप्फुसं "न्यूमोनिया"वशात्....। अद्य आसार्धत्रयमासाद् "ब्रिगेडियर्"वर्यः श्वासनलिकायाः "एन्टिबायोटिक्स्" औषधस्य च साहाय्येन श्वसन्नस्ति।

चतुर्थाङ्के संस्तरे उपविष्टः "लैफ्टनन्ट" शेखावतवर्य एकाक्ष आसीत्। तृतीयाङ्के पर्यङ्के स्थितो लान्सनायको यदा शिरोभागे गोलिकया प्रहतः, तदादि स्मृतिभ्रष्टो जातोऽस्ति। तथा च नवमाङ्के संस्तरेऽस्ति "ग्रेनेडियर्" यादवः...। एते सर्वे कदा स्वस्थतामुपलभ्य पुनरपि स्वीये गृहे यास्यन्तीति प्रश्नस्योत्तरं कालातीतमेवासीत्। यदि "ब्राईट् साईड् ओफ् द थिंग्" किमपि मन्तव्यमवशिष्टमस्ति, तर्ह्येते सर्वे सप्राणा इत्येव। नवरे तु चीनस्योदधिसदृश्याः सेनाया अभिमुखमप्रतिमोत्साहेन युद्धमाना अस्मदीया असङ्ख्येयाः सैनिका हिमाच्छादितेंऽशुके चिरनिद्रिता जाताः सन्ति। केचन युद्धग्राहमाप्ताः शत्रूणां हस्तं गताः। अन्ये केचन सैनिकाः पश्चात् सरन्तः, धावन्तः, पलायन्तश्च मार्गभ्रष्टीभूय नेपाले, भूटाने, सिक्किमे वा याताः, येषां सत्ताधुना प्राप्यमानास्ति।

किन्तु मेजरवर्यो येन कारणेन खिन्नो जातोऽस्ति, तदन्यदेवास्ति। एतेषां सर्वेषां पुरातनानां मित्राणां दुर्दशां दृष्ट्वा तु तेन मनसि समाधानं प्राप्तमासीत्। किन्तु ह्यस्तने दिने कश्चिन्नूतनो रुग्ण आगतवानस्ति। तं दृष्ट्वा मेजर-मोईडु

आतङ्कितोऽभवत्। सोऽस्ति सुभेदारशिवपालसिंहः। हतभाग्यः स युवा चीनीयानां सम्मुखे वज्रवत् स्थित आसीत्। स तावदयुध्यत्, यावत् शत्रुसैन्येन प्रक्षिप्तं 'ग्रेनेड्' अस्त्रं तस्य दक्षिणांशे आस्फाल्य तं रक्तरञ्जितं नाकरोत्। तेन स चेतनाहीनोऽभवत्। प्रतिपक्षीया यदागत्य तमगृहणन् तदा ते विस्मिता अभवन्। तस्य देहो भूमौ शयित आसीत्, किन्तु तस्य शीर्षं यन्त्रशतघ्न्या उपरि शयितमासीत्। कविप्रदीपवर्यो नितरां सत्यः 'संगीन पे धरकर माथा..... सो गये अमर बलिदानी...' इति।

किन्तु सुबेदारशिवपालस्य भाग्यं यावन्मरणान्तं नासीत्। चेतनरहितदशायामेव स बन्दिग्राहं प्राप्तः। तस्यामेवावस्थायां सः प्रतिपक्षीयानां चिकित्सालये सेवां प्राप्यमान आसीत्। तस्य एकः पाद एको हस्तश्च छेत्तव्यौ अभवताम्।

युद्धविरामस्यानन्तरं यदा चीनीयास्तं भारतीयरक्षकदलाधीनमकुर्वन्, तदा शिवपालसिंहः साक्षात् सैन्यचिकित्सालये एव नीतः। तस्मै 'फिझियोथेरपी' सेवावश्यक्यासीत्। अधुना स मेजर् मोईडुवर्यस्य पार्श्वस्थे एव पर्यङ्के आसीत्।

'किं पठसि, सुबेदार!?' एकदा मेजरवर्यस्तमपृच्छत्। आचतुर्विंशतिहोराभिः सुबेदारः कामपि वार्तां पठित्वा पठित्वा रुदन्नासीत्।

'न किमपि मेजरवर्य! एका वार्तास्ति, या हृदये सङ्क्षोभं जनयति' इति प्रत्युत्तरत् सः।

'अत्रानय तावत्, मह्यमपि यच्छ! शत्रूणां गोलिकाभिर्न भीतः सुबेदारः कामपि वार्तां पठित्वा.....' इति वदन् मेजरवर्यः शिवपालसिंहस्य हस्तात् कर्गजानि बलात् स्व्यकरोत्। कथा आङ्ग्लभाषीया आसीत्। द्वितीये विश्वयुद्धे घटिता सत्या घटना। कश्चिदाङ्गलसैनिको युद्धे क्षतो भवति। तस्यैको हस्तः, एकः पादश्च लुप्तौ भवतः। 'यदाहं गृहं गमिष्यामि तदा सर्वे मम कथं स्वागतं करिष्यन्ति? मम पितरौ किं प्रतिकरिष्यतः?' इति प्रश्नः सर्वदा तस्य मनसि भ्रमन्नासीत्।

आङ्गलसैनिकः पितृभ्यां पत्रं प्रेषयति। तथाहि 'मातः! पितः! मम विद्यतामाश्रित्य भवन्तौ भगवतमुपचरताम्। सप्ताहाभ्यन्तरे एवाहं गृहमागमिष्यामि। किन्तु मया सह ममैकं मित्रमपि वर्तते। यस्यास्मिन् जगति कोऽपि स्नेहितो नास्ति। स यावज्जीवमस्माकं गृहे एव स्थास्यति। भवन्तौ तं मया सह पालयिष्यतो नु? 'प्लीझ्'। नवरं युद्धे तेन स्वीयौ एकं हस्तम्, एकं पादं च लोपितौ स्तः। 'आई होप् यु डोन्ट माइन्ड् ईफ् ही.....'।

अचिरात् तत्रतः प्रत्युत्तरमागतम्। तस्मिन् लिखितमासीत्। 'वत्स! त्वं बाढमागच्छ! किन्तु त्वदीयं तं खञ्जं मित्रं मानय। तस्य स्वीकरणे आवां न सज्जौ। द्वित्रदिनानां कृते आगच्छति चेन्न कापि बाधा। किन्तु **यावज्जीवं तस्य खञ्जस्य सेवाकरणे आवां नोत्सहावहे'** इति।

तदा स आङ्गलसैनिक आत्महत्यामकरोत्। मेजरवर्यस्तमपृच्छत्। आ चतुर्विंशतिहोराभिः सुबेदारः कामपि वार्तां पठित्वा पठित्वा रुदन्नासीत्।

'न किमपि मेजरवर्य! एका वार्तास्ति, या हृदये सङ्क्षोभं जनयति' इति प्रत्युत्तरत् सः।

'अत्रानय तावत्, मह्यमपि यच्छ! शत्रूणां गोलिकाभिर्न भीतः सुबेदारः कामपि वार्तां पठित्वा.....' इति वदन् मेजरवर्यः शिवपालसिंहस्य हस्तात् कर्गजानि बलात् स्व्यकरोत्। कथा आङ्ग्लभाषीया आसीत्। द्वितीये विश्वयुद्धे घटिता सत्या घटना। कश्चिदाङ्गलसैनिको युद्धे क्षतो भवति। तस्यैको हस्तः, एकः पादश्च लुप्तौ भवतः। 'यदाहं गृहं गमिष्यामि तदा सर्वे मम कथं स्वागतं करिष्यन्ति? मम पितरौ किं प्रतिकरिष्यतः?' इति प्रश्नः सर्वदा तस्य मनसि भ्रमन्नासीत्।

आङ्गलसैनिकः पितृभ्यां पत्रं प्रेषयति। तथाहि 'मातः! पितः! मम विद्यतामाश्रित्य भवन्तौ भगवतमुपचरताम्। सप्ताहाभ्यन्तरे एवाहं गृहमागमिष्यामि। किन्तु मया सह ममैकं मित्रमपि वर्तते। यस्यास्मिन् जगति कोऽपि स्नेहितो नास्ति। स यावज्जीवमस्माकं गृहे एव स्थास्यति। भवन्तौ तं मया सह पालयिष्यतो नु? 'प्लीझ्'। नवरं युद्धे तेन स्वीयौ एकं हस्तम्, एकं पादं च लोपितौ स्तः। 'आई होप् यु डोन्ट माइन्ड् ईफ् ही.....'।

अचिरात् तत्रतः प्रत्युत्तरमागतम्। तस्मिन् लिखितमासीत्। 'वत्स! त्वं बाढमागच्छ! किन्तु त्वदीयं तं खञ्जं मित्रं मानय। तस्य स्वीकरणे आवां न सज्जौ।

द्वित्रदिनानां कृते आगच्छति चेन्न कापि बाधा। किन्तु यावज्जीवं तस्य खञ्जस्य सेवाकरणे आवां नोत्सहावहे' इति।

तदा स आङ्गलसैनिक आत्महत्यामकरोत्।

मेजरमोईडुवर्येन समवगतं यत् केन कारणेन सुबेदारशिवपालसिंहो रुदन्नस्तीति। तस्य दैन्यावस्थामवलोक्य सोऽपि हताशोऽभवत्।

अवस्था त्वत्र सुप्तानां सर्वेषां सैनिकानां दैन्योत्पादिक्येवासीत्। मरणं न जातमित्याश्वासनमासीत्। जीवन्नस्तीत्यभिशाप आसीत्। हताशत्वमपि कश्चित् परावर्तको रोगोऽस्ति।

सुबेदारस्य रोगेन मेजरवर्योऽप्यावृत्तोऽभवत्। डॉ. वीरेन्द्रमोदीः तदानीं सूचयन्नासीद् यत् 'लुक् एट् दि ब्रायटर् साईड् ओफ् दि थिंग्' इति। श्वो यदा स आगच्छेत् तदा तस्मै अपि प्रकटं श्रावणीयं यज्जीवनस्य त्रयोऽप्यंशाः प्रकाशयुता भवन्तु नाम, किन्त्वेकोंऽशस्तिमिरावृत्तोऽपि भवति। कदाचिज्जीवनस्य सोऽन्धकारयुतोंऽशोऽपि परीक्षितव्यो भवति। 'डोक्टर्! नोट् ओल्वेझ्, बट् सम् टाइम्स्, यू शुड लूक् एट् दि डार्क साईड् ओल्सो' (वैद्य! न सर्वदा, किन्तु कदाचिद्भवता तिमिरावृत्तोंऽशोऽपि प्रेक्षणीयः)।

द्वितीये दिने तु न, किन्तु पञ्चमे दिने मेजरमोईडुवर्यो वैद्यमहाशयं वाक्शरैरविन्धत्। डॉ. (केप्टन) मोदी यदा 'हेल्लो! मेजर! हाउ डु यू फील् टूडे?' (हंहो मेजरवर्यः! अद्य भवान् कीदृशमनुभवति?) इत्यपृच्छत्, तदा मेजरवर्यो 'नोट् टू बॅड्, केप्टन!' (न अपटुतरः) इति प्रत्युत्तरत्।

'ओह् नो! नोट् अगेईन', मेजरमोईडु! किं भवान् 'बॅड्' 'टु बॅड्' च इत्यनयोर्भेदस्य व्याख्यां श्रावयिष्यति बत?

'तदर्थं न कुत्रापि गमनस्यावश्यकता। भवतः प्रत्यक्षे एव दृश्यमानोऽहमस्मि 'बॅड' इति। तथा च मम पार्श्वे अस्मिन् पर्यङ्के सुप्तो य एषः सुबेदारः, सोऽस्ति 'टू बॅड' इति। स यदा स्वकीयाभ्यामेकेन हस्तेन, एकेन पादेन च गृहं गमिष्यति तदा...'

'वन् मिनिट्, मेजर्! रिक्वेस्ट यु टु स्टोप् दिस्' (मेजरवर्य! क्षणं विरन्तु विज्ञपयामि) अहं जानामि, यद्भवन्तावुभावपि तस्याङ्गलसैनिकस्य वार्तां पठित्वा वैमनस्यमुपागतौ स्तः। किन्तु भवद्भ्यां श्रावणाय मम पार्श्वे काचन शुभा वार्तास्ति।' इति कथयित्वा वैद्यः स्वीयं हस्तं प्रच्छदकस्य (एप्रोन)कोषेऽक्षिपत्, तस्मादेकं कर्गजं निष्कास्य सुबेदारशिवपालस्य हस्ते स्थापितवान्।

'एतत् किमस्ति?' सुबेदारो विस्मितोऽभवत्।

'तवानुजस्य पत्रम्। अद्यैवागतम्। यद्यपि सेनामुख्यकार्यालयेन तव सम्प्राप्त्याः समनन्तरमेव त्वद्गृहे पत्रं प्रेषितमासीत्। तत्र स्पष्टमुल्लिखितमासीत्, यद्युद्धे भवतोः पुत्रेनैकं हस्तम्, एकं पादं च...। एतदस्ति तेषां प्रत्युत्तरम्। सशब्दं पठ। येन न केवलं मेजरवर्य एक एव, अपि त्वस्मिन् खण्डे सुप्ताः सर्वेऽपि सैनिका बुध्यन्तु नाम, यदाङ्ग्लानां भारतीयानां च संस्कृतौ कियान् भेदोऽस्तीति।

सुबेदारः पत्रं पठितुं लग्नः। अनुजो लिखन्नासीत् नमस्ते वडिलभ्रातः! ईश्वरस्य महती कृपा यद्भवान् सदेहोऽस्ति। अम्बातातयोर्हृदि त्वानन्द एव न माति। अशेषो ग्रामो भवन्तमेव प्रतीक्षमाणोऽस्ति। भवदीयेन नायकेन सन्दिष्टं यद्भवत एको हस्तः, एकः पादश्च छिन्नौ स्त इति। भ्रातर्! तेन किं विनश्यति? अहम्, आवयोः अनुजश्च श्व एव आवां भवतः हस्तपादयोः स्थानं ग्रहिष्यावः। भूमौ पादस्थापनस्य क्षण एव नापतिष्यति। भवान् कदा आगच्छति? माता तु भवत्कृते लड्डुकनिर्माणे व्यग्रा जातास्ति। तथा च आवयोरनुजास्ति नु! सा द्वारशोभायाः कृते मङ्गलतोरणानि ग्रथ्यमानास्ति। अशेषो ग्राम एकमेव प्रश्नं पृच्छन्नस्ति, यद् कदा गृहमागमिष्यति...? कदा गृहमागमिष्यति...इति?'

पत्रं श्रुत्वाशेषखण्डं रुदन्नासीत्, ऋते डॉ. मोदी। स सप्रसन्नं स्मितं कुर्वन् तिष्ठन्नासीत्। स भारतीयजनतायाः "ब्राईट् साईड्" (उज्ज्वलांशता) ईक्षन्नासीत्।

## ॥अहं लुप्तोऽस्मि॥

-वचनयोगविजयो मुनिः

प्रातर्नरशुः कुम्भकारो मोदकान् वितरितुं निःसृतः।

गृहाण मगनलाल! मुखं मधुरं कुरु।

मगनलालः- अरे नरशो! एतान् मोदकान् किमर्थं वितरसि? किं जातम्? कश्चिद् नूतनप्रसङ्गोऽभवद् वा?

नरशुः- अरे मगनलाल! आश्चर्यमभवत्।

मगनलालः-किमाश्चर्यमभवत्?

नरशुः-वृत्तान्तस्त्वेवमस्त्यहं प्रतिदिनं सायङ्काले गर्दभोपर्युपविश्य खानिं गच्छामि मृदं च स्वीकृत्यागच्छामि। किन्तु ह्योऽहं कार्ये व्यापृतोऽभवम्, तदा मम गर्दभः कुत्र गत इति न ज्ञातम्। अद्यापि तस्य शोधनं न जातम्। अहं तं न प्राप्तवान्। समग्रायां निशायां मृगयमाणोऽहमश्राम्यम्। पश्य मम नयने किदृग् रक्ते स्तः।

मगनलालः-तत्सत्यम्। किन्तु भोः! गर्दभे लुप्ते सति न कोऽपि मोदकान् वितरितुं प्रवृत्तः त्वदिव मयैतावता दृष्टः।

नरशुः-अरे मगनलाल! त्वमेतन्न सम्यग् बुध्यसि। गर्दभो लुप्तोऽभवत्तदर्थं न मोदकान् वितरामि, किन्तु यदि गर्दभेऽहमुपाविशस्यम्, तदाहमपि लुप्तोऽभविष्यम्। अहं न लुप्तोऽभवम् तस्य कृते मोदकान् वितरामि। नरशू रहस्यपटलमुद्घाटयित्वाग्रे मोदकान् वितरितुमचलत्।

मोदकं खादन् मगनलालस्तु विचारयति— यदा वयं गर्दभं शरीरत्वेन मन्यामहे, कुम्भकारं चात्मत्वेन मन्यामहे, तदास्माभिरप्येवं ज्ञायते यदनन्तकालाद्वयं पार्थिवदेहस्य रक्षणमेतादृशं मत्वैव कुर्मः। यदस्माकं स्वभावदशां न जानीमः। मूर्खता तु नरशुतोऽधिकास्माकं विद्यते।

श्रीशत्रुञ्जयतीर्थमण्डन

## श्रीयुगादिप्रभोः स्तवनाष्टकम्

-आर्जवदर्शनविजयो मुनिः

यो विमलाचलाधीशः पृथीव्यां प्रथमः प्रभुः।
वृषाङ्कः कनकच्छाय ऋषभः पातु वो जिनः॥१॥

यं स्तुवन्ति सुराधीशा भक्तिनिभृतमानसाः।
स्वर्गापवर्गदातारम् ऋषभः पातु वो जिनः॥२॥

कर्मवल्ली हता येन मोक्षमार्गविबाधिका।
शुक्लध्यानकुठारेण ऋषभः पातु वो जिनः॥३॥

यस्मै कृतो नमस्कारः सर्वेप्सितविधायकः।
विघ्नोपशान्तिकर्ता च ऋषभः पातु वो जिनः॥४॥

षड्जीवाभयदानेन यस्मान्नापररक्षकः।
निःश्रेयसपदं भोक्ता ऋषभः पातु वो जिनः॥५॥

राजते यस्य दोःस्तम्भे कुन्तलाली मनोहरा।
दीक्षाग्रहणकाले तु ऋषभः पातु वो जिनः॥६॥

यस्मिन्ध्याते प्रशान्तत्वं जीवे प्रकटति स्फुटम्।
कषायवह्निना दग्ध ऋषभः पातु वो जिनः॥७॥

श्रीनाभिभूपसन्तान! प्रशमनीरवारिधे!।
घोरसंसारवासान्मां प्रभो! रक्षत रक्षत॥८॥



क्षत्रियकुण्डतीर्थनायक

# श्रीवर्धमानजिनस्तवनाष्टकम्

[इन्द्रवज्रावृत्तम्]

नम्रेन्द्रमौलेर्मणिघृष्टपादः
कैवल्यलक्ष्मीवसनैकपद्मम्।
विश्वातिशस्तः शिवमार्गदाता
वः पातु स क्षत्रियकुण्डकेशः॥१॥

श्रीज्ञातवंशाङ्गणकल्पशाखी
सिद्धार्थनेत्राम्बुजघर्मरश्मिः।
मातामुखेन्दुक्रमणान्तरिक्षं
वः पातु स क्षत्रियकुण्डकेशः॥२॥

गर्भे जनित्रीवरभक्तिकारः
कूर्मेव गुप्तेन्द्रियको बभूव।
तस्याश्वशोकं चलनाद् व्यस्राक्षीद्
वः पातु स क्षत्रियकुण्डकेशः॥३॥

संवत्सरद्वादशकाधिषण्णां
मासानि यावद्धि तितिक्षिता ये।
सर्वोपसर्गाः क्षमया तु येन
वः पातु स क्षत्रियकुण्डकेशः॥४॥

हर्यक्षलक्ष्मा कनकस्य कान्तिर्यः
सप्तहस्तोच्छ्रितदेहधारी।
वर्षं द्विसप्तत्यखिलायुजीवी
वः पातु स क्षत्रियकुण्डकेशः॥५॥

ध्यानाग्निना कल्मषकाष्ठदाही
लोकाग्रभागं प्रति गामुको यः।
ज्ञानं सदैवं प्रददाति सम्यग्
वः पातु स क्षत्रियकुण्डकेशः॥६॥

देवाधिदेवोऽन्तिमतीर्थराजो
मोहान्धसूर्यो भुवि केकिमेघः।
त्रिविष्टपेशः प्रशमापवार्धिर्वः
पातु स क्षत्रियकुण्डकेशः॥७॥

मेधाविहीनेन मया स्तुतस्त्वं
त्वय्येव भक्त्या मुखरीकृतेन।
बालोऽपि किं नो निजतातपार्श्वे
स्नेहप्रकर्षाद् वदते स्ववाचा॥८॥

# कर्मसाहित्यम्

मूलकर्ता-देवर्धिः
अनुवादिका-साध्वीजी श्रीविरागदर्शनाश्रीः

कर्मसिद्धान्तो जैनधर्मस्य विशिष्टं तत्त्वज्ञानमस्ति। कर्मविषयकं विश्लेषणं विवेचनं च आगमग्रन्थेषूपलब्धमस्ति। कर्मणो निरुपणायानेका आगमेतरग्रन्था अपि रचिताः। श्वेताम्बरमूर्तिपूजकपरम्परानुसारेण श्रीशिवशर्मसूरिमहा., श्रीचन्द्रर्षिमहत्तर-श्रीजिनवल्लभसूरिमहा., श्रीदेवेन्द्रसूरिमहा. इत्यादयो बहवो ग्रन्थकाराः कर्मसाहित्यं रचितवन्तः।

दिगम्बरपरम्परानुसारेण श्रीनेमिचन्द्रमहा., श्रीचामुण्डारायश्रीः, श्रीमाधवचन्द्रमहा. इत्याद्यनेका ग्रन्थकाराः कर्मसाहित्यस्य नूतनग्रन्थसर्जनमकुर्वन्।

अर्वाचीना अपि केचन ग्रन्थकाराः कर्मविषयकनूतनग्रन्थरचनां कृतवन्तः।

॥श्वेताम्बरमूर्तिपूजकपरम्परा॥

प्राचीनग्रन्थेषु टीकाग्रन्थाः

१) श्रीनन्दनसूरिमहा..

(१) चतुर्थकर्मग्रन्थटीका (२) द्वितीयकर्मग्रन्थटीका

नूतनग्रन्थरचना॥

१. श्रीप्रेमसूरिमहा.
   (१) मार्गणाद्वारविवरणम् (२) कर्मसिद्धिः
   (३) सङ्क्रमकरणम्
२. श्रीनन्दनसूरिमहा. – समुद्घाततत्त्वम्
३. श्रीधर्मधुरन्धरसूरिमहा. – कर्मप्रवादमीमांसा
४. श्रीवीरशेखरसूरिमहा.
   (१) बन्धविहाणं
   (२) बन्धविहाणउत्तरपयडिस्थानप्ररूपणा—१
   (३) बन्धविहाणउत्तरपयडिस्थानप्ररुपणा—२
   (४) बन्धविहाण-उत्तरपयडिभूयस्कारादिबन्धः—१
   (५) बन्धविहाण-उत्तरपयडि-भूयस्कारादिबन्धः—२
   (६) बन्धविहाणाउत्तरपयडि भूयस्कारादि बन्धः—३
५. श्रीगुणरत्नसूरिमहा.
   (१) खवगसेढी (२) खवगसेढी टीका (३) उपशमनाकरणम् (४) बन्धविहाणमूल-पयडिबन्धटीका
६. श्रीजगच्चन्द्रसूरिमहा.

(१) बन्धविहाणमूल-पयडठिई बन्धटीका

(२) बन्धविहाणउत्तरपयडि ठिईबन्धटीका

७. श्रीविचक्षणसूरिमहा. – बन्धविहाणउत्तरपयडि-बन्धटीका

८. श्रीजितेन्द्रसूरिमहा. – बन्धविहाणउत्तरपयडी-रसबन्धटीका

९. श्रीजयघोषसूरिमहा. – बन्धविहाणउत्तरपयडि-पएसबन्धटीका

१०. श्रीराजशेखरसूरिमहा. – बन्धविहाणमूलपयडि-पएसबन्धटीका

११. श्रीराजशेखरसूरिमहा. – बन्धविहाणमूलपयडि-रसबन्धटीका

१२. श्रीबुद्धिसागरसूरिमहा. – (१) कर्मयोगः (२) कर्मप्रकृतिः

दिगम्बर-स्थानकवासी-तेरापन्थीपरम्परायां कर्मविषयकनूतनसाहित्यरचना प्रायो नाभूत्।

(अर्वाचीना ग्रन्थकाराः प्रायः षड्विंशति (२६) कर्मविषयकान् नूतनग्रन्थान् रचितवन्तः। ते प्राचुर्येण हिन्दी-गुजराती–आङ्ग्लभाषामाध्यमम् अङ्गीकृतवन्तः।)

## ६.व्याकरण साहित्यम्

प्राकृत-संस्कृतभाषयोः साङ्गोपाङ्गाध्ययनाय व्याकरणग्रन्थरचनां प्राचीनग्रन्थकारा अकुर्वन्। श्वेताम्बरपरम्परायां श्रीबुद्धिसागरसूरिमहा., श्रीहेमचन्द्रसूरि महा., श्रीमलयगिरिसूरिमहा. श्रीमेघविजयमहा. श्रीविनयविजयमहा. इत्यादयः। दिगम्बरपरम्परायां त्रिभुवन-श्रीदेवनन्दिनी, श्रीशाकटायनश्री इत्यादयो ग्रन्थकाराः नूतनव्याकरणग्रन्थरचनां कृतवन्तः।

अर्वाचीना ग्रन्थकाराः संस्कृते प्राकृते च व्याकरणरचनां चक्रुः।

### ॥श्वेताम्बर-मूर्तिपूजक-परम्परा॥

### ॥प्राचीनव्याकरणेषु टीकाग्रन्थाः॥

१. श्रीचन्द्रसागरसूरिमहा.
– श्रीसिद्धहेमशब्दानुशासनटीका

२. श्रीलावण्यसूरिमहा. –
(१) सिद्धहेमशब्दानुशासनन्यासानुपूर्तिः
(२) न्यायार्थसिन्धुतरङ्गवृत्तिः

३. श्रीधर्मधुरन्धरसूरि म.
(१) सिद्धहेमशब्दानुशासन पद्यटीका
(२) प्राकृतव्याकरणपद्यटीका
(३) सिद्धहेमशब्दानुशासनप्रशस्तिविवरणम्।

४. श्रीदर्शनरत्नसूरिमहा. – सिद्धहेमशब्दानुशासनटीका

५. श्रीविमलसूरिमहा.- सिद्धहेमशब्दानुशासनटीका

### ॥नूतनव्याकरणग्रन्थरचना॥

१. श्रीनेमिसूरिमहा.
(१) बृहद्धेमप्रभा (२) लघुहेमप्रभा

२. श्री आनन्दसागरसूरि म.
(१) सिद्धप्रभा (२) मध्यमसिद्धप्रभा (३) लघुसिद्धप्रभा

३. श्रीलावण्यसूरिमहा.
(१) हेमचन्द्रिका (२) धातुरत्नाकरः

### ॥दिगम्बर-परम्परा॥

प्रायः किञ्चित् नूतनव्याकरणग्रन्थरचना न भूता।

### स्थानकवासी-परम्परा

(१) आर्हत्-व्याकरणम् (२) आर्हत् व्याकरण-टीका
(३) प्राकृतकौमुदी (४) प्राकृतचिन्तामणिः
(५) न्यायरत्नसारः (६) न्यायरत्नावलिः
(७) न्यायरत्नावलि – टीका

### ॥तेरापन्थीपरम्परा॥

१. श्रीचौथमलमहा.
(१) भिक्षुशब्दानुशासनम्
(२) भिक्षुशब्दानुशासन–उणादिवृत्तिः
(३) भिक्षुन्यायदर्पण बृहद्वृत्तिः
(४) कालकौमुदी

२. श्रीमहाप्रज्ञमहा. – तुलसीमञ्जरी (प्राकृत व्याकरण)

३. श्रीचन्दनमलमहा.

४. श्रीरघुनन्दनशर्मा
(१) भिक्षुशब्दानुशासनबृहद्वृत्ति (२) भिक्षुलिङ्गानुशासनम्

५. श्रीधनराजश्री म. – भिक्षुशब्दानुशासनलघुवृत्तिः

६. श्रीसोहनलालमहा. – तुलसीप्रभाप्रक्रिया

(अर्वाचीना ग्रन्थकाराः प्राकृत-संस्कृतभाषयोर्नव्यव्याकरणग्रन्थान् अलिखन्। हिन्दी-गुजराती-आङ्ग्लभाषासु रचिता मार्गदर्शका अपि प्रभूतसङ्ख्यका ग्रन्थाः सन्ति। ते प्राकृत-संस्कृतभाषाध्ययने उपयुज्यन्ते)

## ॥श्रेयः स्तुत्यष्टकम्॥

-साध्वीजीश्रीक्षमानिधिश्रीः

प्राप्यते पूर्णसद्भाग्यैः सद्गुरोर्दर्शनं परम्।
तद्गुणानां स्तुतिस्तत्र महाभाग्यैरवाप्यते॥१॥

भाग्येन सद्गुरुः प्राप्तः सद्गुणानां गणो महान्।
तत्रापि पञ्च प्रोच्यन्ते सुधाबिन्दुस्तु जीवने॥२॥

प्रभुप्रीतिः प्रसत्तिश्च प्रज्ञा-परिणतिर्वरा।
प्रकृतिश्च गुणा एते दृष्ट्वा प्रीणन्ति सज्जनाः॥३॥

दृश्यते तीर्थकृत्**प्रीति**र्वचने वर्तने गुरोः।
स्तवने विमलाचारे विचारेऽपि शुभावहा॥४॥

सुखोदयेऽपि निर्लोपो दुःखोदये समाधिभाक्।
**प्रसत्ति**र्वदने नित्यं भव्याकर्षणकार्मणम्॥५॥

विकटे सङ्कटेऽप्येष सावद्यं नैव भाषते।
प्रज्ञा**प्रतिभ**यैवं स समुद्धरति प्राणिनः॥६॥

पदार्थपुद्गलासक्तिं विहाय स्थिर आत्मनि।
**परिणते**ः प्रभावोऽयम् आश्रितेऽप्यनुभूयते॥७॥

सौम्यः शशीव तेजस्वी सूर्यवत् सद्गुणालयः।
"**क्षमानिधि**"श्च निःसङ्गः **प्रकृत्या**श्रितवत्सलः॥८॥



## सम्यग्दर्शनम्....

### सम्यग्दर्शनाधिकारिणो गुणत्रयोदशी

-साध्वीजीश्रीनम्रगिराश्रीः

विश्वेऽस्मिन् यस्य कस्यापि श्रेष्ठवस्तुनः प्राप्त्यै योग्यतावश्यकी। जगति सर्वेषु वस्तुषु परमं श्रेष्ठं च किं वस्तु? इति विचार्यते चेदुत्तरं भवति सम्यग्दर्शनम्। अतः तत्प्राप्त्यै तु परमा योग्यतापेक्षितेति तु सर्वसम्मतम्। सम्यग्दर्शनाधिकारित्वप्रापणे महत्प्रयासः कर्तव्यो भवति। किन्तु कथं तदधिकारित्वप्राप्तिर्भवेत्तदर्थं श्रीहितोपदेशग्रन्थे सम्यग्दर्शनाधिकारिणः त्रयोदशगुणाः प्रोक्ताः सन्ति। तदाधारेण सम्यग्दर्शनस्य प्राप्तिर्भवेत्। तद्यथा—

दढधम्मरायरत्ता कम्मेसु अनिंदिएसु य पसत्ता।
वसणेसु असंक्खुद्धा कुतित्थिरिद्धीसु वि अमुद्धा॥
अक्खुद्दा य अकिविणा अदुराराहा अदीणवित्ती य।
हियमियपियभासिल्ला संतोसपरा अमाइल्ला॥
धम्मपडिकूलकुलगणजणवयनिवजणयसयणअक्खोभा।
जणसम्मयो य पुरिसा सम्मत्तऽहिगरिणो हुंति॥

१) धर्मे दृढरागः
२) अनिन्द्यकर्मण्यनुरक्तिः
३) व्यसनेष्वचलता
४) कुतीर्थिकस्य तपादिसिद्धिष्वमोहः
५) अक्षुद्रः (विचारवृद्धः)
६) अकृपणः (उदारः)
७) प्रज्ञापनीयः (आराध्यः)
८) अदीनवृत्तित्वम्
९) हितमितप्रियवादी
१०) सन्तोषी
११) अमायावी (सरलहृदयी)
१२) धर्मद्विड्भ्योऽक्षोभकः
१३) सर्वजनप्रियः

सम्यग्दर्शप्रापणस्य आद्यो गुणो वर्तते धर्मे दृढानुरागित्वम्। तर्हि प्रश्नो भवति। को नाम धर्मः?

उत्तरम्- दुर्गतिप्रसूतान् जीवान् धारयति सद्गतिं परमगतिं च प्रापयतीति धर्मः। एतादृशो धर्मो वीतरागप्ररूपित एव। अन्येषां सावद्यत्वादपूर्णत्वाच्च।

कीदृशो दृढधर्मरागः? उच्यते— कस्यचित् निर्जने वने सम्प्राप्तस्यातिबुभुक्षितस्य दारिद्र्यसम्पन्न ब्राह्मणस्याकस्माल्लब्धघृतकुम्भवत्। तस्मिन् घृतकुम्भे ब्राह्मणस्य यादृशो रागस्ततोऽनन्तगुणाधिको धर्मे रागो दृढधर्मानुरागो भवति।

कदा केन च मार्गेण स दृढधर्मरागो लभ्यते? उत्तरम्- इष्टसाधनताज्ञानस्य यो विषयस्तस्मिन् विषये दृढरागो भवतीति सर्वेषामनुभवः। अते यदि धर्मस्येष्टसाधनताज्ञानं भवति चेत् धर्मे निश्चयेन दृढरागो भवेत्। तच्च एवं मार्गेण भवेत्। संसरणशीलः संसारो नित्यः। कृत्स्नकर्मणां क्षयान्मोक्ष इति च सर्वेषां ज्ञानम्। स च कृत्स्नकर्मक्षयो शुद्धधर्मजन्यः। नामात्र कृत्स्नकर्मक्षयः साध्यः। तस्येष्टसाधनं भवति शुद्धधर्मः। शुद्धधर्मे भवतीष्टसाधनता। अतस्तस्मिन् शुद्धधर्मे भवति दृढरागः। दृढरागोत्पन्नेऽपि तस्य सर्वदा भवनाय शास्त्रपठनम्। शास्त्रे चिन्तितस्य धर्मस्य पौनःपुन्येनालोचनमावश्यकम्। एवं मार्गेण भवेद्दृढधर्मानुरागः। एवं धृतधर्मजीवेऽन्येषां प्राणिनां प्रभावो न भवति। योगशास्त्रग्रन्थेऽपि प्रतिपादितमिदं यद् राक्षसयक्षसर्पादयः तस्मिन्जीवे न प्रभवन्तीति।

जैनवाङ्मये धर्मस्य कृते कल्पवृक्षादिसमोपमाः प्रदर्शिताः। किन्तु ता न परिपूर्णाः। तद्यथा— धर्मः कल्पवृक्षोपमश्चिन्तामणितुल्यो वेति बहुत्र लभ्यते। कल्पवृक्षः प्रार्थयितारमिष्टफलं ददाति। किन्तु स कदापि चिरन्तनरूपं मोक्षसुखं दातुं न समर्थः। चिन्तामणिरपि लौकिकं चिन्तितं वस्तु दातुं प्रभवति। किन्तु धर्मस्तु शाश्वतं सुखं यच्छति। यदवाप्य पुनरवाप्तुं किमपि नावशिष्यते इति सर्वतो माहात्म्यं धर्मस्येति विवेकः।

# ॥आर्यसंस्कृतिः॥

-साध्वीजीश्रीतत्त्वप्रियाश्रीः

अर्यते गम्यते प्राप्यते सदाचारमर्तुमाचरितुं योग्यो वास आर्यः। । न्यायपथावलम्बी, प्रकृताचारशीलः, सततकर्तव्यकर्मानुष्ठातेति। यदुक्तम्—

**कर्तव्यमाचरन् काममकर्तव्यमनाचरन्।**
**तिष्ठति प्रकृताचारे स आर्य इति स्मृतः॥**

सम्यक् कृतिः संस्कृतिः सम् = सम्यक् कृतिः = आचारः। यत्र प्रकृतौ विकृतिर्नास्ति। नाम विकृतेः कुत्रचित् किञ्चिदपि स्थानं नास्ति। प्रकृत्यां नाम प्रजायां, केवलं न प्रजायां किन्तु प्रजापालकेऽपि कश्चिदपि विकारो न विद्यते। अथवा यत्र सदाचारं प्रति गम्यते सार्यसंस्कृतिः। यत्र सदाचारं प्राप्यते सा आर्यसंस्कृतिः।अथवा यत्र सदाचारमेव विद्यते नाम सदाचारस्यैकछत्रं साम्राज्यं गम्यते। (अधिगम्यते)
सार्यसंस्कृतिः।रूढ्यर्थस्त्वात्मपुण्यपापपरलोकदेवगुर्वादिषु श्रद्धा। यथा धर्मात्सुखमधर्माद्दुःखमिति या धारणा तदार्यसंस्कृतेर्वास्तवम्।

कलिकालेऽस्माकं पापोदयो वर्तते। अतः शनैः शनैः आर्यसंस्कृतेर्हननमभूत्। इदानीन्तनं विश्वं बाहुल्येन भोगप्रधानीभूतम्। वर्तमाने व्यभिचारदुराचारानाचारैः स्वकीयं साम्राज्यं विस्तारितम्। अतः सदाचारविषये किञ्चिदत्र विचार्यते।

प्रायो जना न्यायेनधनोपर्जनं कृतवन्तः। अधर्मार्जितं धनं प्रत्यत्यन्तमनादरोऽभवत्। तर्हि परद्रव्यहरणस्य का वार्ता? अतिपरिश्रमेणार्जितेन धनेन जनाः सन्तुष्टा आसन्।प्रायो लोकेष्वपवादभीरुतासीत्— यथा जनापवादो न भवेत्तथा जीवितं धृतवन्तः। लोकापवादभीरुत्वादयोध्यापतिरामचन्द्रैः सतीत्वेन सर्वोच्चस्थानं प्राप्तवती सीतामहादेवी श्वापदाकीर्णभीष्माटव्यां त्यक्ता।

तावदेव कृतज्ञता कृतं जानातीति कृतज्ञः। तस्य भाव कर्म वा कृतज्ञता। यत्किञ्चिदुपकारः केनापि कृतस्तर्हि तस्मिन्विषये यावज्जीवनं न विस्मृतवन्तः। भोजनावसरेऽवश्यं तत्स्मृत्वा तदनन्तरं भोजनं कृतवन्तः।

लोकेषु दाक्षिण्यता वृत्तिः। प्रायः जनाः परोपकारपरायणाः अतः केषाञ्चित्किमपि कार्यमापतितं चेत्ते सोत्साहेन च कृतवन्तः।प्रायो दत्तवचनं प्राणत्यागेऽपि पालितवन्तः।

औचित्यपालनमेव जीवनमेतादृशी दृढमान्यता तेषामासीत्। खादनावसरे, स्थाने, चलने, हसने, भाषणे, वस्त्रपरिधाने च सर्वत्र मर्यादां पालितवन्तः। प्रतिप्रवृत्तिः सहजस्वाभाविका आरोपविहीना चाभूत। अधुनापि यत्र यत्र तत्र सर्वत्रैव मर्यादाविहीनता नास्ति किन्तु बहुलतया पाश्चात्यसंस्कृतेर्महाभीषणाक्रमणेनार्यसंस्कृतिर्मृतेव दृष्टवती। जनसमीपे जीवनकलैव नास्ति।

खादनपानस्य मर्यादोल्लङ्घनेनारोग्यं नष्टप्रायम्। तेन यमराजसहोदरभिषग्वराणां चिकित्सालयाः सङ्कीर्णा अभूवन। आसनस्थानचलनहसनभाषणमर्यादोल्लङ्घना दुणौघजननी लज्जा रुदती सती पाताले गतवती। कः कस्या भ्राता पतिः पिता श्वशुरश्चेति निर्णेतु महत्परिश्रमो भवति। तथा च का कस्या भगीनी पुत्री वधूः पत्नी चेति परिचेतुं महती समस्या वर्तते। प्रतिगृहं चिन्ताबाधितं (इन् डीप्रेशन) वर्तते।

आर्यसंस्कृत्यामपि वार्तालापो हास्यविनोदः काव्यशस्त्रविनोदः समस्यापूर्तिः तत्त्वचर्चा परस्परसंवादश्चोच्चतरकोटिकोऽभवत्। नारीणां हास्यं कपोलभेदमात्रमेवासीत्। इदानीं तु कदापि केनचित्सह कुत्रचित्स्थाने स्वैराचरणं पश्यामः।

आर्यसंस्कृत्यामुचितवेशभूषाभवत्। उचित वेशभूषया विचारे व्यवहारे, वर्तने च पवित्रता स्वाभाविक्येव। तेन शीलपालनं सदाचरणं सुकरमभवत्।

शीलसौन्दर्यं नारीणामाभूषणम्। असूर्यम्पश्या राजदारा इत्येतदराजकाले प्रसिद्धम्। एतत्कलिकालस्य प्रभावं वर्णयितुं कः समर्थः? जनमानसस्थितिर्दरिद्रीभूता। वस्त्रपरिधाने तु नारीणां का कथा? किं यत्र तत्र सर्वत्र वस्त्राभावो वर्तते? एतत्समस्या मनसि सदैव वर्तते।

एतद्विषये काल्पनिकं कथानकमत्र प्रस्तूयते।तथाहि- एकदा श्वापदाकीर्णाटव्यां पशूनां परिषदभवत्। तदा तस्यां परिषद्येको वानरो वनराजसमीपेऽकथयत्। तथाहि- नगरस्त्रीणामस्मिन्कानने प्रवेशोवर्जनीयः।

यतो हि नगरस्य स्त्रियः सङ्कीर्णवस्त्रपरिधानं कुर्वन्त्यः शनैः शनैरस्मादृशाः वस्त्रविहीना भवितुं प्रारब्धवन्त्यः। यदि अस्मादृशा अभविष्यत्तर्हि वयंकुत्र गन्तव्यम्?एतच्छ्रुत्वा सर्वे श्वापदा एकीभूयानुमोदनां दत्तवन्तः। आम् आम्। एतद्भवतु। एतद्भवत्विति।

नष्टीभवन्त्या आर्यसंस्कृतेः
परिणामं दृष्टुमरण्यश्वापदा अपि न समर्थाः।
सर्वथा निष्पापजीवनंप्रतिनयन्ती
जीवनशैलीनाम आर्यसंस्कृतिः।
आत्मनः परमात्मपदं प्रति नयन्ती
जीवनशैली नाम आर्यसंस्कृतिः।
भोगमार्गाद्योगमार्गं प्रतिनयन्ती
जीवनशैली नाम आर्यसंस्कृतिः।
देहादात्मनं प्रति लक्ष्यं नयन्ती
जीवनशैली नाम आर्यसंस्कृतिः।
जडात्चैतन्यं प्रति नयन्ती
जीवनशैली नाम आर्यसंस्कृतिः
आर्यसंस्कृतिविषयकं किञ्चिदेव
संस्तवनमस्मिन्लेखे प्रस्तुतम्।
लेखेऽस्मिन् या कापि क्षतिरस्ति
सानुग्रहबुद्ध्या क्षन्तव्येति शम्।

# ॥जैनसाहित्यम्॥

-साध्वीजीश्रीआगमप्रियाश्रीः

जैनसाहित्यस्य महिमागानं कुर्तुं वयं न समर्थाः। सहस्रजिह्वा अपि यदि प्राप्नुयात् तर्ह्यपि तस्य महिमां प्रभावकतां च वर्णायितुं न शक्तः। बृहस्पतिरपि तत्र निस्तेजोभवति। कियद्विषयास्सन्ति। नामश्रवणमात्रेणापि अहह भवति। अध्ययनेन त्वलम्। यथा- अङ्गबाह्यम्, आगमविचारः, अङ्गप्रविष्ट-आगमविचारः, दार्शनिकी चर्चा, लक्षणशास्त्राणि, स्वप्नशास्त्राणि, ज्योतिषविचारः, काव्यसाहित्यम्, शब्दस्वरछन्दोऽलङ्कारशास्त्राणि, कथासाहित्यम्, भाषालिपिविषयकज्ञानम्, इत्याद्यनेकानेक साहित्यानां निधिर्वर्तमानकालेऽपि विद्यमानोऽस्ति। प्राचीनकालापेक्षया त्वस्मत्भाग्ये बिन्दुतुल्यमेव साहित्यं प्राप्तं तथापि यावल्लब्धं तस्य यदि प्रणिधानपूर्वकमाजीवनमध्ययनं कुर्मश्चेदपि पारं न प्राप्नुयामः।

आगमादिसाहित्यविषयेऽपि एवमेव। प्रत्येका गमस्य पठनपाठनाय ''जोग'' नाम विशिष्टतप स्साधनानन्तरमनुज्ञा प्राप्यते। प्रधानागमश्रीभगवतीसूत्र स्यानुज्ञा षण्मासावधि विशिष्टतपस्साधनानन्तरं प्राप्यते। समुत्थानश्रुतागमस्य तथोत्थानश्रुतागमस्य यदा पुरातनकाले स्वाध्यायं कुर्वन्नासीत् तदा देवलोकतो देवस्यागमनमभवत्। यदा विघ्नं स्यात् तदा संहृत्य देवः स्वस्थानं गच्छन्नासीत्।

प्रकाण्डबुद्धिप्रतिभास्वामिविद्वद्वर्यश्रीहरिभद्रसू रिमहाराजा प्रमुखैर्विशदप्रमाणतः षड्दर्शनेषु न्यायवैशैषिकबौद्धादिसिद्धान्तानां खण्डनमण्डनं कृत्वा स्याद्वादसिद्धातं विश्वे अजेयतया स्थापितवान्। महामहोपाध्यायश्रीयशोवजयजीमुनिवरैः विद्यानगर्यां काश्यां यत्र स्याद्वादद्वेषिणो ब्राह्मणा आसन् तत्रापि ब्राह्मणविद्वद्वर्याणां सकाशाद् न्यायाचार्यस्योपाधिरर्जिता।



श्रीभक्तामरस्तोत्रकृत्श्रीमानतुङ्गसूरिवर्याणां काव्यप्रभावेन शृङ्खलास्त्रुटिताः। यथा यथा काव्यनिर्माणं कुर्वन्ति तथा शृङ्खलास्त्रुट्यन्त्येव। श्रीसिद्धसेन दिवाकरसूरीश्वरैः कल्याणमन्दिरस्तोत्रस्य प्रभावतो महादेवलिङ्गमध्यात् श्रीअवन्तिपार्श्वनाथपरमात्मबिम्बं प्रकटीचकार। एवं काव्यसाहित्यस्यापि बृहद्धितिहासो जैनसाहित्ये वर्तते। कथासाहित्यस्य तु का कथा। मात्र ज्ञाताधर्मकथानामके आगमे सार्धत्रिकोटिकथानां निधिरस्ति। वास्तविकाः काल्पनिकाश्चान्याः कथाः। सार्धत्रिकोटिकोटिश्लोककृत्सरस्वत्यवतारकलिकालसर्वज्ञ -श्रीहेमचन्द्राचार्यैः षट्सहस्रश्लोकप्रमाणव्याकरणशास्त्र स्योपरि बृहन्न्यासः, मध्यमवृत्ति-लघुवृत्त्याद्यनेकग्रन्थानां सर्जनं कृतमस्ति। कर्मसाहित्याकारश्रीशिवशर्मसूरीश्वराः श्रीदेवेन्द्रसूरिवराद्यनेकप्रमुखमुनीश्वैररत्यन्तसूक्ष्मातिगहनक र्मविषयसम्बद्धं कलिकालवर्तिजीवान् लक्ष्यीकृत्वा एकान्तनिष्कामवृत्या तेषां सुबोधायात्यन्तं सरलतया यदत्यद्भुतमपूर्वञ्च साहित्यसर्जनं कृतमस्ति तस्योपकारं कथं स्फेटनीयमेषैका महती चिन्ता वर्तते। तस्मादेकोऽपि लवो यदि जीवनपरिवर्तनाय भवेत्तर्हि कर्मविषयको यद्बोधः प्राप्तः स सफलो भवेत्। कर्मसहित्ये तु नैके गहनपदार्थाः सन्ति। तेभ्योऽत्र कर्मप्रकृतिर्नाम कम्मपयडी ग्रन्थवर्ती एको योगस्थानको नाम पदार्थो बोधनीयो योगस्थानकबोधाय वीर्यो योगो वीर्याणुर्वर्गणा स्पर्धकादि पदार्थानां बोध आवश्यकोऽस्ति।

**योगस्थानकः**— एकस्मिन्नेव समये एक एव जीवः कियद्वीर्यव्यापारं करोतीति तस्य विचारणा। अथवैकस्मिन्नेव योगस्थानके स्पर्धकानाम् सङ्ख्या कियद्भवतीति विचारणा।

**वीर्यम्**- वीर्यान्तरायकर्मणः क्षयेणाथवा क्षयोपशमेनात्मनि प्रादुर्भूता शक्तिः

**योगः**- मनोवचनकायरूपत्रिकरणेन लब्धिवीर्यस्य उपयोग एवं योगः।

श्री सुधर्मास्वामि जैन ज्ञानभंडार
C/o. विमुक्ति विश्व विद्यालय
विरा जैन सोसायटी के पास, रामनगर,
साबरमती, अहमदाबाद - 380005
फोन नं.:-(079) 55220409

**वीर्याणुः**— भवस्य प्रथमसमये यो लब्धि-अपर्याप्तसूक्ष्मनिगोदजीवः तस्य यत्सर्वजघन्यवीर्यं तस्य केवलिबुद्ध्यापि विभागो न भवेत्। एतादृशो निर्विभाज्योंऽशो नाम वीर्याणुः।

**वर्गणा**— समान-समानवीर्याणुवतामात्मप्रदेशानां यो समूहो तन्नाम वर्गणा।

**प्रथमा वर्गणा**— एकस्यां वर्गणायां सप्तरज्जुप्रमाणो यो घनीकृतलोकः तस्य योऽसङ्ख्याततमो भागः तत्र विद्यमानाः यावन्तोऽसङ्ख्यातप्रमाणप्रतरास्तेषु यावत्सङ्ख्याप्रमाणा आकाशप्रदेशाः सन्ति तावत्सङ्ख्याप्रमाणात्मप्रदेशेषु नामासङ्ख्यातात्मप्रदेशेष्वेकसमानो वीर्यव्यापारो वर्तते। नाम समानसमानवीर्यव्यापारवदात्मप्रदेशानां समूह एषा जघन्या वर्गणा।

**द्वितीया वर्गणा**— जघन्यवर्गणायाः प्रत्यात्मप्रदेशे यावन्तो वीर्याणवो विद्यन्ते तेभ्य एकाधिकवीर्याणुवतामात्मप्रदेशानां यः समूहो सा द्वितीया वर्गणा।

**तृतीया वर्गणा**— एवं द्वितीयवर्गणायाः प्रत्यात्मप्रदेशे यावद्वीर्याणवः सन्ति तेभ्य एकाधिकवीर्याणुवतामात्मप्रदेशानां यः समूहः सा तृतीया वर्गणा।

**अन्तिमा वर्गणा**— एवमेकोत्तरवीर्याणुवृद्धिभिः क्रमशोऽन्तिमवर्गणाया असङ्ख्यातलोकानां यावन्त आकाशप्रदेशाः तावत्प्रमाणाः वीर्याणवः प्रत्यात्मप्रदेशे विद्यमाना भवन्ति। ते सर्वे समान-समानवीर्याणुवतामात्मप्रदेशानां समूहात्मिकान्तिमा वर्गणा भवति

**स्पर्धकः**— एवमेकोत्तरवीर्याण्वधिकवृद्धिमत्यो वर्गणाः कियन्त्यः प्राप्नुवन्ति?

सूचिश्रेण्या असङ्ख्याततमे भागे यावन्तोऽसङ्ख्याकाशप्रदेशाः तावत्प्रमाणा वर्गणाः प्राप्नुवन्ति। एषामसङ्ख्यातवर्गणानां समूहो नाम प्रथमस्पर्धको यथा यथा वीर्याणुवृद्धिः प्रत्यात्मप्रदेशे भवति तथा तथात्मप्रदेशानां सङ्ख्या स्वल्पतां प्राप्नोति तदनन्तरं प्रथमस्पर्धककस्योत्कृष्टवर्गणायाः कस्मिन्नप्यात्म प्रदेशोपरि यावन्तो वीर्याणवः तेभ्य एकवीर्याण्वधिकवीर्यवन्तः, द्वितीयवीर्याण्वधिकवीर्यवन्त आत्मप्रदेशा न प्राप्नुवन्ति परन्तु असङ्ख्यलोकाकाश प्रदेशप्रमाणवीर्याणुभिरधिकवीर्यव्यापारवन्त आत्मप्रदेशाः प्राप्नुवन्ति। एतावद्वीर्यव्यापारवता मात्मप्रदेशानां समूहो नाम द्वितीयस्पर्धकस्य प्रथमा वर्गणा।

**द्वितीयः स्पर्धकः**:- प्रथमस्पर्धकस्य प्रथमवर्गणानन्तर मेकोत्तरवीर्याणवृद्धिभिरधिकवीर्यवता-मात्मप्रदेशानां समूहस्य यावन्त्यो वर्गणा भवन्ति तावन्त्यो नाम सूचिश्रेण्योऽसङ्ख्याततमे भागे वर्तन्तोऽसङ्ख्याताकाश प्रदेशप्रमाणा असङ्ख्याता वर्गणाः तासां वर्गणानाम् समूहो नाम द्वितीयः स्पर्धकः।

**योगस्थानकः**— सूचिश्रेण्या असङ्ख्याततमे भागे यावत्सङ्ख्याप्रमाणा आकाशप्रदेशास्तावत्सङ्ख्याप्रमाणा नामासङ्ख्यसङ्ख्यप्रमाणानां स्पर्धकानां समूहो नाम एको योगस्थानकः। एतादृशा योगस्थानकाः कति विद्यन्ते? योगस्थानका अपि सूचिश्रेण्या असङ्ख्याततमे भागे यावन्त आकाशप्रदेशाः तावत्प्रमाणा भवन्ति। अत्रैवं विचारणीयं यदेकस्मिन्नेव समयेऽपर्याप्तः सर्वजघन्यवीर्यव्यापारवान् जीवोऽपि महदाश्चर्यजनकं कार्यं करोति यत्कार्यं मन्त्रविद्या, तन्त्रविद्या, भ्रमणभाषः, सङ्गणकम्, यन्त्रसाधनानि, पुद्गलपरमाणवः, तथासङ्ख्यदेवानां स्वामिनः, वैमानिकः, इन्द्रोऽपि कर्तुं न समर्थो भवति। यथा यथा वीर्यव्यापारो वर्धते तथा तथा विविधान् योगस्थानकान् प्राप्नुवन्ति। इदन्तु कर्मसाहित्यस्यांशांशोऽस्ति। यथा यथा कर्मसाहित्यविषये बोधो भवति तथा तथा जीवस्याचिन्तनीयशक्तिकल्पनापि महदाश्चर्यदायिका भवति।

(सरस्वतीलब्धप्रासादाचार्यदेवश्रीरत्नसुन्दरसूरिप्रदत्तवाचनालवः)

# ॥तत्त्वार्थसूत्रप्रथमसूत्रार्थविचारः॥

## सम्यग्दर्शन-ज्ञान-चारित्राणि मोक्षमार्गः॥ [तत्वा.सू.१.१]

-साध्वीजीश्री धन्यरेखाश्रीः

श्रीमती श्रेष्ठिणी किञ्चित् क्रयणार्थं महाहट्टं (Mall) प्रति कारयानेन गच्छन्त्यासीत्। मार्गे पादचारेण चलन्तीं प्रियसखिं दृष्ट्वा सा कारचालकम् (Driver)आदिष्टवती-भोः! यानं स्थगय सखिंश्च याने उपवेशय। स्वामिन्यादेशेन तेनापि तथैव कृतम्। अग्रे गच्छता ननान्दा दृष्टा। सापि गृहीता। पुनरपि प्रातिवेश्मिका दृष्टा नीता च। हृष्टपुष्टाभिस्ताभिः सर्वतः पूर्णमेव यानम्।

किञ्चिदग्रे सञ्चरता तया पुत्रश्वसा दृष्टा। अहह...... अधुना किं कर्तव्यम्? यदि सा न गृहीता, तदा कुपिता सती पुत्रवधुमपि कोपयिष्यति। यानं तु मनागपि रिक्तं नास्ति। किङ्कर्तव्यमूढया तया चालक एव आदिष्टः- रे! रे! त्वमेवेतोऽपसरय.......येन त्वया रिक्तीकृते स्थानेऽहं पुत्रश्वसारमुपवेशयामि।

मनाग् विहस्य तेन प्रोक्तम्– अहं तु गमिष्यामि चिन्ता मास्तु। किन्तु पश्चात्को यानं चालयिष्यति? भवती तु मनागपि यानचालनं न जानाति। तेन हट्टप्रापणं तु दूरं किन्तु मार्गे एव स्थितया भवत्या गृहेऽपि कथं गमनं स्यात्?। अहह......इदं तु मया न विमृष्टमेव, अहो मे मुग्धता? इति बुद्धा सा।

हास्यकथानकेऽत्र पश्चादपि सा तु प्रतिबुद्धा, किन्तु वयम्? किं वयं जानीमो यन्मोक्षपुरप्रापणैतद्धर्मयानस्य चालकः कः? मोक्षप्राप्तौ कस्याविनाभावः? चेन्न, तर्हि सावहितमाकर्णयन्तु।

भीषणभीतिभृतभवकानने जननमरणादिरूपानेकदुःखदौर्भाग्यदारिद्र्यद्रुतद्रमकसदृश-देहिनां कृते महामूल्यवद्रत्नत्रितय सदृक्षसमृद्धिप्रापणपथप्रदानेन परमोपकारकारिणः चरमपूर्वधराः **श्रीउमास्वातिवाचकमुख्याः** प्रचुरपदार्थ प्रबोधपरिपूर्णे दिगम्बर-श्वेताम्बरोभयसम्मान्ये महाग्रन्थस्वरूपे दशाध्ययनरूपालङ्कारालङ्कृते तत्त्वार्थाधिगमाख्यसूत्रे प्राहुः-

**॥सम्यग्दर्शन-ज्ञान-चारित्राणि-मोक्षमार्गः॥तत्त्वा.सू. १.१॥**

प्रथमाध्ययने प्रथमसूत्रे प्रथमशब्दरूपेण द्योतितः **सम्यगि**ति शब्दो मोक्षपुःप्रापकरत्नत्रितयरूपयानस्य **चालकसदृशः**(Driver)। बोधयत्यस्मानेषः-

१) यावत् सम्यग्रूपता नायाति, तावद्दर्शनमपि सम्यग्दर्शनं नैव, अपि तु मिथ्यादर्शनलक्षणमेव।

२) ज्ञानमपि सम्यग्ज्ञानं नैव, किन्तु मिथ्याज्ञानसारूप्यमेव।

३) चारित्रमपि सम्यक्चारित्रं न, परन्तु मिथ्याक्रियैव। चालकेन विना कथं लक्ष्यप्राप्तिः स्यादपि?

तत एव सर्वैः सर्वदैव मोक्षयानरूपतत्त्वत्रयस्य प्रवरसञ्चालकरूपसम्यक्त्वसंरक्षणे नितरामेव यतितव्यम्।

अन्यच्च महाग्रन्थस्य लघुसूत्रेऽप्यस्मिन् पञ्चपरमेष्ठिलक्षणपरमार्थो गुम्फितः। तद्यथा—

१) **मार्ग**मिति पदेन **अरिहन्ता** बुध्यन्ते, मार्गदेशकत्वात्।

२) **मोक्ष** इति पदेन **सिद्धाः** शोभन्ते, मोक्षप्रापकत्वात्।

३) **चारित्राणी**ति पदे**नाचार्या** आलभन्ते, पञ्चाचाराणां पालकत्वेऽपि तन्मध्ये प्रधानस्य चारित्राचारस्योल्लेखेन तस्य सुचारुसंरक्षणप्रदायकतया स्मृतत्वात्।

४) **ज्ञानमि**ति पदे**नोपाध्याया** उपलब्धाः, ज्ञानप्रदायकत्वात्।

५) **दर्शनमि**ति पदेन **श्रमणा** ज्ञायन्ते, तपःप्रभृत्या दर्शनस्य प्रभावकत्वात्।

लघ्वी कुञ्चिकापि यथैव बृहत्तमं गृहमुद्घाटयन्ती, तथैव लघ्वपि सूत्रमेतदस्मत्कृते अनुप्रेक्षणस्य महाद्वारमुद्घाटयति। आगच्छन्तु सर्वे गृहप्रवेशोत्सवं जुषामहे। नमो नम एतादृक्सूत्रगुम्फकाय ग्रन्थकाराय।

**तत्त्वार्थस्याद्यसूत्रेऽपि तत्त्वानां सारगर्भिताः। गुम्फिता ग्रन्थकारेण पञ्चापि परमेष्ठिनः॥**

**॥इति शम्॥**

# ॥सद्गुरुं प्रणमाम्यहम्॥

-साध्वीजीश्रीदर्शनपूर्णाश्रीः

इन्द्रियविषयान्पञ्च तुरङ्गान् दमयन् तु यः।
तद्गुरुरज्ववारस्य **प्राप्स्येऽहं दर्शनं कदा॥१॥**

गुप्तिभिर्ब्रह्मचर्यस्य स्वात्मक्षेत्रं सुरक्षितम्।
गुरोः कृषीवलस्यैव **प्राप्स्येऽहं दर्शनं कदा॥२॥**

यो रत्नत्रयलुण्टाकान्घ्नन्ति कषायतस्करान्।
तत्तलारक्षकस्येव **प्राप्स्येऽहं दर्शनं कदा॥३॥**

पञ्चमहाव्रतानां यो मेरुवद् भारमुद्वहन्।
समर्थवृषभस्येव **प्राप्स्येऽहं दर्शनं कदा॥४॥**

यो न्यायनीति संन्निष्ठः पञ्चधाऽऽचारपालने।
नीतिवतो नृपस्येव **प्राप्स्येऽहं दर्शनं कदा॥५॥**

प्रवचनाष्टमातृभिर्लाल्यमानो निरन्तरम्।
तन्निर्दोषार्भकस्येव **प्राप्स्येऽहं दर्शनं कदा॥६॥**

षट्त्रिंशद्भिर्गुणोपेतः सूरिमन्त्रसुसाधकः।
तीर्थङ्करस्य तत्सूरेः **प्राप्स्येऽहं दर्शनं कदा॥७॥**

मुक्तिपथप्रणेतारं सम्यग्दर्शनदायकम्।
श्रेयस्कृद् दर्शनं यस्य **प्राप्स्येऽहं दर्शनं सदा॥८॥**

॥श्रीआनन्दरत्नगणिविरचिता

# ॥श्रीभरटकद्वात्रिंशिका॥

(तस्मादुद्धृतमिदं कथानकम्)

-साध्वीजीश्री कुलरत्नाश्रीः

**औषधाढ्यो न कार्यज्ञो मूर्खं पश्येद्यथा जटी।**
**वैद्यातिविषदानेऽपि विषेणामारयद् गुरुम्॥**

कोलकग्रामे वृद्धो जूटको जट्यस्ति। स एकदा ज्वरविकारेणात्यर्थं पीडितः।

सन्निपाताधिक्ये जाते तदीयशिष्येण वैद्यगृहे गत्वौषधं पृष्टम्। तेन 'अतिविषम्' उक्त्वा 'अल्पं देयम्' इत्युक्तम्। शिष्येण मार्गे आगच्छता चिन्तितम्— "वैद्येनातिविषमुक्तम्, मम गुरुस्तु भृशं दुर्बलस्तेन प्रथममतिविषं न सहिष्यते। ततः प्रथमं विषं ददामि तस्य ज्वरे, न त्वतिविषम्।" इति गान्धिकहट्टाद् विषमानीय घोलयित्वा स्वगुरोर्दत्तम्। तेन च गुरुः शीघ्रं ममार। लोकैः शिष्यो निन्दितः।

एवं न कार्यम्॥

**उपादेयम्-**

कस्मिन्नपि वाक्यार्थे वाक्यार्थमात्रबोधो न पर्याप्तःकिन्तु रहस्यार्थ आवश्यको भवति। अतिविषम् इति औषधं न तु विषम्। वाक्यार्थमात्रबोधेन विषं दापयित्वा वृद्धो मारितः। तत्त्वहीनविलसितम्।

॥इति शम्॥

# ॥काव्यशास्त्रविनोदेन...॥

-श्रेयःप्रीतम्

कोऽस्ति गुणानुरागाढ्यः? बुद्ध्यात् को लीलया जनः?
क्षमावत् कः सहिष्णुः स्यात्? सज्जनो धीषणो मुनिः॥१॥

विपदासु प्रसन्नः कः? केषां दुःखिजने दया?
चलादपि चलं किं स्यात्? धैर्यभाग् महतां मनः॥२॥

रतिः स्याद् योगिनां कुत्र? सन्तः कुर्वन्ति किं गुणे?
लीनाः के परमे तत्त्वे? योगे रज्यन्ति योगिनः॥३॥

हन्त सतामपि स्यात् का? कति पाल्या मुनेर्गुणाः?
कीदृशी गुरुशिक्षास्ति? विपद्दशापि सुन्दरा॥४॥

साधुभिः को न कर्त्तव्यः? कः समः शत्रुमित्रयोः?
अस्मद्धितं क इच्छेन्न? प्रमादो हि महान् रिपुः॥५॥

दुर्जनैः का न कर्तव्या? कुत्र स्याद् गुणदर्शनम्?
सौख्यं दुःखं च कुत्र स्याद्? सङ्गतिः सुजने भवे॥६॥

के भिक्षामपि याचन्ते? केषां चित्ते भवेत् स्मृतिः?
का हिता मधुरा वाच्याः? दीनाः प्रणयिनां गिरः॥७॥

वित्तं दानं विना कीदृग्? मिष्टं तु कस्य भाति नो?
सुधा क्षुधातुरे किं स्यात्? वृथा तृप्तस्य भोजनम्॥८॥

का भवेदात्मबोधाय? केषां प्रीतिः शुभावहा?
श्रेयस्करोऽस्ति कोऽस्माकम्? सद्विद्या गुरुणां गुरुः॥९॥

# ॥श्रीद्व्यक्षरी श्लोकः॥

**॥श्रीयश्रीय! श्र! य! श्रीय!**
**श्रीश्रीयाश्र! यय! श्रये।**
**यश्रीश्रियै श्रियै श्रीश्रीः।**
**श्रिय! श्रेयः श्रियै श्रये॥१॥ (अनुष्टुप्छन्दः)**

**अन्वयार्थ—**

**श्रीयश्रीय**! = हे यशः श्रीपुरुषोत्तम!

**श्र**! = हे शरण्य! **य**!= हे तारक! **श्रीय**! = हे कान्तिपुञ्ज!

**श्रीश्रीयाश्र**! = हे कान्तिपुञ्ज!

**श्रीश्रीयाश्र**! = हे सिद्धिरथसारथिन्! **श्रये**!हे शिवहेतो! **यय**! हे श्रेष्ठदातः!

**श्रीश्रीः**! हे ईश्वर!

**श्रिय**! = हे कीर्तिकल्पतरो! (भवन्तम् = त्वाम्) **श्रियै** = सिद्ध्यै,

**यश्रीश्रियै** = योगसम्यग्वृद्ध्यर्थम्,

**श्रेयः श्रियै** = कल्याणश्रीप्राप्त्यै, **श्रये** = आश्रयामि।

—इति श्रीसुन्दरैकाक्षरकोषाधारेण।



# सूक्तिमाला

-साध्वीजीश्री कुलरत्नाश्रीः

१) ध्येयप्राप्त्यर्थं नहि गतेः, किन्तु सुदृष्टेर्महत्त्वमस्ति। यदि गतिर्वेगवती भवेद् दृष्टिश्च च कुटिला, तर्हि ध्येयस्थानं निकटं न भवेत् किन्तु सुदूरं भवेत्। यदि दृष्टिर्यथार्था न्याययुता च, गतिस्तु मन्दा तथापि योजनानां सहस्राणि पारयितुं सफलीभवति।

—पू. आ. श्रीमद्विजयपूर्णचन्द्रसूरीश्वराः

## ॥प्रवचनप्रदीपस्य पुण्यप्रकाशः॥

२) जन्म दुःखपरम्परासर्जकमस्ति। जन्म पापकेन्द्रस्थानमस्ति। जन्म कर्मोत्पत्तेर्यन्त्रालयमस्ति। इदं जन्म समस्ताधिव्याध्युपाधीनां मूलमस्ति। रागद्वेषादितीव्रदोषानामुद्गमस्थानमपि इदं जन्मास्ति। धर्मात्मने इदं जन्म बृहत्कारागृहसमं विद्यते।

-पू. आ.श्रीमद्विजयपुण्यपालसूरीश्वराः

## ॥नवपदोपासके श्रीपाल-मयणे॥

३) मिथ्यामतसंस्कारान्नास्तिकतापुष्टिकारकसंस्कारो दुष्टतरमस्ति।

-पू.आ.श्रीमद्विजयकिर्तियशसूरीश्वराः

## ॥क्रोध-पुरुषः॥

४) यूयं कस्योपरि कोपं कर्तुं नाधिकारिणः। क्रोधः ह्यसभ्यता-हीनता-प्रमादता-जडतेत्यादीनां सर्वेषां कारणमस्ति। यथा चाण्डालस्पृष्टो जनः स्नानकरणेन विशुद्ध्यति तथा क्षणमात्रमपि क्रोधस्पृष्टो जनो पश्चात्तापेनैव विशुद्ध्यति।

-पू. आ. श्रीमद्विजयजयदर्शनसूरीश्वराः

## ॥जैन सङ्घव्यवस्था॥

५) सम्पत्तिसन्मत्योः प्रथमावश्यकता सन्मतेरस्ति।

-पू. आ. श्रीमद्विजयरत्नसेनसूरीश्वराः

## ॥सत्-सौख्यान्वेषणम्॥

६) परमात्मनो धर्मोऽनुपमोऽस्ति, अत्यद्भुतोऽस्ति, असौ धर्मो यत्र दीप्यति तत्र सुखं न दीप्येतेति नैव भवेत्।

-पू. आ. श्रीमद्विजययोगतिलकसूरीश्वराः.

## ॥श्रीसद्गुरुगुणस्तुतिनवकम्॥

मुक्तिपूर्णताप्रार्थी

जिनवाणीप्रदानेन करोति चित्तरञ्जनम्।
मोक्षमार्गप्रमत्तं तं स्वा[1]लम्बनं गुरुं स्तुवे॥१॥

रागद्वेषादिदोषाद् यो ममात्मानं सुरक्षति।
गाम्भीर्यमृदुताधैर्यगुणौघभृद्गुरुं स्तुवे॥२॥

मिथ्यात्वतिमिरोच्छेदे गुरुरस्ति महारविः।
कषायविषयाग्न्योपशामकं सद्गुरुं स्तुवे॥३॥

समुद्रतुल्यगाम्भीर्यं धीरता मेरुसन्निभा।
सत्त्वं केसरितुल्यं तं सन्मार्गदं गुरुं स्तुवे॥४॥

भवेऽहं रौरवद् भ्राम्यन्निर्विण्णोऽस्म्यथ तारय।
निर्भयस्थानदातारमुद्धर्तारं गुरुं स्तुवे॥५॥

श्रीतत्त्वप्रीतितीर्थोदमहाकल्याणकान्नदम्।
विमलालोकदातारं सद्दृष्ट्या तं गुरुं स्तुवे॥६॥

श्रीसुस्थितमहाराजप्रीतिपात्रं विचक्षणम्।
मेधाविनं हृदाधारं भक्तितः सद्गुरुं स्तुवे॥७॥

कुशलो गुरुभक्तौ यो गुरुं प्रति समर्पितः।
धर्मबोधकरं मे तं श्रेयस्करं गुरुं स्तुवे॥८॥

अहं धन्योऽस्मि प्राप्तस्त्वं महद्भाग्येन सद्गुरो!।
निःश्रेयसाध्वसहायो प्रार्थये त्वां भवे भवे॥९॥

---

[1] स्वा-सु+आ।

श्रीक्षत्रियकुण्डाधिपति-

## वर्द्धमानस्वामिस्तुत्यष्टकम्

श्रेयःपदहेवाकी

रागकेसरिविध्वंसेऽष्टापदसमं विभुम्।
क्षत्रियकुण्डतीर्थेशं त्रैशलेयं नमाम्यहम्॥१॥

द्वेषहस्तिविनाशाय मृगारिवद् विभाति यः।
त्रिजगज्जीवनाथं तं त्रैशलेयं नमाम्यहम्॥२॥

अज्ञानतिमिरान्धानां पावनज्ञानदीपकम्।
अनन्तगुणनिर्मग्नं त्रैशलेयं नमाम्यहम्॥३॥

महामोहमहीनाथशत्रुयुद्धे महाबलम्।
विपर्यासपराजेतृ-त्रैशलेयं नमाम्यहम्॥४॥

सर्वंसहश्च पृथ्वीवच्चण्डकौशिकतारकम्।
प्रशमामृतसिन्धुं तं त्रैशलेयं नमाम्यहम्॥५॥

गौतमादिविनयेभ्यः सन्मार्गदायकं जिनम्।
त्रिपदीदातृदेवं तं त्रैशलेयं नमाम्यहम्॥६॥

सुलसाचन्दनाभाग्यप्राप्तभवाब्धितारकम्।
आनन्दश्रेणिकस्वामि-त्रैशलेयं नमाम्यहम्॥७॥

मुक्तिसप्तनय''श्रेयःपथो''पदेशकं प्रभुम्।
आर्हन्त्यश्रीवधूकान्तं त्रैशलेयं नमाम्यहम्॥८॥



# ॥दीक्षाधर्मो विजयतेतराम्॥

-परमः

॥श्रीजिनशासनम्॥

परमानन्ददं धन्यं जगज्जीवैकवत्सलम्।
भाग्यपूर्णैर्जनैर्लभ्यं जैनं जयति शासनम्॥१॥

श्रीरामचन्द्रीया

सत्य-सन्मार्गदातारं दीक्षायुगप्रवर्तकम्।
श्रीजैनशासनाधीशं रामचन्द्रं गुरुं स्तुवे॥२॥

निश्रादाता गुरुदेवः

सम्यग्दर्शनदातारं रत्नत्रयसमर्पकम्।
चारित्रधर्मदेष्टारं श्रीश्रेयांसप्रभं स्तुवे॥३॥

गुरुस्वागतम्-

रत्नत्रयप्रदानार्थं समर्पणमहोत्सवे।
स्वागतं गुरुदेवानां समागच्छतः प्रीतितः॥४॥

मुमुक्षुप्रवेशः

रत्नत्रितयसम्प्राप्त्यै समायाता मुमुक्षवः।
स्वागतं स्वागतं तेषां श्रेयोभवतु सर्वदा॥५॥

विजयतिलकः

भवन्तो मोहसङ्ग्रामे जयन्तु विजयन्तु भोः।
तिलकं मुक्तिसाम्राज्य-लाभार्थं क्रियतेऽधुना॥६॥

गुरुपूजनम्

गुरूपकारस्मृत्यर्थं कृतज्ञताप्रदर्शकम्।
समर्पणं प्रदर्श्येत नवाङ्गी गुरुपूजया॥७॥
पापसन्तापनाशाय माङ्गल्यकारकं तथा।
गुरूणां पूजनं कुर्यात् सर्वथा सिद्धिदायकम्॥८॥

सङ्घवर्धापना

मङ्गलं तीर्थकृद्देवः सङ्घश्चतुर्विधस्तथा।
तदाशीर्वादसम्प्राप्त्यै सङ्घो वर्धाप्यते खलु॥९॥
जिनाज्ञापालनोद्युक्तं रत्नत्रयसुरक्षकम्।
सङ्घं चतुर्विधं नित्यं वर्धापयतु भक्तितः॥१०॥

अलङ्कारपूजा

तीर्थकृतामयं मार्गः तीर्थकृत्कृपयाऽमिलत्।
तेन तीर्थकृतां पूजा क्रियते हेमभूषणैः॥११॥
स्वर्णरत्नादिसंयुक्तं भूषणं दूषणं विना।
स्थापयेज्जिनदेहेषु भवदूषणवारकम्॥१२॥

सश्रीफलप्रदक्षिणा

भवे भ्रमादिभावेन जिनाज्ञा न कृता मया।
तेषामाज्ञानुकूलत्वं सूचयते प्रदक्षिणा॥१३॥
भवभ्रान्तिनिवाराय मता प्रदक्षिणात्रयी।
नालिकेरो गुणाढ्यः स्यान्मुक्तिफलैकदायकः॥१४॥

नन्दिवासक्षेपः

वासचूर्णं यथाऽर्हद्भिः क्षिप्तं गणेशमस्तके।
कुरुध्वं नन्दिकाले श्रीवासचूर्णं मुमुक्षुषु॥१५॥
मन्त्रितं वासचूर्णं हि यस्य शिरसि निक्षिपेत्।
निर्विघ्नं तस्य कार्यं स्यात् सुखं स्यान्नात्र संशयः॥१६॥

रजोहरणमाहात्म्यं

दीक्षितज्ञापने चिह्नं रजोहरणनामकम्।
क्षमं कर्मरजो कृत्यै श्रीसूरिभ्यः समर्थ्यते॥१७॥
रजोहरणलिङ्गं स्यात् साधुमात्रस्य सर्वदा।
तं विना नोच्यते साधुर्वन्दे तं मुनिरक्षकम्॥१८॥

रजोहरणप्रदानम्

पञ्चमहाव्रतेष्वाद्यं पाल्यते येन लीलया।
क्षमाश्रमणलिङ्गं तन्मुमुक्षुभ्यः प्रदीयते॥१९॥
समर्पयेत् स्वहस्ताभ्यां तद्रजोहरणं गुरुः।
हर्षोल्लासो भवेच्चित्ते सभायां वज्रवत् तदा॥२०॥

आभूषणत्यागः

भूषणं देहशोभायै देहरागनिबन्धनम्।
अपूर्वसात्त्विकैर्धीरैः त्याज्यते श्रीमुमुक्षुभिः॥२१॥
त्यजत्याभूषणान् सर्वान् साधुताऽभिमुखो भवी।
निरीहभावसम्प्राप्त्या समतां लभते वराम्॥२२॥

वेशपरिवर्तनार्थं प्रयाणम्

भोगपराङ्मुखा वीरा योगसाम्राज्यसन्मुखाः।
संसारिवेशहानार्थं समुत्सुका मुमुक्षवः॥२३॥
गच्छेद् वस्त्रपरावृत्त्यै यदीर्यासंयुतो भवी।
पुण्यानि लोचनानि स्युः सतां तद्दर्शनाहरम्॥२४॥

वेशपरिवर्तनानन्तरं प्रवेशः

धन्यः श्रमणवेषोऽयं दर्शनादपि पावनः।
नूत्नदीक्षितदेहेषु वैरागिषु सुशोभते॥२५॥
साधुवेशधरो भव्यो भव्यानां तीर्थसन्निभः।
प्रवेशे वन्दते लोको जयारवैः समन्वितः॥२६॥

अक्षतवर्धापनम्

भो! प्रवेशोऽद्य युष्माकं श्रीजिनशासनेऽभवत्।
क्रियते भाग्यपुण्या वो वर्धापनं ततोऽक्षतैः॥२७॥

विभाग-२

## खण्ड : ४ मधुरं मधुरं मधुराधिपते: सर्वं मधुरम्

### चैतन्यप्रवाह:
(विभावदशाया वैलक्षण्यम्)
श्रेय: सरित्

### सुन्दरं सुन्दरं सुन्दरम्...
(भकारस्य भव्यता)
श्रेय:पद्म:

### अर्थोपनिषद्
(संयम:)
श्रेय: पुण्य:

### वैविध्यम्
(संतोषी नर: सदा सुखी)
श्रेय: सेतु:

### काव्यकौतुकम्
श्रेय: सद्मा

### रहस्यास्वाद:
(स्त्रीणां चतुर्नवति स्वरूपविशेषता:)
श्रेय: सखा

### नवं नवं सौन्दर्यम्
(नीतिशास्त्रज्ञै: प्रदर्शितानि षोडशदु:खानि)
श्रेयोदर्शी

### परमपदपन्था:
(दु:खितावस्थायामपि सुखावाप्ति:)
श्रेय: पथिक:

### चिन्तनम्
(त्रिभि: साफल्यं लभेम...)
श्रेय: पाथेय:

### जैनं जयति शासनम्
(दीक्षा-सत्यशिक्षा)
श्रेय:पथ:

### आत्मैश्वर्योपाय:
(धर्मात् सद्बुद्धिर्भवेत्)
श्रेयस्कर:

### शुद्धं सिद्धिप्रदं सुखावहं शुभावहम्
(विद्यानां मुखं कै: कैर्न मुम्बितम्)
श्रेय:श्री:

### साम्प्रतम्
(त्रिविधं ज्ञानं प्रशस्यते)
श्रेयोमति:

### वादो न वितण्डावाद:
(सन्मेधाप्राकट्यम्)
श्रेय: कान्त:





# ॥चैतन्यप्रवाहः॥

-श्रेयः सरित्

## ॥विभावदशाया वैलक्षण्यम्॥

आत्मगतस्वभावो विगतो यस्मात् स भावो विभावः । तद्विभावदशायां जीवो न किमपि जानाति । सम्पूर्णं स्वभावं विस्मरति । तेनैव चैतन्यप्रवाहविषयके लेखेऽस्माभिः केनोपायेन स्वस्वभावस्य प्राकट्यं भवेत्तस्य विचारविमर्शकरणाय विभावदशाया दर्शनमत्र साभिप्रायं प्रकटितमस्ति ।

एकदा भानुर्गृहकार्यार्थं किञ्चिद् विलम्बेन समागतस्तदा गृहस्वामिना प्रोक्तं भानो! कथमद्य विलम्बेन समागतस्त्वम्?

भानुः— सत्यं स्वामिन्! विलम्बेन समागतोऽस्म्यहम् ।

गृहपतिः— किं तत्कारणम्? येन त्वया विलम्बः कृतः ।

भानुः— स्वामिन्! बहु महत्त्वपूर्णं कार्यं समागतमासीत् ।

गृहपतिः— तदेव किं तत् कार्यमित्येव पृच्छामि खलु? कथनीयं न वा?

भानुः— वदामि । स्वामिन्! अद्याहं यदा गृहान्निर्गतस्तदा ममागमनमार्गस्थितस्यैकस्मिन् गृहे तारं तारं स्त्रीरुदनरवो मम कर्णपटलेऽपतत् । सकरुणरुदनरवं श्रुत्वा ममात्रागमनं स्थगितम् । मम चरणौ वलितौ तत्र रुदनसंयुतं गृहं प्रति ।

तथा च तद्गृहे प्रविष्टोऽहम् । बहुजनास्तत्रस्था रुदनशीलाः शोकाकुलाश्चासन् । अहमपि तूष्णीं भूय तत्रैव स्थितः । किञ्चित् समयानन्तरं तद्गृहस्य कर्मकरेण सर्वोऽपि व्यतिकरः कथितः । तज्ज्ञात्वा ममाप्यत्यन्तं दुःखं सञ्जातम् ।

गृहपतिः— कः व्यतिकरो जातस्तत्र?

भानुः— बहु दुःखकरं व्यतिकरमस्ति तत्स्वामिन्! । भवते ज्ञापयिष्याम्यहं किन्तु बहुविस्तृतमस्ति तत्तस्मादधुना भोजनादिकं निष्पाद्य पश्चात् श्रावयिष्यामि ।

गृहपतिः— अस्तु ।

भोजनादिकं सर्वं झटिति कृत्वा गृहपतिरपि जिज्ञासया सज्जोऽभवत् । भानुः सर्वं गृहकार्यं निष्पाद्य गृहपतेः समीपं समागत्य समुपविष्टः । सर्वेऽपि परिवारजनाः समागताः । यदुक्तं गुर्जरभाषायाम्-"अधुरी (अपूर्णा) वार्त्ता मधुरा"

सर्वेऽपि तद्व्यतिकरं ज्ञातुं समुत्सुका एकमनाः समुपविष्टाः । गृहपतिनिर्देशानन्तरं वक्तुं प्रारब्धं भानुना । तस्य गृहस्य स्वामी जिनचन्द्रो व्यवहारी धनाढ्योऽस्ति । तस्य रतिचन्द्रो मतिचन्द्रोऽतिचन्द्रो गुणचन्द्रश्चेति चत्वारः पुत्राः सन्ति । ते सुरूपबुद्धिबलसंयुता यौवनसम्पन्ना जाताः ।

अन्यदा गृहाभ्यन्तरे रात्रिसमये तेषां सङ्गोष्ठी प्रवृत्ता । चिरकालं सङ्गोष्ठी प्रचलिता । तत्र पुण्योदयविषयिका वार्त्ता प्रचलिता । तदा च पुण्यं निर्णेतुं सर्वेऽपि कटिबद्धा अभवन् । सर्वेऽपि स्वपितुर्जिनचन्द्रसकाशात् सपादलक्ष-सपादलक्षस्वर्णमुद्रां स्वीकृत्य स्वपुण्यपरीक्षार्थं गताः ।

तत्र प्रथमपुत्रो रतिचन्द्रो लक्षणविद्याज्ञ आसीदतः कुण्डलपुरं गत्वा सपादलक्षस्वर्णमुद्रयैकं सलक्षणं बृहत्काष्ठस्तम्भं गृहीत्वा स्वगृहे समागतः । सकाष्ठस्तम्भं तं दृष्ट्वा यावत् सर्वे हसन्ति स्म तावद् बृहत्त्वात् काष्ठस्तम्भो गृहप्रवेशावसरे एव त्रुटितः । निर्गतानि च तन्मध्यात् प्रत्येकं सपादलक्षस्वर्णमूल्यानि सपादलक्षरत्नानि । सर्वेऽपि हास्यं त्यक्त्वा मन्त्रमुग्धा इव जाताः ।

द्वितीयपुत्रो मतिचन्द्रोऽङ्गविद्यापारगः । स चन्दनपुरं गत्वा "श्रियं" वरेत् ।

सर्वलक्षणसंयुतः कर्मकरः सपादलक्षसुवर्णमूल्येन गृहीतवान् । स यावता तं गृहीत्वा स्वगृहं प्रविशति तावता तु गृहवाटके ऋषभः केनापि कारणेन नष्टः । तस्य कीलकोऽपि भग्नभूमिको जातः । तदैव कर्मकरेणर्षभ आनीतः । यदा स ऋषभं बध्नातुं कीलकं भूमौ क्षिपति तदा स भूम्यन्तं न गच्छति । कथञ्चित् भूमौ स्थापितुं यावद् बलस्योपयोगं करोति तावद् भूमिमध्यात् प्रचुरं धनं निर्गतम् । तदा सर्वेऽप्यङ्गविद्यापारगमतिचन्द्रमुखं दृष्ट्वा हर्षिताः ।

तृतीयसुतोऽतिचन्द्र शकुनविद्यापारगः । सोऽपि सपादलक्षस्वर्णमुद्रां गृहीत्वा धनार्जनाय गन्तुमना शुभशकुनप्रतिक्षां कुर्वन् मासमेकं गृह एव स्थितो । अन्यदा प्रातः समुत्थाय यदा देहशुद्ध्यर्थं बहिर्गच्छति तदैव सम्मुखं कृष्णसर्पं पश्यति । तस्योपरि पुनः कृष्णपक्षिणं पश्यति । स पुनः शुद्धदिक्षु स्वमुखं स्थापयति । मुखेनापि सुस्वरं वदति । "सर्पोऽपि दमितः" इति दृश्यते । इदं सर्वं दृष्ट्वातिचन्द्रेण ज्ञापितं— सर्वश्रेयस्करोऽयं शकुनः । कस्यापि कथनावसरमपश्यन् विना द्रव्यं धनार्जनाय निर्गतः । चिन्तितं चानेन न दूरं गन्तव्यम् । अद्यात्रैव मम धनाप्तिर्भविष्यति । न तत्र शङ्का कर्तव्या । तत्रैव राज्ञा सप्तदिवसाभ्यन्तरे स्वमृत्युवार्ता ज्ञाता । तेन सकलशहस्तिराजः सज्जितः । नगरभ्रमणमारब्धम् । तदैव सन्मुखायातोऽतिचन्द्रोऽभिषिक्तो हस्तिना । तथा चातिचन्द्रो राजाभवत् ।

चतुर्थपुत्रो गुणचन्द्रः सर्वगुणसर्वविद्यासम्पन्नः किन्तु मायादोषवञ्चितः सर्वगुणानां नाशं करोति । स वदत्यन्यत् करोत्यन्यत् । पश्यत्यन्यत्र गच्छत्यन्यत्र । कदा किं करोति न कोऽपि तन्निर्णेतुं शक्यः । सर्वविद्यागुणसंयुक्तोऽपि मात्रैकदोषेन तस्य सर्वं नश्यति । निर्णयानुसारं सोऽपि धनार्जनाय गतः । प्रभूतधनाप्तिहेतुना मासेनैकेन देशान्तरं गत्वा मायया विश्वासघातादिपापकर्मणा च बहु धनार्जनं करोति । यदा स प्रत्यागच्छति तदा समुद्रमार्गे तस्य पोतस्त्रुटितः । धनादिसर्वपरिवारेण सार्धं स जले निमज्जति । मरणं च प्राप्नोति ।

सर्वेषामत्र रुदनकारणमिदमस्ति । यथोच्यते— सर्वे गुणाः काञ्चनमाश्रयन्ति" तद्वत् मायाविरहितो यो भवति स सर्वेषां प्रियो भवति । न कस्याप्यप्रियो भवति स जनः । मायाया मूलं लोभः । लोभस्तु नूत्नापेक्षारूपेण प्रभवति । अपेक्षा तु सुखाभिलाषेण समुत्पन्ना भवति । सुखाभिलाषा दुःखद्वेषेण भवति । ततः सुखाभिलाषादिविभावभावेन स्वात्मनः स्वभावो दूरं गच्छति । अतो मायाविभावं सन्त्यज्य सारल्यभावरूपं स्वभावं स्वाधीनं करणीयम् ।

॥इति शम्॥



- श्रेय:पद्य

## ॥भकारस्य भव्यता....॥

"नरत्वं दुर्लभं लोके"इत्यनेन मानवजीवनं सुदुर्लभमिति तत्र तत्र ज्ञानिभिः प्रदर्शितम्। तथा चास्माभिः पुण्योत्कर्षेन प्राप्तं तज्जीवनं यदि जीव्यते तदा तस्य किञ्चित् सार्थक्यं भवेत्। यदि जीवनं न जीव्यते तर्हि पशुवदेवास्माकं जन्म ज्ञातव्यः। यतो जन्म जीवनं मरणमित्येतानि सर्वाणि समानमेव नरपश्वोः। उक्तं च—

आहारनिद्राभयमैथुनं च सामान्यमेतत्पशुभिर्नराणाम्। इति

तस्मात् पशोर्मनुष्यजन्मनः श्रेष्ठत्वख्यापनाय स्वोत्कर्षाय च कार्यपञ्चकं कर्तव्यं यद्भकारे सन्निविष्टमस्ति तदुच्यते- भव्यात्मभिर्भकारपञ्चकं स्वस्य हृदये संस्थाप्य स्वस्योत्कर्षाय, स्वगुणप्राप्तये, स्वदोषनिर्दलनाय, स्वदुःखनाशाय, कषायनाशनाय, विषयविषवारणाय भकारपञ्चकस्वरूपेणैव भाव्यम्।

तन्नामानि- **१) भाषा २) भूषा ३) भोजनम् ४) भवनम् ५) भावना**

किञ्चित् तेषां विवर्णनमत्र क्रियते—

१) **भाषा**- भाषयैव जनस्य प्रसिद्धिर्भवति। आद्या प्रसिद्धिर्दर्शनेन भवति। द्वितीया तु भाषया। भाषायां पञ्च गुणा आवश्यकाः।

मृदुता- कोमलता २) स्पष्टता ३) सत्यता ४) प्रियता ५) जिनाज्ञा नाम जिनवचनप्रामाण्यम्।

एवं भाषया जीवने भव्यताया वृद्धिर्भवति।

२) **भूषा**- वस्त्रादिपरिधानमपि त्रिप्रकारकमपेक्ष्यते।

आडम्बररहिता- स्वधनविभवादिसमन्विता २) स्वच्छता- मलरहितानि वस्त्राणि भाव्यानि।

३) संयमितता— न प्रभूततरा भूषा कार्या। विना संयमं न किमपि कार्यं प्रशस्तं प्रशंसार्हं भवति।

३) **भोजनम्**— भोजनं त्रिप्रकारकं ग्राह्यम्। १) नियमयुक्तम्- नियमयुक्तमेव भोजनं स्फूर्तिजनकं भवति। परिमितं भोजनं(मितभुक्) कर्तव्यं न प्रभूतं भोक्तव्यम् २) समानता- भोजने प्रतिदिनं समानतावश्यकी। अद्य किञ्चित् श्वः प्रभूतमिति न कर्तव्यम्। प्रमाणोपेतं सात्विकं भोजनं सुखकरं भवति। ३) अन्नाहारः- अन्नभोजनं झटिति धातुनिर्माणं करोति। ततोऽन्नभोजनं कार्यम्।

४) **भवनम्**— पापस्थानरहितं भवनमावश्यकम्। तस्मात् सदाचारमयं जीवनं भवति। भगवत्स्थान-सद्गुरुप्रतिकृत्यादिसमन्वितं सद्विचारस्थानं भवनं पुण्यवृद्धिकरं भवति।

५) **भावना**— सद्विचारः। सत्परिणामः सदध्यवसायः। तत एव भावनया मुक्तिसुखं लभते। ततो भावना निरन्तरं भावनीया। इत्येवं भकारपञ्चकेन सर्वा सिद्धिः साध्यते।

# ॥अर्थोपनिषद्॥

- श्रेयः पुण्यः

॥**संयमः**॥

॥**सम्**॥ इति

ज्ञान-ध्यान-सुखवर्धने।

॥**यः**॥ इति

सूर्यसमानीभूयाथवा चन्द्रसमानीभूय।

॥**मः**॥ इति

आकर्षणे अर्थात्

सम्यक्प्रकारेण ज्ञान-ध्यानस्वरूप-सुख-वर्धने

सूर्य-चन्द्रसमानीभूयाकर्षणं करोति

यः स **संयमः** (इत्येकाक्षरकोषतः)

अथवा

सम्यक्प्रकारेण यम-नियमादिषु

प्रयत्नः स **संयमः**॥

(॥इति शम्॥)

# ॥वैविध्यम्॥

- श्रेयः सेतुः

## ॥सन्तोषी नरः सदा सुखी॥

विविधसामग्रीसाधनमध्येऽपि जीवो दुःखमेवाप्नोति। जीवस्य यथा यथा स्पृहा वर्धते तथा तथा सन्तोषतः स दूरे गच्छति। साम्प्रतमपि ये जनाः सन्तोषप्रधानं जीवन्ति ते सुखिनः सन्ति। निरपेक्षजीवने सन्तोषो मुख्यहेतुः। निरपेक्षता च समाधिसेतुः। सन्तोषसहचरितनिरपेक्षतायां दृष्टान्तः पण्डितवर्यः श्रीजयसुखदासोऽस्ति। तथाहि— जयपुरनगरभूपरामसिंहेन स्वकार्यकरणाय कर्मकरत्वेन जयसुखदासो नियुक्तः। प्रथमदिनतः तस्याजीविकार्थमष्टरूप्यकानि निश्चितानि। एवमेव चत्वारिंशत् संवत्सराण्यतीतानि। किन्तु तस्य वृत्तौ काचिदपि वृद्धिर्न कृता राज्ञा। एकदा राज्ञा ज्ञातं यत् श्रीजयसुखदासस्य वृत्तिस्तथैवास्ति। मया चत्वारिंशदब्दतो तस्यां वृद्धिर्न कृता। ततस्तेन स्वक्षतिं स्मृत्वा तत्क्षतिसम्मार्जनाय समाहूतः पण्डितवर्यः। कथितं च राज्ञा भोः! महाशय! मम क्षतिः क्षन्तव्या। तव वृत्तौ वृद्धिः कर्तव्यैवासीत्। अद्यावधि र्मम महान् प्रमादोऽभवत्। अद्य क्षतिक्षालनाय वद किं कुर्वे? यत्त्वं कथयिष्यसे तदेव कार्यम्। राज्ञैवं पृष्टे सति वृद्धेन श्रीजयसुखदासेन प्रोक्तम्— तत्रभवतां मय्येषा कृपा सैव प्रशस्या। वृत्तिवर्धनेन किम्? तथापि चेद्भवतामाग्रहस्तर्हि मम वार्धक्यात् कार्यकरणेऽल्पसमयःस्यात्तर्हि सुन्दरं वृत्तिवर्धनेनु मम स्पृहा नास्तीति।

एवं श्रीजयसुखदासस्य निस्पृहता धन्यवादार्हा। राज्ञा तस्य समयोऽल्पीकृतो वेतनवृद्धिरपि कृता। बृहत्पारितोषिकमपि दत्तम्। एवं सन्तोषेण जनः सदा सुखमाप्नुयात्। समिति सम्यक्प्रकारेण तोषः, तुष्टिः, आनन्दः, हर्षश्च येन प्राप्नोति जीवः स सन्तोषः।

॥इति शम्॥



# ॥काव्यकौतुकम् ॥

- श्रेयः सद्मा

शोभते क्रिया ज्ञानेन ज्ञानं क्रियया शस्यते ।
द्वाभ्यां हि शोभते मोक्षमार्गो हि शाश्वतः परः ॥१ ॥

शशिना शोभते ज्योत्स्ना ज्योत्स्नया शोभते शशी ।
रात्री वै शोभते द्वाभ्यां यत्र निद्रा सुखावहा ॥२ ॥

साधुभिः सुसदाचारः सदाचारेण साधवः ।
द्वाभ्यां तु शोभते जैनशासनं परमोच्चकम् ॥३ ॥

विनयेन सुशिष्यत्वं शिष्येन विनयः सदा ।
द्वाभ्यां सच्छोभते शीलं मिथ्यातमोविनाशकम् ॥४ ॥



गुणराशिर्मनुष्येन मनुष्यो गुणराशिभिः ।
द्वाभ्यां विशोभते नूनं मनुष्यत्वं सुश्लाघ्यदम् ॥५ ॥

ब्रह्मव्रतेन चारित्रं ब्रह्म तद्विरहेण न ।
द्वाभ्यां विशोभते साधुर्जगद्धितैककारणः ॥६ ॥

रागत्यागेन कैवल्यं कैवल्येन विरागता ।
द्वाभ्यां स शोभते नित्यं स्वभावो भगवच्छुभः ॥७ ॥



चैतन्येनात्मशोभा स्याच्चैतन्यमात्मना तथा ।
द्वाभ्यां विशोभते जीव-पदार्थस्य सुनिश्चयः ॥८ ॥

ज्ञानेन दर्शनं पुण्यं दर्शनेन च तत् पुनः ।
द्वाभ्यां च चरणं शुभ्रं भवाब्धेस्तारकं वरम् ॥९ ॥

# रहस्यास्वादः

-श्रेयःसखा

॥स्त्रीणां चतुर्नवति स्वरूपविशेषताः॥

१३) शरीरं शोकस्य—

शोकः अर्थात् दुःखम् । तस्याः शरीरं दुःखप्रदायकम् । शोकस्वरूपमेव स्त्रियः शरीरम् । तदुपरि यः रागं करोति स निश्चयेन शोकं प्राप्नोति । वीरककान्दविकस्यात्यन्तसुरूपां वनमालां भार्यां राजा गृहीत्वा स्वान्तःपुरं नीतवान् । तस्मान्मूढात्मा वीरककान्दविकः शून्यचित्तः समभवत् । वनमाले! वनमाले! इति प्रदीर्घोच्चारणं कुर्वन् नगरान्नगरमटति । तस्य पृष्ठे प्रभूततरा बाला जनाश्च लकुडादिकं स्वीकृत्य लगन्ति तं ताडयन्ति च । तज्जाया तु राज्ञा साकं वैषयिकं सुखमनुभवति स्म । शोकसागरे पतितस्य स्वभर्तुः स्मरणमपि नाकरोत् । अतः स्त्रियः शरीरं शोकस्वरूपमिति शास्त्रे वर्णितम् ।

१४) भेदः—

तत्राद्या भेदकर्त्री स्त्री प्रदर्शिता । आदौ सा मनसि प्रवेशं करोति । तदुत्तरं मनसि भेदं जनयति । पश्चात् कुलमर्यादायाः नाशं करोति । पश्चात् परिवारस्य ध्वंसमेव करोति । यथा यथा साफल्यं प्राप्नोति तथा तथा सर्वत्र भेदकार्यमारभते । इत्यस्याः स्वभावः । चारित्रस्यापि हननविषये शास्त्रे नैके दृष्टान्ता उपलभ्यन्ते । तेनैव तस्या अपरं नाम भेद इति कथ्यते ।

१५) आशा रागस्य—

यस्या स्त्रियो रागस्य आशा = वाञ्छा तस्याः प्रादुर्भावो भवति तत एव रागस्याशेति । प्रथमं तु दर्शनेच्छा वर्धते । पश्चात्तु वार्तालापविषयिणी वाञ्छा वर्धते । तदनु स्पर्शेच्छा तदनु परिरम्भेच्छा भवति । यस्या रागेण पुरुषस्य नवीना नवीना वाञ्छा समुपद्यते ततः सा कीर्त्यते आशा रागस्य ।

१६) दुश्चरित्राणां निलयः—

निलय इत्यस्य गृहमित्यर्थो भवति । अथवा स्थानमिति । केषां निलय? इत्युक्ते दुश्चरित्राणामित्युत्तरं लभ्यते । यतो यस्याश्चरित्रं न केनापि परिमाणेन मीयते विश्वे । जगति यानि यानि दुश्चरित्राणि सन्ति तेषां मूलं स्थानमिदमेव भवतीत्यत्र संशयो न कर्तव्यः ।

# ॥नवं नवं सौन्दर्यम्॥

-श्रेयोदर्शीः

## ॥नीतिशास्त्रज्ञैः प्रदर्शितानि षोडशदुःखानि॥

भर्तृहरिणा त्रीणि शतकानि संरचितानि। यदा स पिङ्गलारूपरागलम्पटो भूत्वा भोगभृङ्गोऽभवत्, तदा तेन शृङ्गारशतकस्य रचना कृता यदा राज्यं प्राप्तं तदा राज्ये एकीभूय नीतिशतकं निर्मापितम्। यदा पिङ्गलाया दुश्चरित्रं प्रकटीभूतं तदा अहो! आश्चर्यम् इति कृत्वा वैराग्यरसेन सम्पूरितं वैराग्यशतकं लिखितम्। इत्ययं दृष्टान्तः सर्वेषां सुज्ञातः सुप्रसिद्धश्चास्ति। इत्येवं बहुभिर्विद्वद्भिर्बहूनि ग्रन्थानि लिखितानि सन्ति। ततो बहुविधनीतिशास्त्राण्यवलोक्य तत्र स्वनीतिवचनानि किञ्चिदत्र प्रस्तूयते।

नीयते अनेन मार्गे जन इति नयः। येन प्रभावेन जनो नयमार्गे नीयते सा नीतिः। नीतिशास्त्रज्ञैर्नीतिशास्त्रेषु षोडशदुःखानि प्रदर्शितानि। यदि नीतेर्यथार्थं पालनं न भवति तदा दुःखेन पीड्यते नरः। ततो नीतेः पालनं बह्वावश्यकम्। विना नीत्या दुःखभाग् भवेन्नरः। यदि नीतिशास्त्रवचनानां परिशीलनपूर्वकं सेवनं न क्रियते तर्हि षोडशदोषा भवन्ति। ते चात्र प्रदर्श्यन्ते। अयमाशयोऽत्र, नीतिशास्त्रविषये प्रभूता ग्रन्थाः सन्ति। ततः समुद्धृत्य षोडशदुःखस्थानानि यानि सन्ति तदत्र प्रस्तूयन्ते।

I. गृहे कूपो दुःखदायको भवति। यतः सङ्क्लेशः पुनः पुनः गृहे सम्भाव्यते।
II. पुत्रस्य द्यूतरमणं दुःखारिजननं स्यात्। ततो वर्ज्यम्।
III. गृहप्रवेशमार्गे वृक्षो दुःखकृत्।
IV. प्रातिवेश्मिको यत्र शठो निर्घृणः कुमार्गी भवति ततस्त्याज्यः।
V. गृहनायको यत्रान्य-मनस्को भूत्वा कार्यं करोति ततो दुःखकृत्।
VI. निर्धनिको गृहनायक आपत्तिदो भवेत्।
VII. कुलेषु क्लेशो भवेत्। ततोऽशान्तिर्भवेत्।
VIII. धनार्जने परदेशगमनं न सुखावहम्।
IX. वैधव्यभावभाक्सुता कर्मणैव समागता।
X. कलहकृत्स्वजनाः सर्वस्वहा भवेत्।
XI. अन्यायप्रियभूपतिः धनहर्ता भवेत्।
XII. रोगभृत्शरीरं पापस्य फलम्।
XIII. विषयेषु लाम्पट्यं लज्जारहितं च सुखरागेणैव स्यात्।
XIV. कपटभावधारी निःस्नेही जाया भाररूपा भवेत्।
XV. शिरसि ऋणभारवहनं परधनहरणफलम्।
XVI. प्रभूततरः स्वस्य परिवारो दुःखेणैव भवति।

इति षोडशदुःखस्थानानि नीतिशास्त्रोक्तानि ज्ञानवृद्ध्यर्थमत्र प्रदर्शितमस्ति। नीतिः सर्वत्र धर्म-कुल-वंश-गृह धन-परिवार-स्वपापरक्षणाय बलवती भवति। नायं धर्मः किन्तु शुभसाहित्यमिति प्रदर्शितमत्र।

॥इति शम्॥



# ॥परमपदपन्थाः॥

-श्रेयःपथिकः

॥दुःखितावस्थायामपि सुखावाप्तिः.........
अहो! आश्चर्यम्॥

दुःखावस्थायाममि सुखावाप्तिः सुदुर्लभास्ति। अनन्तभवेषु जीवस्येदृशी स्थितिरस्ति यत् सुखमेवेष्टम्। न तु दुःखम्। जीवः सुखमेवाभिलषति। तदर्थं यतते। सुखार्थमेवेतस्ततो धावति। स्वप्नेऽपि दुःखं नेच्छति जागृतावस्थायां तु कदापि नैव।

विश्वयुद्धे बहुजना दुःखग्रस्ता जाताः। तदा जर्मनीदेशे नगरजनानां सेवाकार्यकृत् **मिडलमेननामान** एकः कार्यकर आसीत्। स सर्वेषां गृहे बम्भ्रमति परिपाट्या त्वेकस्या वृद्धाया गृहं गतः। तेन पृष्टा वृद्धा। तव जीवने किमपि प्रयोजनमस्ति न वा? तया कथितम्। न किमपि प्रयोजनमस्ति मे जीवने। मम सर्वं सुखकरमस्ति। शुभं वर्तते। न काप्यपेक्षा।

सा पुनः उक्तवती। भोः! **मिडलमेन**! मम एकां वार्तां शृणु। विश्वयुद्धात्प्राक् मम समीपे प्रभूततरा भूमिरासीत् सुसम्पन्नः परिजनश्च। महद्वैभवपुरस्सरमैहिकमैश्वर्यमासीत्। किन्त्वधुना त्वमपि जानासि ममैतादृशीमवस्थाम्। तथापि चिन्ता न कार्या। शनैः शनैः सर्वं पूर्ववद् भविष्यति। निश्चयेन सर्वमहं पुनः प्राप्स्यामि।

अतः त्वमेकं कार्यं कुरु। अस्माकं देशे ये जना अक्षमास्तान् साहाय्यं कुरु। अहं तु सक्षमा। अहं तु दुःखितावस्थायामपि सुखमग्ना स्थातुं शक्नोमि। सा कला ममाधीना जाता। इत्येवं दुःखावस्थायां सुखप्राप्तिः सुदुर्लभास्ति। इयमेव कला जनैः प्राप्तव्या। तत्रैव च प्रयत्नातिशयः कर्तव्यः।

॥इति शम्॥





# ॥चिन्तनम्॥

-श्रेयः पाथेयः

## त्रिभिः साफल्यं लभेम....॥

वामर्षिसमीपं समागत एको भक्तः। वन्दनानन्तरं पृष्टम्। जीवनसाफल्यं केन स्यात्? वामर्षिणा स्वध्यानादि क्रियां समाप्य कथितम्। एकस्मिन् ग्रन्थे एक ऋषिः समुपादिदेश।

**''यद् हस्ताधरहृदयसाफल्येन जीवनसाफल्यं कर्तव्यं मानवैः''।**

यतस्तन्मार्गेण सर्वाः सिद्धयः। तत्र साधनानि त्रीणि दर्शितानि। बह्व्यः सिद्धयश्च।

**तत्राद्यं साधनं हस्तचालनम्—**

**चालनं नाम क्रिया। कीदृशी सा हस्तस्य क्रिया।** कस्य चलनस्वभावेन सार्थक्यं कथमिति प्रश्ने निरन्तरं यदि स योग्यकार्यविषये व्यस्तो भवति तदा प्रथमसाधनस्य साफल्यं ज्ञातव्यम्। नाम सर्वदा मनुष्येन सत्कार्ये व्यापृतं भाव्यं कदाप्यालस्यं न कर्तव्यमित्याशयः।

**द्वितीयं साधनं हास्ययुक्तमधरम्। माधुर्यवचनम् = प्रीतिवचनम्।** यतोऽस्माकमपेक्षैता दृश्येवास्ति।

सर्वैश्चास्माभिः सार्धं सुष्ठु सुवचनेन सुवर्तनेन च सह वर्तितव्यम्। यद्यस्माकमेतादृश्यपेक्षा तर्हि सर्वेषामपि मत्त एतादृश्येवापेक्षा स्यात्। ततोऽस्माभिरपि सर्वैः सार्धमेतादृशो व्यवहारः कर्तव्यः। यतः सकलक्लेशमूलं वचनमस्ति। ततो वचनमाधुर्यमेव ह्यधरहसनमस्ति। वचनमाधुर्याद् दुष्टकर्ममुक्तिर्भवति। क्रियालापो भवति। प्रीतियुक्तो व्यवहारः स्यात्। इत्येवमधरहसनं सुखावहम्। सर्वदोषहरं च भवति।

**तृतीयं साधनं हृदयनिर्बन्धनम्—**

हृदयस्य निर्बन्धनम्। अर्थाद् बन्धनरहितं हृदयम्। तत्र बन्धनं ग्रन्थिरूपम् = अध्यवसायरूपम्। अयमीदृशः अयमीदृशः। अनेन सार्धं न व्यवहरामि। कदापि न वदिष्यामि। कदाप्यस्य मुखं न पश्यामीत्यादि सर्वोऽपि द्वेषात्मकपरिणामः। अनेन व्यवहारेण जनो यदि वियुक्तो भवेत्तर्हि बहुपापेभ्यो विमुक्तो भवेत्। द्वेषत्यागात् शनैः शनै रागत्यागोऽपि भवेत्ततो हृदयग्रन्थिनिर्बन्धनमपि सुखावहम्।

इत्येवंरीत्यानेन मार्गेण जीवः सर्वथा सौम्यः शान्तः सरलः समाधिस्थः स्वस्थश्च भविष्यति।

इत्येवं यदि सर्वे जना आचरेयुस्तर्हि निश्चयेन तेषां जीवने साफल्यरूपा सिद्धिरागमिष्यतीत्यत्र नास्ति संशयः।

॥इति शम्॥



# जैनं जयति शासनम्

-श्रेय:पथः

## ॥दीक्षा- सत्यशिक्षा॥

जैनशासने एव निष्पाप-निर्दोष-निर्भयजीवनपद्धतिः सन्दर्शितास्ति। नान्यत्रैतादृशी जीवनपद्धतिदर्शिता। यतः प्राणिजीवनव्यवहारे जीवनपद्धतिर्महत्त्वपूर्णेति सर्वत्र विदितमेव। अस्माकं जीवनपद्धतिः पुण्यपापफलदा भवति। पुण्य-पापैस्तु सुख-दुःखानि भवन्ति। सुख-दुःखैः पीडित-आर्तरौद्रश्च च जीवः स्वयं स्वस्य दुर्गति-परम्परां सर्जयति। किन्तु जैनदर्शने या जीवनपद्धतिर्निरूपिता सा धर्मस्वरूपा। अत एव सा पापविरहिता। यत्र पापं न तत्र कथं दोषः? तेनैव निर्दुष्टेति कथितम्। यत्र दोषस्य सम्भावना नास्ति तत्र भयं न सम्भवति। अत एव निष्पाप-निर्दोष-निर्भयजीवनपद्धतिर्हि जैनशासने 'संयमधर्म' इति नाम्ना कथिता।

तत्रैव सत्यशिक्षां जीवः प्राप्नोति। सा हि सत्यशिक्षा सत्यजीवनमार्गस्वरूपास्ति। सत्यस्वरूपा, भव्यमार्गस्वरूपा नाम्ना 'दीक्षा' इति प्रोच्यते।

यो दीक्षां गृह्णाति स धन्यो भवति। स धन्यातिधन्यः पुण्यवान् भवति। भाग्यवान् भवति न तत्र संशयः कर्तव्यः। सा दीक्षा मोक्षमात्रदायिनीति निश्चित्य समुह्या। य एवं वहति नूनं स सर्वदा सुखं लप्स्यते।

सा दीक्षा बहुभिः सङ्गृहिता समाचरिता पालिता पारमञ्चिता च।

- ✍ यथा पुण्डरिकस्वामिनः पार्श्वे चतुरशीतिलक्षसहिताभ्यां द्वाभ्यां नरपतिभ्यां संयमो जगृहे। तदा दैवैः स्वर्णमण्डपो रचितः। प्रभृता देवसमुदायाः आसन्। मानवास्तु नगण्या आसन्।
- ✍ प्रौढसुख-सौभाग्यकमलभ्रमरमानसो जयानन्दराजकुमारो जिनवचनं शृत्वा भावितमानसो राजकुलगण-नगरगण-पञ्चाशत्-पञ्चाशत्पुरुषसहस्रैः सार्धमेकलक्षैः पुरुषैः प्रव्रजितः।
- ✍ प्रभुमहावीरैर्गौतमस्वाम्यादीनां चतुःसहस्राणां चतुःशतयुक्तानां प्रव्रज्या प्रदायि।
- ✍ श्री सुधर्मास्वामिभिः प्रव्राजिताः श्रीजम्बुस्वाम्यादयः पञ्चशताः सप्तविंशत्यधिकाः।
- ✍ इडरनगरे वैक्रमीय १५४८ तमे वर्षे हेमविमलसूरिभिः पञ्चशतपुण्यात्मनां दीक्षा दापिताः।
- ✍ वैक्रमीय १९३२ तमे वर्षे पूज्यबुटेरावजीमुनिभिरात्मारामजीमहाराजादीनाम् अष्टादशस्थानकवासीदीक्षितान् श्वेताम्बरसम्प्रदायस्य दीक्षा प्रदत्ता।
- ✍ ततः परं दीक्षायुगप्रवर्तक-बालदीक्षासंरक्षक-व्याख्यानवाचस्पति-सूरिसार्वभौमाचार्यप्रवर-विजय रामचन्द्रसूरीश्वराणां प्रभावकनिश्रायां सप्तविंशति-षड्विंशति-चतुर्विंशति-एकविंशति-षोडश-एकादशादि प्रभूततरसमूहदीक्षोत्सवाः सञ्जाताः। जैनशासने कोटिप्राप्तप्रभावना जाता।
- ✍ तदनन्तरं विविधगच्छेष्वपि विंशति-सप्तविंशति-षट्त्रिंशत्-चतुश्चत्वारिंशत् समूहदीक्षा जैनशासनप्रभावनापटहरूपा सञ्जाता।

ततः परं तेषामेव दीक्षायुगप्रवर्तकसूरिरामचन्द्रशिष्यपरम्परागत-मुक्तिचन्द्र-जयकुञ्जर-मुक्तिप्रभसूरिपट्टधररत्न-निस्पृहमूर्ति-चारित्रमूर्ति-समतामूर्ति-प्रशान्तमूर्ति-समर्पणमूर्ति-व्यवहार-औचित्य-आगमदक्ष-प्रसिद्धप्रवचनकार-सूरिमन्त्र सन्निष्ठसाधक-पुण्यपवित्रता-स्वाम्याचार्यप्रवर-**श्रीमद्विजयश्रेयांसप्रभसूरीश्वराणां शुभ-मङ्गल-प्रभावक निश्रायाम** स्मिन्नेव वर्षे (वैक्रमीय-२०७६ तमे) सूरत-शौर्यपूरनगरे वेसुमध्ये माघशुक्लसप्तम्यां शनिवासरे (३१ फेब्रु. २०२०) समूहरूपा सप्तसप्तति दीक्षा जाताः।

शासनप्रभावना दिवं गता। कोटिप्राप्ता। सर्वत्र सर्वथा जैनशासनस्योद्यतोऽभूत्।
इत्येवं जैनेन्द्रशासनस्य प्रकृष्टतरप्रभावना सञ्जाता। जैनं जयति शासनम्।

॥इति शम्॥

# आत्मैश्वर्योपायः....

-श्रेयस्करः

## धर्मात् सद्वृद्धिर्भवेत्.....

धर्मो जगत्यगण्यसिद्धिसम्भारसमन्वितो भवति। धर्मो हि स्वर्गापवर्गसिद्धिं प्रददाति। धन-धान्य-स्नेही-स्वजन-सम्पत्ति-प्रतिष्ठादयो न रक्षकाः सौख्यकारकाश्च सन्ति। यतः उक्तं च- "**धर्मो रक्षति रक्षितः**" तत्रैव धर्मकारणेन सप्तधा वृद्धिर्भवति।

यथा- १.आयुर्वृद्धिः, २.यशोवृद्धिः, ३.प्रज्ञावृद्धिः, ४.सुखवृद्धिः, ५.श्रीवृद्धिः, ६.धर्मवृद्धिः, ७.सन्तानवृद्धिश्च। धर्मेण विना निर्दिष्टा वृद्धयो न भवन्ति।

अथ धर्मस्य किं स्वरूपम्? उच्यते- धर्मो रागद्वेषविरहितस्वभाववान्। मैत्री-प्रमोद-कारुण्य-माध्यस्थ्य-भावना-संयुक्तो धर्मः कीर्तितः। यदात्मनस्तुष्टि-पुष्टिमच्चित्तं तद्धर्मः प्ररूपितः। धर्मः स यत्र जननी-जनक-पत्नी-पति-पुत्र-पुत्री-भगिनी-मातामह-पितामह-मित्र-स्वजन-प्रातिवेश्मिक-नगर-जनादिभिः सार्धं सदौचित्यानुरूपः सदाचारः सेव्यते। धर्मः स यत्र जीवरक्षा जीवदया स्वशक्त्यनुरूपेण भवति।

धर्मः स यत्रौदार्यसुदाक्षिण्य-पापजुगुप्सा-निर्मलबोधप्रायः जनप्रियत्वादिभिर्धर्मसिद्धिर्जनितानि लक्षणानि सन्ति तद्वद्धर्मेण सप्त वृद्धयः सन्ति।

१. **आयुर्वृद्धिः** – शाश्वतायुः = मोक्षः। तस्य हेतुर्धर्मः।

२. **यशोवृद्धिः** – सदाचारभृज्जीवनं यस्य प्रसिद्धिर्यशः।

३. **प्रज्ञावृद्धिः** – सन्मार्गदायी मतिप्रागट्यहेतुर्धर्मः।

४. **सुखवृद्धिः** – धर्मः सर्वप्रकाराणां सुखहेतुः। यतो जगति सर्वेषां अशान्तिहृत् शान्तिकृद् धर्म एवास्ति। तत एव धर्मात् सुखवृद्धिः।

५. **श्रीवृद्धिः** – जगति या या प्रशस्या श्रीः सा सर्वापि धर्मात्मनः एव प्राप्नोति। ततस्तेषामेव श्रीवृद्धिर्यो धर्मे सुस्थिरः।

६. **धर्मः** – यथा धनेन धनमाप्यते तद्वद्धर्मेणैव धर्मः प्राप्यते ततो धर्मवृद्धिः।

७. **सन्तानः**- धर्मप्रभावेण धर्मात्मा सर्वं शुभं सुन्दरं लभते। तद्वत् सन्तानादिकमपि शुभं शुभमतरमेव लभते। ततः सन्तानवृद्धिरपि धर्मेणैव। यथोक्तम्-

**आयुर्वृद्धिर्यशोवृद्धिर्वृद्धिः**
**प्रज्ञासुखश्रियाम्।**
**धर्मसन्तानवृद्धश्च धर्मात् स्युः सप्त**
**वृद्धयः॥ (उपदेशसारः)**

इत्येवं विज्ञाय धर्मे एव यतितव्यम्।

॥इति शम्॥

# शुद्धं सिद्धिप्रदं सुखावहं शुभावहम्....

-श्रेयःश्रीः

## ॥विद्यानां मुखं कैः कैर्न चुम्बितम्॥

जगति वेश्यानामिव विद्यानां मुखं कैः कैर्न चुम्बितम्। अर्थात् सर्वैः स्पृष्टमस्ति। यथार्ककरैः सर्वं जगत् स्पृष्टम्। पापैः त्रिकाले को जनोऽस्ति यो न स्पृष्टः? तद्वद् विद्यापि सर्वैः स्पृष्टा। सन्ति जगति द्वित्रायैर्न स्पृष्टा। ततो यो विज्ञानहीनः स 'मूर्खमूर्धन्य' इति गण्यते जगति।

आसीत् प्रतिष्ठानपुरे शालिवाहनराजा। तस्य चन्द्रलेखाद्याः पञ्चशतपत्न्य आसीत्। तास्तु षड्भाषाविदः। राजा पुनरनधीतव्याकरणः।

अन्यदोष्णकालः समागतः। आरब्धा जलक्रीडा राज्ञा। चन्द्रलेखाया उपरि जलं सिञ्चितम्। तत्र सुकुमारशरीरतायाः चन्द्रलेखा जलसेचनोद्भूतं शीतं न सहते। नृपस्तु तां प्रेम्णा निरन्तरं सिञ्चते स्म। तदा संस्कृतेन सा प्राह- देव! मां मोदकैः सिञ्च'। पुनः पुनः कथनेऽपि शालिवाहननृपस्तु तत्त्वं न विवेद। परं मोदकनाम श्रुत्वा दास्याः सकाशान्मोदकपटलिकांस्वीकृतवान्। चन्द्रलेखा तु तां दृष्ट्वाहासीत्। 'अहो! नृपोऽयमज्ञः। नृपेणाप्युपहासो ज्ञातः।

पृष्टा सति सा राज्ञी जगाद। अन्यार्थस्थानेऽन्यार्थज्ञानाद् हासः। इदं ज्ञात्वा लज्जितेन राज्ञा सद्यो विद्यार्थमुपवासत्रयेणाराधिता भारती। सा प्रसन्ना जाता। तद्वरं प्राप्य महाकविरभूद् राजा। तेनैवाग्रे गत्वा सारस्वतं नाम व्याकरणं कृतम्। तस्य ध्यानावसरे सर्वदापि भारत्यागच्छति।

ततो विद्या कैः कैर्न स्पृष्टा।

यथोक्तम् – वेश्यानामिव विद्यानां मुखं कैः कैर्न चुम्बितम्।
हृदयग्राहिणस्तासां द्वित्राः सन्ति न सन्ति वा॥

अतः सर्वैर्विद्याप्राप्तये यतितव्यम्।

॥इति शम्॥



# ॥साम्प्रतम्॥

-श्रेयोमतिः

## ॥त्रिविधं ज्ञानं प्रशस्यते॥

ज्ञानमात्मनि समवायसम्बन्धावच्छेदेन वर्तते। विना ज्ञानं जीवस्य व्यवहारे लघुता भवति। सर्वत्र ज्ञानसंयुक्तस्यैवात्मनः महत्त्वं विद्यते। ज्ञानमेवात्मनः प्रधानभूतो गुणोऽस्ति। ज्ञानेनाज्ञानविच्छेदो भवति। ज्ञानेन पापस्य क्षयो भवति। ज्ञानेन प्रभूता गुणा वर्धन्ते। ज्ञानेन पापविरतिर्भवति। विरत्या पुण्यलाभः स्यात्कर्मनिर्जरा च स्यात्। कर्मनिर्जरया विशिष्टसंवरभाव आत्मनि प्रविशति। संवरभावेन शुद्धसंयमस्य सम्प्राप्तिः स्यात्। शुद्धसंयमेन सर्वज्ञभावत्वमापादयति। सर्वज्ञभावेन मुक्तिसुखं लभते जीवः। आत्मगतज्ञानम् आत्मदोषं दर्शयति। आत्मानं कार्याकार्यविचारणाकुशलं करोति। शास्त्रग्रन्थेषु ज्ञानस्य नैके प्रकाराः वर्णितास्ते सर्वेऽपि साभिप्रायसमन्विताः सन्ति।

शास्त्रोपदर्शितज्ञानस्य महत्त्वं त्रिविधम्। श्रुतज्ञानम्, चिन्ताज्ञानम्, भावनाज्ञानं च।

**श्रुतज्ञानम्-**

तत्र श्रुतज्ञानं श्रवणं श्रुतम्। अथवा श्रूयते इति श्रुतम्। अथवा श्रुतेन निर्वृतम् तच्छ्रुतम्। श्रुतं निरन्तरं पठन-पाठन-सुव्यवस्थितचित्तस्य जनस्य स्वच्छ-स्वादु-पथ्य-सलिलास्वादनतुल्य-नियन्तारं विषयतृषापहर्तुशीलं च भवति।

**चिन्ताज्ञानम्-**

निरन्तरं सम्यक्पठितश्रुतचिन्तनमननादिरूपस्थैर्यभावेन स्वात्मगतदोषनिवारणक्षमं क्षीररसास्वादतुल्यं विषयविरक्तिभावप्रवर्धमानं भवति।

**भावनाज्ञानम्-**

स्वात्मस्वभावभवनानुरूपसामर्थ्यवद् भावनाज्ञानं भवति। प्रत्येकसमयप्रवृत्तिषु दृढात्मस्वभावानन्यभावानुबद्धं भावनाज्ञानम्। कल्याणपथप्रदर्शितत्वादमृतरसास्वादतुल्यमिदं भावनाज्ञानम्।

श्रुतं तु तन्मात्रावधृतस्वरूपमन्यज्ञानद्वयनिरपेक्षम्। चिन्ताज्ञानं पुनर्नयप्रमाणसूक्ष्मयुक्तिचिन्तानिर्वृतं कथितम्। भावनाहेतुस्वरूपकलाभेदेन कालत्रयविषयमर्थात् त्रिकालविषयज्ञानप्राप्तिकारणम्। इत्येवंरीत्या त्रिविधं ज्ञानस्वरूपं निरीक्ष्य च स्वात्मगतं तज्ज्ञानं तत्प्राप्तौ यत्नपूर्वकं भाव्यम्। साम्प्रतं तु पाश्चिमात्यसंस्कारेणाङ्ग्लभाषायां ज्ञानं प्राप्य च सर्वे बुद्धिप्रतिभादयो गुणाः विनाशं यान्ति। बाल्यप्रभृति ये विषया बालकान् पाठ्यन्ते यया पद्धत्या च पाठ्यन्ते तेनैवं लगति यदेते बालका झटित्येव रोगातङ्कग्रस्ता भविष्यन्ति। साम्प्रतशिक्षा केवलं भारभूतास्तीत्यत्र नास्ति शङ्कावकाशः। यया विद्यया विनयादिगुणा न वर्धन्ते सा विद्या निष्प्रयोजनिकैव। यदि एते गुणा स्वस्मिन् न भवन्ति तर्ह्यग्रे स्वपुत्रादीनां का कथा? किं भविष्यम्? अतः तादृशं ज्ञानमाप्तव्यं येन स्वात्मनो विकासो भवेत्। तच्च सच्छास्त्रपठनेन सद्गुरुवचनश्रवणेन विना नैव प्राप्तुं शक्नुमः। इदानीन्तनकाले सर्वैरयं सन्देशो मनसि ग्राह्यः तथा च तदर्थं यतनीयम्।

॥इति शम्॥



# ॥वादो न वितण्डावादः॥

-श्रेयःकान्तः

## ॥सन्मेधाप्राकट्यम्॥

**(संवादः)**

**(दृश्यम्– सप्तमम्)**

नेपथ्यम्- [केन प्रकारेण मनीषः परिणयार्थं सज्जयितव्य इति रात्रौ मातान्तरा चिन्तयति। गृहपत्या सार्धमपि चर्चा कृता किन्तु न कोऽपि मार्गः प्राप्तः। यतो मनीषः स्त्रीमात्रेषु द्वेषं करोति स्म। ततो युक्तिमार्गेणैव कार्यमिदं कर्तव्यम् इति चिन्तयित्वा गृहे स्वजना ग्रामजनाश्च भोजनायामन्त्रिताः।]

गृहपतिः- मनीष! स्वजनाः श्वो भोजनार्थमामन्त्रिताः सन्ति ।

मनीषः- जानाम्यहम्, किन्तु केन कारणेन निमन्त्रितेति न ।

गृहपतिः- वत्स! बहुसमयेन न मिलिताः स्वजनास्ततः स्नेहमिलनमद्य रचितम्।

मनीषः- तात! स्नेहमिलनेन किं करणीयम्।

गृहपतिः- वत्स! सर्वेषामपि परस्परं विचारधारया नैकट्यवर्धनाय नवनव गुणादीनां सल्लाभाय चेदमायोजनम्।

मनीषः- तात! न मम कारणेन विनालापसल्लापयोः रुचिः। ततो मम सर्वेषां स्वागतादिहेतुभूतानि कार्याण्यहं करिष्यामि किन्तु नालापादयः।

अन्तरा – वत्स! नेदमुचितम् । सर्वैः सार्धं सहृदयभावेनालापादयः कर्तव्याः। सम्बन्धस्य दृढता कर्तव्या। यथा विना सूर्यं कमलानि म्लायन्ते। न स्थास्यन्ते मेघजलं विना चातकाः। न चन्द्रिकां विना चन्द्रः। न जनं विना नगरम्। तद्वत्त्वयापि स्वजनसम्बन्धं विना न वर्तितव्यम्। सर्वैः सार्धं कृतः सम्बन्धोऽवसरे बहुकार्यकरो भवति।

मनीषः- माता मह्यं शास्त्राध्ययनं प्रभूतं रोचते। ततो न सल्लापादिभिर्वृथा समयं विनाशयाम्यहम्।

अन्तरा - वत्स! नाद्यावधि पारिवारिकनगर वास्तव्यजनैः सार्धं तव परिचयः। इत्येवमस्माभि र्भोजनप्रसङ्गः कारितः। ततो नाधुना कुत्रापि गन्तव्यं मम समीपमेव स्थेयं भवता।

॥नेपथ्यम्॥

(पारिवारिकजनाः शनैः शनैः समागच्छन्ति। अन्तरा मनीषमाह्वयति सर्वेषां च परिचयं कारयति। मनिषोऽपि शास्त्राध्ययनाद् विरहितस्तत्रोपविष्टः। सर्वेषां परिचयं कारयति मनीषः। किन्तु कन्यायाः परिचयवेलायां निर्लेपभावयुतोऽधस्तान्नयने कृत्वा तिष्ठति।)

अन्तरा – पुत्र! कथं त्वं कन्यां प्रति निर्लेपभावं विदधासि। स्त्री एव पुत्ररत्नं जनयति न पुरुषः। भवन्ति काचित्स्त्रियः कुलटास्वरूपाः किन्तु सर्वाः स्त्रियोऽयोग्या न निरूपिताः।

मनीषः- हे मात! विना स्त्रियं किं जगति व्यवहारो न भवति? स्त्रीषु कथमीदृशं महत्त्वम्।

अन्तरा– ओम्। विना स्त्रियं न चलति व्यवहारः।

शृणु पुत्र! सन्तानजन्मदात्री स्त्री।
गृहकर्मणि कार्यकर्त्री स्त्री।
मङ्गलकार्येषु कर्मकर्त्री स्त्री।
प्राघृणकेषु कर्मकर्त्री स्त्री।

जन्म-मरण-विवाह-प्रसङ्गेषु कर्मकर्त्री स्त्री।
अतिथिभिक्षाचराणां कृते भिक्षादात्री स्त्री।
पौरजनादिमाङ्गल्यकृत्येऽपि कार्यकर्त्री स्त्री।
पाकसम्पादनेऽपि कार्यव्यापृता स्त्री।
ततः सर्वत्र विना स्त्रियं संसारो न चलति।

मनीषः- मात! मे मनः स्त्रीषु न रमते। स्त्रियः कुशीलाः, कलहप्रियाः, अन्यमनस्काः, कुलटारूपाः, ईर्ष्यादिदुर्भावयुक्ताः, दुर्वचनाः, निरागाः, मलीमसचित्तप्रसराः, अविनीताः, पापहृदयाः, ततो मम मनसि स्त्रीणां न प्रवेशः।

अन्तरा- मनीष! त्वं किं वदस्येवम्। सर्वमेतदसमञ्जसम्। जैनशास्त्रेषु वर्णिता बह्व्यः सत्यः स्त्रियः सन्ति। किं न त्वया ज्ञातम्?

मनीषः- न मया ज्ञातम्। मया तु श्रुतं जैनशासनं पुरुषप्रधानमस्ति, ततो न तत्र स्त्रीणां मूल्यं किञ्चित्।

अन्तरा- नैतद्युक्तं तव चिन्तनम्।

मनीषः- कथं मात! मम तत्राज्ञानत्वम्।

अन्तरा- वत्स! जैनेन्द्रशासने भरहेश्वरनामसज्झायोऽस्ति। तं सर्वमपि सज्झायं सर्वेऽपि साधवः साध्व्यः च प्रातः प्रतिक्रमणावसरे वदन्ति। तस्मिन् महासतीनां स्त्रीणां नामानि सन्ति। सर्वेऽपि तासां स्मरणं प्रतिदिनं कुर्वन्ति।

पञ्चमहाव्रतिनः साधवो यदि तासां स्त्रीणां स्मरणं प्रातरेव कुर्वन्ति तर्हि स्त्रीणां मूल्यं नास्तीति कथं निरूप्यते।

मनीषः- भरहेश्वरसज्झाये तासां कानि नामानि सन्ति।

अन्तरा- मनीष! सज्झाये प्रथमं विशिष्टसाधुश्रावकादीनां नामानि गृहितानि सन्ति। पश्चात्तु सुलसा, चन्दनबाला, मनोरमा...... इत्यादीनां श्रमणीनां महासतीनां च नामानि सन्ति। इत्येवं जैनशासने प्रवचनादिविषये शासनस्य मर्यादायाः पुरुष एव पुरुषसभायां प्रवचनार्हः। न तु साध्व्यः।

यथा व्यवहारेऽपि पाकनिर्माणे स्त्रिय एव कार्यं कुर्वन्ति। तथापि बृहत्समारम्भस्य कृते पुरुष एव भोजनं निर्मापयति। व्यवहारेऽपि तद्दृश्यते। इत्येवं मर्यादाया माहात्म्यात्। जैनशासने स्त्रीणां न मूल्यम् इति असमञ्जसम्। यथा बह्व्यः सत्यः सन्ति दृश्यन्ते चेत्यत्र सावधानमनसा विचारितव्यम्। (नेपथ्यम्)

निवेदकः कालः समागतः। कथयति च-

**तपनपूर्णकालोऽयं वह्निसन्निभतापकृत्।**
**प्राणिनः स्युर्विलीना ये वह्निवत् प्रसरान्विताः॥१॥**
**मानवा माननिर्मुक्ता भोजनाय गतास्ततः।**
**ततो भोजनकालोऽयं पर्षद्-निर्वृत्तिकारकः॥२॥**

नागराः स्वजनाश्च समागताः। ततः सर्वेऽपि गता भोजनाय। मनीषोऽपि समुत्थितो गतो भोक्तुम्।

# चित्र समस्या



चित्र परिचय :

अस्मिन् चित्रे यद् दृश्यते तेन युष्माभि र्यो बोध प्राप्यते, संसारस्वरूपं ज्ञायते, अध्यात्मानंदो मन्यते अधुना यत्किंञ्चिदपि जीवने सुखदायकमनुभूतं स्यात् तत्। लेखप्रेषका: २५ वाक्यै: संस्कृतभाषायां स्पष्टाक्षरै-लिखित्वा श्री "नि:श्रेयस्" मुद्रणालये प्रेषितव्यम्। श्रेष्ठलेखमग्रीमाङ्के प्रकटीकारिष्यतेऽस्माभि:। संपादक :

# ॥पदसमस्या॥

-साध्वीजीश्रीमयणाश्रीः

सीमन्तनीषु का शान्ता
राजा कोऽभूद्गुणोत्तमः।
विद्वद्भिः का सदा वन्द्या
अत्रैवोक्तं न बुध्यसे॥

(अस्यां समस्यायां उत्तरं तु प्रश्नेषु एव विचार्यताम्! उत्तरपदं द्व्यक्षरं प्राप्स्यते ।)

न तस्यादिर्न तस्यान्तर्-
मध्ये यस्तस्य तिष्ठति।
तवाप्यस्ति ममाप्यस्ति
यदि जानासि तद्वद॥

(अस्यां समस्यायां उत्तरपदं त्र्यक्षरं ज्ञेयम् ।)

पदसमस्यायः उत्तरः प्रेषितव्यऽग्रेस्मिन्नङ्के प्रकटीकरिष्यते ।

संसारर्त्तिविभेदनैकप्रवणं
निःश्रेयसं गीयते
सम्यग्ज्ञानसुरापगां वितनुतां
निःश्रेयसं भास्वरम् ।
सद्धीवैभववारिधिः प्रविलसेत्
निःश्रेयसेनाद्भुतो
वर्णन्यासमुरम्यकाव्यरचना
निःश्रेयसायाऽस्तु मे ॥१॥




वाक्शुद्धिं प्रतिभां नवां च लभते
निःश्रेयसाद् वाचक
श्चत्वारो गुणखण्डका गुणकरा
निःश्रेयसस्याङ्गणे ।
कीर्तिर्मुक्तिकरी च सद्गुणकरी
निःश्रेयसे सम्भवेत्
सद्भावैः समतादिकैः शुभकृते
निःश्रेयस ! स्यात् सदा ॥२॥

प्रकाशकम्
जगद्गुरु पू. आ. श्री
विजय हीरसूरीश्वरजी श्रुतज्ञानभवनम्
पालडी-अमदावाद